THE SANSKRIT TEACHER

(IN TWO PARTS)

PART II

TRIVEDI

MACMILLAN AND CO., LIMITED,

BOMBAY, CALCUTTA, MADRAS, AND LONDON

Price reduced to Rs. 1–8–0

The Sanskrit teacher

Part II

Rao Bahadur Kamalashankar
Pranshankar Trivedi B.A.

THE SANSKRIT TEACHER

CONTAINING

INTERESTING SENTENCES AND VERSES FROM SANSKRIT LITERATURE

(IN TWO PARTS)

PART II

(FOR STANDARDS VI AND VII)

BY

RÂO BAHÂDUR KAMALÂSHAṄKAR PRÂṆSHAṄKAR TRIVEDÎ, B. A.,

RETIRED PRINCIPAL, P. R. TRAINING COLLEGE, AHMEDÂBÂD,
AND
EXAMINER IN SANSKRIT IN THE BOMBAY AND PUNJÂB UNIVERSITIES

MACMILLAN AND CO., LIMITED,
BOMBAY, CALCUTTA, MADRAS, AND LONDON
1922
Price Rs. 2-0-0

FIRST AND SECOND EDITIONS PUBLISHED ELSEWHERE
THIRD EDITION (REVISED & ENLARGED) 1915
FOURTH EDITION (REVISED & ENLARGED) 1916
FIFTH EDITION (REVISED & ENLARGED) 1918
SIXTH EDITION (REVISED & ENLARGED)
IN 2 PARTS–1922

Printed by Manilal Itcharam Desai at
THE GUJARATI PRINTING PRESS
No. 8, SASSOON BUILDINGS, CIRCLE, FORT,
BOMBAY

PREFACE TO THE FIRST EDITION

The study of the Sanskrit language which is a mine of invaluable ancient literature is beneficial to all nations from various standpoints, archæological, philological, and others, but to none more than to the Hindus whose life is permeated by religion. It is essential to them for the proper knowledge and cultivation of their vernaculars and the comprehension of their religious and philosophical literature which is the wonder of the civilized world and for which they must have a yearning when foreigners like the Germans, the English, and the Americans are struck with admiration and devote their lives to its study.

During my official career in High Schools and Colleges I have learnt that the study of Sanskrit suffers much for lack of interest in it on the part of students. Indeed, they are inspired with love for it, which endures through life, if the subject is properly handled and the rich treasures of the literature placed before them. It is with the object of facilitating this study by creating a taste in it that the 'Sanskrit Teacher' is composed on somewhat new lines.

The following are the special features of the work:—

(*a*) The cream of Sanskrit literature is supplied to students in every lesson. Great care is bestowed upon the selection of sentences, passages, and verses. They are culled out from classical authors, the great epics, and the Upanishads. They embody proverbial expressions useful in every-day life and ordinary conversation (such as गतानुगतिको लोको न लोकः पारमार्थिकः, अयमपरो गण्डस्योपरि स्फोटः, आम्रान् पृष्टः कोविदारान् व्याचष्टे, क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः, महदपि परदुःखं शीतलं सम्यगाहुः)

and passages full of wisdom and usefulness. They are such as are sure to elevate the mind to a high plane of morality and devotion and inspire it with a spirit of respect and reverence for all that is great and good, respect for learning and wisdom, respect for power and authority, and reverence for God.

(*b*) The book winds up with a large selection of prose and poetic passages. The prose passages are taken from the Pañcha-tantra, the Daśakumâracharita, the Kâdambarî, and the works of Śaṅkarâchârya. They thus supply the student with different specimens of style. The poetic passages are selected from the works of Châṇakya, Bhartṛihari, Kâlidâsa, Bhavabhûti, the Râmâyaṇa, the Mahâbhârata, and various other works.

(*c*) A language is best learnt by the study of its poetic literature which contains wise thoughts clothed in felicitous expression. The committing to memory such gems of literature ensures a command over the language and deepens a taste for it. The object of meeting this requirement is specially kept in view in the selection of verses in lessons and also at the end of the book, which has so many as about 200 of them.

(*d*) The student is introduced to a knowledge of Sanskrit metres and figures of speech. The characteristics of the *gaṇas* are explained and the student supplied with definitions of a few leading metres such as Mâlinî, Vasantatilakâ, Hariṇî, and Śikhariṇî. The leading features of a few figures such as the Upamâ, the Rûpaka, the Arthântaranyâsa, and the Anyokti are elucidated in lessons and notes at the end.

(*e*) The student is directly taken to literature, grammar being made subordinate as it ought to be. This object is attained in the following way. Every lesson opens with a few sentences which are translated into English and in which new grammatical forms are printed black to draw the attention of

students. Then follows a paradigm of forms ready made and lastly come the rules which are deduced from them. The method followed is thus analytic. It will be educative and interesting both to the school-student and to the person of advanced years who has a mind to acquire a knowledge of it. The former should first learn to recognise the forms and then study them. For the latter it will do if he only learns to recognise them.

(*f*) The book comprehends in a small compass all the salient points of Sanskrit grammar, the knowledge of which is essential for the study of Sanskrit literature. All out-of-the-way forms are studiously avoided. Experience as teacher and examiner has shown me that students cram irregular forms for examination purposes and forget them as soon as they are free from their examination. They fail to grasp the general rules which govern the formation of declensional and conjugational forms current in the language. To cure this evil their attention is drawn to forms that are ordinarily met with in literature. External rules of Sandhi which hold in the formation of a variety of forms are with this object carefully explained and illustrated.

(*g*) What is easier and more current is given precedence to what is harder and less current. Compounds and past participles being of general occurrence in the Sanskrit literature are introduced at a very early stage; Futures are treated before the Perfect tense; and the 4th and the 5th varieties of the Aorist before the remaining varieties.

(*h*) The last lesson deals with Taddhita and Kṛit suffixes generally met with in the language.

(*i*) The beauty of Sanskrit grammatical terms lies in the fact that they are mostly significant. If this fact is properly explained to students, much of their work will be facilitated. I regret to remark, however, from my experience as University

examiner, that this fact is not properly brought to the notice of students. It is on this account that words like बहुव्रीहि are found spelt in a variety of ways some of which like बहुरि are simply ridiculous. To remedy this evil, this book explains every grammatical term and thus impresses it upon the minds of students. When a student learns that the word बहुव्रीहि is itself a Bahuvrîhi compound and shows its characteristics, when he knows that the word तत्पुरुष by its twofold dissolution shows its twofold nature, when he knows that the words वर्तमान and भूत are themselves present and past participles respectively, and when he understands that definitions of metres are generally given in a quarter of the same metres that they are meant to define, his task of remembering them becomes extremely easy and interesting and his knowledge becomes sound and enduring.

(*j*) No exercises for translation are given till the student has made some progress in the path of knowledge. He is then given exercises containing Sanskrit sentences for translation. The number of these sentences increases as lessons advance, but is never tediously large. A few sentences only are given in English for translation into Sanskrit.

(*k*) To encourage the cultivation of the habit of self-help without which nothing great in life can be achieved, no glossary is given for selections in prose and poetry at the end. Notes are, however, supplied to explain difficult constructions, expressions, and context, where necessary.

(*l*) An appendix is given for intelligent students. It is hoped that it will be useful to those who wish to be initiated into a study of the Sanskrit grammar of Pâṇini and will also facilitate the work of good students at the time of the revision of the book.

Ahmedâbâd,
June, 1911.

K. P. Trivedî

THE CONTENTS

SUGGESTION

The course in the book may be divided as under:—

St. VI Les. 31–37, pp. 201–270
St. VII. The Whole book

गर्जति शरदि न वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥

ॐ ॐ ॐ

शरणं करवाणि कामदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥

THE SANSKRIT TEACHER

PART II

LESSON XXXI

ADJECTIVES AND ADVERBS

एकादश रुद्रा द्वादशादित्याः—There are eleven Rudras and twelve Âdityas (suns).

माणवको ब्राह्मणानां विंशतये दक्षिणामयच्छत्—Mâṇavaka gave Dakshiṇâ to twenty Brâhmins.

रघुवंशे कुमारसंभवे च यथाक्रममेकोनविंशतिः सप्तदश च सर्गाः—In the Raghuvaṃśa and the Kumârasambhava there are respectively nineteen and seventeen cantos.

जालान्तर्गते रश्मौ यत् सूक्ष्मं रजो दृश्यते तस्य त्रिंशत्तमो भागः परमाणुः कथ्यते—The thirtieth part of the minute particle which appears in the ray that enters the intervening spaces of a lattice-window is called an atom.

सीता प्राणेभ्योऽपि प्रेयसी रामस्य—Sitâ was dearer to Râma than even his life.

कच्चित् कामप्रवेदने—(The indeclinable) कच्चित् is used in the sense of communicating one's own desire, *i. e.*, in the sense of 'I hope.'

कच्चिन्मृगीणामनघा प्रसूतिः—I hope the young ones of does are free from misery, *i. e.*, happy.

कच्चित् is used in asking a question like **अपि**; but it is generally used in asking a question of appeal and has the sense of 'I hope', 'I think'. Sometimes it is used in asking an ordinary question (**कच्चिदेतच्छ्रुतं पार्थ**–Have you heard this, oh! Arjuna ?).

दिष्ट्या प्रतिहता युष्माकं विघ्नाः—Fortunately your obstacles are destroyed—I congratulate you upon the destruction of your obstacles. **दिष्ट्या** is the *Inst. Sing.* of **दिष्टि** (**दिष्ट्या=सुभाग्येन**).

स्थाने खल्वत्र चित्रे सज्जति मे दृष्टिः—It is proper indeed that my sight fixes upon this picture. **स्थाने=युज्यते**—It is proper.

काममेतद् दुर्लभं मनस्त्वस्मिन्नुत्सुकम्—Granted that it is difficult to obtain—however difficult it may be to obtain—, my mind is anxious for it. **कामम्**=As much as one may wish, however much.

स्वयं रोपितेषु तरुषूत्पद्यते स्नेहः किं पुनरङ्गसंभवेष्वपत्येषु—Affection is produced towards trees planted by one's self; how much more, towards children, born of one's self.

किं पुनः, **किमुत**, and **किमु** are used in the sense of 'how much more.' They mean **इति का वार्ता**, **इति किं वक्तव्यम्** (**स्वयं रोपितेषु तरुषु स्नेह उत्पद्यते तर्हि अङ्गसंभवेष्वपत्येषु उत्पद्यते इति किं वक्तव्यम्**. This is called **कैमुतिकन्याय**—the maxim of how much more).

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि=Better to have one virtuous son than a hundred foolish sons.

Note how **वरम्** is used. **वरमिदं—न च** or **न तु** or **न पुनस्तत्** is the construction; **वरमस्मात् तत्** is also used (**वरं कूपशताद्वापी**).

यथा यथा यौवनमत्यक्रामत् तथा तथास्या अङ्गानि लावण्यमपुष्यन्—The more, youth advanced, the more, her limbs increased their grace.

यथा यथा—तथा तथा=The more, the more; the less, the less.

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः—Where the family descended from the Sun and where (my) intellect, having a small range!—wide is the gulf between them (सूर्यः प्रभव उत्पत्तिस्थानं यस्य स सूर्यप्रभवः).

Two क्व's (क्व . . . . क्व) signify great gulf between two things (द्वौ क्वशब्दौ महदन्तरं सूचयतः).

पक्षपातिनावहं (राजा) देवी च—The queen and I are partial.

When nouns qualified by adjectives are of different genders, one masculine and the other feminine, the adjective is masculine.

स च सा च तौ. १५ जनवरी सन् १९२९ ई०।

स च तच्च ते; सा च तच्च ते द्वे वस्तुनी—When one of the nouns is masculine or feminine and the other neuter, the adjective is neuter.

सत्यं धृतिः शमश्च तस्मिन् ध्रुवाणि—Truth, patience, and tranquillity are firm in him.

When the nouns qualified are of all the three genders, the adjective is neuter.

तयैव देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः—By that very deity their names were mentioned as कुश and लव and their prowess was described.

Here the adjective आख्यातः agrees with the preceding noun in gender and number and is to be taken with other nouns by

a change of its gender and number, by लिङ्गविपरिणाम (change of gender) as it is called. नामनी आख्याते इति लिङ्गविपरिणामेनान्वयः.

Adjectives and Adverbs are treated in this lesson.

Numerals from one to ten have been dealt with in Les. 23.

Numerals signifying multiples of ten are given below:—

विंशति	(*f.*)	Twenty.	शत	(*n.*)	A hundred.
त्रिंशत्	,,	Thirty.	सहस्र	,,	A thousand.
चत्वारिंशत्	,,	Forty.	अयुत	,,	Ten thousand; a myriad.
पञ्चाशत्	,,	Fifty.			
षष्टि	,,	Sixty.	लक्ष	,,	One hundred thousand.
सप्तति	,,	Seventy.			
अशीति	,,	Eighty.	प्रयुत	,,	A million.
नवति	,,	Ninety.	कोटि	(*f.*)	Ten million.

विंशतये ब्राह्मणेभ्यो दक्षिणां ददाति नारायणः or ब्राह्मणानां विंशतये दक्षिणां ददाति नारायणः. Thus विंशति &c. are nouns. When they are used as adjectives they are used in the singular number and feminine gender with any nouns.

एकादशन्–Eleven.	द्विसप्तति, द्वासप्तति } Seventy-two.
द्वादशन्–Twelve.	त्रिनवति, त्रयोनवति } Ninety-three.
षोडशन्–Sixteen.	षण्णवति–Ninety-six.
त्रयोविंशति–Twenty-three.	द्व्यशीति–Eighty-two.
पञ्चविंशति–Twenty-five.	त्र्यशीति–Eighty-three.
अष्टात्रिंशत्–Thirty-eight.	अष्टाशीति–Eighty-eight.
द्विचत्वारिंशत्, द्वाचत्वारिंशत् } Forty-two.	एकोनसप्तति, एकान्नसप्तति, ऊनसप्तति } Sixty-nine.
त्रिपञ्चाशत्, त्रयःपञ्चाशत् } Fifty-three.	
अष्टषष्टि, अष्टाषष्टि } Sixty-eight.	

The rule :—

1. In forming the intervening numerals, that is, numerals intervening विंशति, त्रिंशत्, &c. द्वि is changed to द्वा, त्रि to त्रयः, and

अष्टन् to अष्टा. This change does not take place in the formation of the compound numerals of अशीति and takes place optionally in that of the compound numerals of चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, and नवति. Words like पञ्चन् drop their न् like other words ending in न् when they are compounded. Note एकोनसप्ततिः &c.—एकेन ऊना सप्ततिः एकोनसप्ततिः; एकेन न सप्ततिः एकान्नसप्ततिः, here एक is changed to एकाद्.

एकादशः–Eleventh.
विंशः–विंशतितमः–Twentieth.
त्रिंशः–त्रिंशत्तमः–Thirtieth.
षष्टितमः–Sixtieth.
एकषष्टः–ष्टितमः–Sixty-first.
सप्ततितमः–Seventieth.
चतुःसप्ततः–तितमः–Seventy-fourth.
अशीतितमः–Eightieth.
एकाशीतः–तितमः–Eighty-first.
नवतितमः–Ninetieth.
षण्णवतः–तितमः–Ninety-sixth.
शततमः–Hundredth.
सहस्रतमः–Thousandth.

The rule—

2. Ordinals from एकादशन् to नवदशन् are formed by dropping न्.

3. Ordinals from विंशति are formed either by adding तम or by dropping the final vowel or the final consonant with the preceding vowel and adding अ. विंशति drops ति (त्रिंशत्–अत् dropped, अ added; षष्टि–इ dropped, अ added). विंशत्यादिभ्यस्तमडन्यतरस्याम्।, विंशतेर्डिति

Exception:— —इति तिशब्दस्य लोपः॥

4. षष्टि, सप्तति, अशीति, and नवति form their ordinals only one way, *viz.*, by adding तम.

सप्तदशोत्तरं शतम् or सप्तदशाधिकं शतम्=117. सप्तसप्तत्यधिकनवदशशततमो विक्रमार्कसंवत्सरोऽयम्=Saṃvat 1977. त्रयश्चत्वारिंशदुत्तराष्टादशशततमं शालिवाहनवर्षमिदम्=Śaka 1843. एकविंशत्यधिकमेकोनविंशतिशततमं ख्रिस्ताब्दम्=A. D. 1921.

5. अधिक or उत्तर is added to form a higher intervening numeral.

१. प्रशस्यस्य श्रः।५।३।६०॥ २. ज्य च।५।३।६१॥ ३. वृद्धस्य च।५।३।६२॥
4. प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः।६।४।१५७॥ 5. अन्तिकबाढयोर्नेदसाधौ।५।३।६३॥
6. स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः।६।४।१५६।

तर and **तम**, and **ईयस्** and **इष्ठ** are comparative and superlative terminations. They have been dealt with before. Some adjectives undergo changes before **ईयस्** and **इष्ठ** and have thus irregular forms of degrees. They are given below:—

	Positive	Comparative	Superlative
प्रशस्य	Praiseworthy	श्रेयस्-ज्यायस्	श्रेष्ठ-ज्येष्ठ
वृद्ध	Old	ज्यायस्-वर्षीयस्	ज्येष्ठ-वर्षिष्ठ
अन्तिक	Near	नेदीयस्	नेदिष्ठ
बाढ	Good, firm	साधीयस्	साधिष्ठ
स्थूल	Great, bulky	स्थवीयस्	स्थविष्ठ
दूर	Far	दवीयस्	दविष्ठ
युवन्	Young	यवीयस्-कनीयस्	यविष्ठ-कनिष्ठ
ह्रस्व	Small	ह्रसीयस्	ह्रसिष्ठ
क्षिप्र	Quick	क्षेपीयस्	क्षेपिष्ठ
क्षुद्र	Small, low	क्षोदीयस्	क्षोदिष्ठ
प्रिय	Dear	प्रेयस्	प्रेष्ठ
स्थिर	Steady	स्थेयस्	स्थेष्ठ
उरु	Wide	वरीयस्	वरिष्ठ
बहुल	Thick, manifold	बंहीयस्	बंहिष्ठ
दीर्घ	Long	द्राघीयस्	द्राघिष्ठ
अल्प	Small	अल्पीयस्-कनीयस्	अल्पिष्ठ-कनिष्ठ
बहु	Much	भूयस्	भूयिष्ठ
पृथु	Extensive	प्रथीयस्	प्रथिष्ठ
मृदु	Soft	म्रदीयस्	म्रदिष्ठ
कृश	Thin	क्रशीयस्	क्रशिष्ठ
भृश	Strong;-frequent	भ्रशीयस्	भ्रशिष्ठ
दृढ	Firm	द्रढीयस्	द्रढिष्ठ

7. युवाल्पयोः कनन्यतरस्याम् ।५।३।६४।

तर and **तम** are of course added to all these words. These forms are not irregular—**प्रशस्यतर, युवतर** (**न्** is dropped), **दीर्घतर, प्रियतम, अल्पतम, बहुतम.**

The above list need not be committed to memory.

6. **तर** and **तम** are added to nouns also—**पाचकतरः-पाचकतमः**; they are also added to verbs and adverbs and are then changed to **तराम्** and **तमाम्**—**पचतितराम्-पचतितमाम्; उच्चैस्तराम्-उच्चैस्तमाम्**; but **उच्चैस्तर** and **उच्चैस्तम** are adjectives.

7. **बलवत्-बलवत्तर-बलवत्तम; बलीयस्-बलिष्ठ**

स्रग्विन्-स्रग्वितर-तम; स्रजीयस्-स्रजिष्ठ. The possessive terminations are dropped before **ईयस्** and **इष्ठ.***

8. Indeclinables are formed from pronouns as under:—

(अ) **सर्वतः, कुतः** (from **किम्** changed to **कु**), **यतः, ततः, इतः, अतः**—By **तस्** (Having the sense of all cases, but generally the sense of the *Abl.* or the *Loc.* **सार्वविभक्तिकस्तसिः**); *e. g.* **सर्वतः**=From all; in all.

(आ) **तत्र, अमुत्र, सर्वत्र, अन्यत्र, अत्र, यत्र, कुत्र**—By **त्र** (**सप्तम्यर्थ, स्थलवाचक**). **तत्र**=There.

(इ) **सर्वदा, एकदा, अन्यदा, यदा, तदा, कदा**—By **दा** (**सप्तम्यर्थ, कालवाचक**). **सर्वदा**=At all times, always.

(ई) **यथा, तथा, सर्वथा, कथम्** (from **किम्-केन प्रकारेण**)-By **था** (**प्रकारवाचक**, signifying manner). **यथा**=In which manner.

(उ) **पूर्वेद्युः-अन्येद्युः-अपरेद्युः** (Next day)—By **एद्युः** (signifying 'That day'). **पूर्वेद्युः**=Last Day.

भूयान् भेदोऽनयोः शिष्ययोः।
अभिरूपभूयिष्ठा परिषदियम्।
वृद्धतमोऽपि राजा तद्वृत्तान्तमाकर्ण्य यविष्ठवत् क्षिप्रं राजधानी-मगच्छत्।

---

* **पयस्विन्** has **पयसीयस्-पयसिष्ठ**; but these forms are hardly used. **वसुमत्** has **वसिष्ठ**. The Bhâshyakâra winds up a discussion on such forms by the words **यथालक्षणमप्रयुक्ते**—*i. e.*, such forms, though in accordance with the rules (**यथालक्षण**) are **अप्रयुक्त**, not current in the language.

अभिजातं खल्वस्य वचनम्। अथवा चन्द्रादमृतमिति किमत्राश्चर्यम्।
नास्ति भवतोऽपराधः। अहमेवात्रापराद्धा।
कथं रघुनाथ एषः। दिष्ट्या सुप्रभातमद्य यदयं देवो दृष्टः।
तपस्विनां प्रतनुतपसामपि तेजः प्रकृत्या दुःसहं भवति। किमुत सकलभुवनवन्दितचरणानां मुनीनाम्।
कच्चिन्मयापराद्धमन्येन वा केनचिदस्मदनुजीविना परिजनेन। अतिनिपुणमपि चिन्तयन् न पश्यामि स्खलितमल्पमप्यात्मनस्त्वद्विषये।
देव! दिष्ट्या वर्धसे। प्रतिहतास्ते शत्रवः। चिरं जीव। जय पृथिवीम्।
यदुत्तरायणं तदहर्देवानाम्। दक्षिणायनं रात्रिः। संवत्सरोऽहोरात्रः। तत्रिंशता मासः। मासा द्वादश वर्षम्। द्वादश वर्षशतानि दिव्यानि कलियुगम्। द्विगुणानि द्वापरम्। त्रिगुणानि त्रेता। चतुर्गुणानि कृतयुगम्। एवं द्वादश वर्षसहस्राणि दिव्यानि चतुर्युगम्। चतुर्युगानामेकसप्ततिर्मन्वन्तरम्। चतुर्युगसहस्रं च कल्पः। स च पितामहस्याहः। तावती चास्य रात्रिः। एवंविधेनाहोरात्रेण मासवर्षगणनया सर्वस्यैव ब्रह्मणो वर्षशतमायुः। ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसः। तस्यान्ते महाकल्पः। तावत्येवास्य निशा। पौरुषाणामहोरात्राणामतीतानां संख्यैव नास्ति। न च भविष्याणाम्। अनाद्यनन्तता कालस्य॥

---

*विद्यावतां सकलमेव गिरां दवीयः।
कच्चिद् भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥

---

* सकलम्=Everything, *i. e.*, words, actions, and thoughts; गिरां दवीयः–Very far from speech; indescribable.

वरं हि नरके वासो न तु दुश्चरिते गृहे ।
नरकात् क्षीयते पापं कुगृहात् परिवर्धते ॥
वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिनम् ।
उभयमेतदुपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः ॥
यथा यथा भोजयशो विवर्धते सितां त्रिलोकीमिव कर्तुमुद्यतम् ।
तथा तथा मे हृदयं विदूयते प्रियालकालीधवलत्वशङ्कया ॥
सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥
स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥

Oh ! sage ! I hope your austerities are free from obstacles.

It is proper that Urvaśî is called the most handsome of all ladies.

The king and the queen were both pious.

Oh ! friend ! I congratulate you on your success in that good work.

Have you read the story which is related on the one hundred and fifteenth page of the book ?

Wealth makes a man proud, how much more when a little learning and high position accompany it !

Do you remember our residence in Benares on the banks of the holy Ganges ?

The word अव्यय itself signifies that it undergoes no change of gender, number, and case.

Nouns

अकिञ्चनत्व (अकिञ्चनत्वम्) *n.*(नास्ति किंचन यस्य सोऽकिंचनः [कर्म०, *Vide* Les. XXXII] तस्य भावोऽकिंचनत्वम् or तत्त्वम्)-The state of having nothing.

अनर्थ (अनर्थः) *m.*-An evil.

अनाद्यनन्तता *f.*–(नास्त्यादिर्यस्य सोऽनादिः [बहु०], नास्त्यन्तो यस्य सोऽनन्तः [बहु०], अनादिश्चासावनन्तश्च [कर्म० or विशेषणस०] अनाद्यनन्तस्तस्य भावस्तत्ता)–The state of having neither beginning nor end.

अभिरूप (अभिरूपः) *m.*–A learned man.

अलकाली *f.* (अलक *m.*–hair+आलि-ली *f.* A line)–Thick and long hair.

अविवेकिता *f.* (न विवेकी अविवेकी, नञ्स०, तस्य भावस्तत्ता)–Absence of discretion or discrimination.

अहोरात्र (अहोरात्रः)–*m.* (अहश्च रात्रिश्चाहोरात्रः, द्वन्द्व; अहन् is changed to अहः and रात्रि to रात्र)–Day and night.

आश्चर्य (आश्चर्यम्) *n.*–Wonder.

उत्तरायण (उत्तरायणम्) *n.* (उत्तर* *pro.*+अयन *n.* going)–The period of six months during which the Sun travels from the south to the north (उत्तरस्यामयनं सूर्यस्य गमनं यस्मिंस्तन्मासषट्कमुत्तरायणम्. मासषट्क= six months).

कल्प (कल्पः) *m.*–Brahman's day (At the end of it, the world comes to an end).

कलियुग (कलियुगम्) *n.*–The Kali age.

कृतयुग (कृतयुगम्) *n.*–The Satya age.

चतुष्टय (चतुष्टयम्) *n.*–A collection of four things.

जाल (जालम्) *n.*–An eye-hole; a lattice-window.

तारा *f.*–A star.

त्रेता *f.*–The Tretâ age.

दक्षिणायन (दक्षिणायनम्) *n.* (दक्षिण *pro.* +अयन *n.* going)–The

* उत्तरे–राः, उत्तरस्मात्–रात्, उत्तरस्मिन्–रे—These are the optional forms of उत्तर. The rule:—पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, when they signify relative position, स्व, when it does not mean a relation or money, and अन्तर, when it means external, or inner (as applied to a garment), are pronouns and declined optionally as such in the *Nom. Plu.*, the *Abl. Sing.*, and the *Loc. Sing.*; *e. g.* पूर्वस्यां पूर्वायां वा दिशायाम्; उत्तरस्मिन् उत्तरे वा मार्गे; स्वे–स्वाः (*i. e.*, आत्मीयाः); अन्तरे अन्तरा वा गृहाः (*i. e.*, बाह्याः); अन्तरे अन्तरा वा शाटकाः (*i. e.*, परिधानीयाः, to be worn).

six months during which the Sun travels from the north to the south.

द्वापर (द्वापरः)–*m.* The Dvâpara [age.

निशा *f.*–Night.

परमाणु *m.* (कर्म०, परम+अणु *m.*)–The smallest particle; an atom.

परिजन (परिजनः) *m.*–A servant.

पितामह (पितामहः) *m.* (मह is a suffix)–Brahmâ.

प्रवेदन (प्रवेदनम्) *n.*–The act of relating or communicating.

प्रसूति *f.*–Offspring; progeny.

भोज (भोजः) *m.*–Name of a king.

मन्वन्तर (मन्वन्तरम्) *n.*–*The time of one Manu.

याच्ञा–Begging; solicitation.

रश्मि *m.*–A ray.

राजधानी *f.*–A capital.

विषय (विषयः) *m.*–A subject.

विपरिणाम (विपरिणामः) *m.*–A change.

वृत्तान्त (वृत्तान्तः) *m.*–An account.

संभव (संभवः) *m.*–Birth.

सर्ग (सर्गः) *m.*–A canto.

संवत्सर (संवत्सरः) *m.*–A year.

सुप्रभात (सुप्रभातम्) *n.*–(प्रादिस०, शोभनं or सुष्ठु प्रभातम्)–An auspicious morning.

स्खलित (स्खलितम्) *n.* (*p. p.* of स्खल् 1*st Par.*)–An error, a stumbling.

Adjectives

अतीत (*p. p.* of इ with अति 2*nd Par.*)–Gone.

अधिगुण (अधिका गुणा यस्य सोऽधिगुणः)–Having many or superior virtues; meritorious.

अनघ (अनघा *f.* बहु०, नास्ति अघं दुःखं यस्याः सा)–Healthy.

अनुजीविन्–Depending upon another for maintenance.

अपराद्ध (*p. p.* of अप+राध् 4*th Par., Active* in sense)–1. Guilty; 2. (*Passive*)–Offended.

अभिजात (*p. p.* of अभि+जन् [जा] 4*th Âtm.*)–Polite; such as a person of a noble family (अभिजन) would speak.

उद्यत (*p. p.* of उद्+यम् [यच्छ्] 1*st Âtm.*)–Ready.

चतुर्गुण (बहु०)–Four-fold.

ज्योतिष्मत्–Possessed of light.

तावत्–So much.

त्रिगुण (बहु०)–Three-fold.

दिव्य–Divine.

दुःसह–Hard to bear.

* One मन्वन्तर embraces 4,320,000 × 71 = 306,720,000 years.

द्विगुण (बहु०)–Double.
परिच्छिन्न (*p. p.* of परि+छिद् 7*th Ubh.*)–Measured.
पौरुष–Of Purusha or Vishṇu.
प्रतनु (प्रादिस०, प्रकृष्टं तनु)–Very small.
प्रतिहत (*p. p.* of प्रति+हन् 2*nd Par.*)–Destroyed.
मखज (मख *m.*–A sacrifice+ज from जन् [जा] 4*th Âtm.*)–Produced from a sacrifice.
मोघ–Fruitless.
राजन्वत्–Having a good king.
रसिक (*f.* रसिका)–Appreciating.
रोपित (*p. p.* of the *Cau.* of रुह् 1*st Par.*)–Planted.
वन्दित (*p. p.* of वन्द् 1*st Âtm.*)–Saluted.
सकल (बहु०, कलाभिः अवयवैः सहितं [सकलम्)–All.
सदृश–Like.
संकुल–Full of.

Roots

वि+अञ्ज् (व्यनक्ति) (7*th Par.*)–To manifest.
वि+इ (व्येति) (2*nd Par.*)–To undergo a change.
वि+दु (विदुनोति) (5*th Par.*)–To afflict.
सस्ज् (सज्जति-ते) (1*st Ubh.*)–To go, To fix.

Indeclinables

अतिनिपुणम्–Very cleverly; very minutely.
कामम्–Granted.
कच्चित्–1. (It signifies hope or wish)–I wish, I hope; 2. It signifies a question.
क्षिप्रम्–Quickly.
दिष्ट्या–Fortunately (the *Inst. Sing.* of दिष्टि).
वरम्–Better.
सहस्रशः–By thousands.

LESSON XXXII

COMPOUNDS: AVYAYÎBHÂVA AND TATPURUSHA.

Elementary knowledge of compounds has been given in lessons XI and XII and also in vocabularies and in foot-notes to lessons. Additional knowledge of the subject is given in this and the next lesson.

यथाशक्ति, प्रतिदिनम्, उपकृष्णम्—Here the sense of the indeclinables यथा, प्रति, and उप is predominant; since
प्रधान, व्यापक

the compounds mean respectively, '*According to* one's power,' '*Every* day' (*On* every day), and '*Near* Kṛishṇa'. १. पूर्वपदप्रधानोऽव्ययीभावः।

अव्ययीभाव—In this compound, the sense of the पूर्वपद or the first member is generally predominant.

Exception-शाकप्रति=शाकस्य लेशः शाकप्रति. Here the sense of the उत्तरपद or the last member, *viz*., प्रति, is predominant; for the compound means '*A little* of a vegetable.' सुप्प्रति सुप्प्रतिना मात्रार्थे।२।१।९॥ मात्रा = बिन्दु, स्तोकम्.

The dissolution of principal अव्ययीभाव compounds is given below:—

हराविति अधिहरि (This is called सप्तमीविभक्त्यर्थ अव्ययीभाव, अधि having the sense of the *Loc.*); कृष्णस्य समीपमुपकृष्णम्; यावन्तः श्लोका यावच्छ्लोकमच्युतप्रणामाः (There are as many salutations to Vishṇu as there are *ślokas*; यावत् signifies अवधारण or determination); यावदमत्रं ब्राह्मणानामन्त्रयस्व=यावन्त्यमत्राणि तावतो ब्राह्मणानित्यर्थः (Call as many Brâhmins as there are dining-pots); जीवनपर्यन्तं यावज्जीवम्; विधिमनतिक्रम्य यथाविधि; गङ्गायाः पारे पारेगङ्गं पारेगङ्गाद्वा। गङ्गाया मध्ये मध्येगङ्गं मध्येगङ्गाद्वा (पार and मध्य are changed to पारे and मध्ये and the compound is used in the *Abl.* form also); दिने दिने प्रतिदिनम्; तृणमप्यपरित्यज्य (not leaving even grass) सतृणम् (as in सतृणमत्ति); अक्ष्णः परं परोक्षम् (out of sight; पर is changed to परो); अक्ष्णः प्रति प्रत्यक्षम् (within sight); रूपस्य योग्यमनुरूपम् (suitable); हरेः पश्चादनुहरि; ज्येष्ठानुक्रमेण अनुज्येष्ठम् (according to seniority); हिमाचलमारभ्य आहिमाचलम् आ हिमाचलाद्वा (the compound being optional); सेतुपर्यन्तम् आसेतु आ सेतोर्वा; मक्षिकाणामभावो

२. पारे मध्ये षष्ठ्या वा।२।१।१८॥ ३. नाव्ययीभावादतोऽम्त्वपञ्चम्याः।२।४।८३॥
४. यावदवधारणे।२।१।८॥

1. A frame for supporting a bed, खाट. 2. अनश्च।५।४।१०८॥

निर्मक्षिकम् ("कृतं त्वया साम्प्रतं निर्मक्षिकम्"—You have now turned away all from this place; you have made the place free even from flies).

समासान्तप्रत्यय—आत्मानमधिकृत्येति अध्यात्मम्; अहनि अहनि इति प्रत्यहं प्रत्यह वा—In अव्ययीभाव compounds the ending अन् is dropped and अ added to the word. This change is optional when the word ending in अन् is neuter.

तत्पुरुष—

द्विजायायं द्विजार्थः ओदनः, द्विजायेयं द्विजार्था यवागूः, द्विजायेदं द्विजार्थं पयः—

चतुर्थीतत्पुरुष is formed of a word in the *Dat.* with अर्थ; and the compound is an adjective and agrees in gender, number, and case with the noun it qualifies. This compound is called नित्यसमास. खट्वारूढः means जाल्म or नीच. It cannot be dissolved and is therefore a नित्यसमास. A student must sleep on the ground. If he sleeps on a bed-stead, he is called खट्वारूढ, *i. e.*, a wretch. खट्वामारूढः has not this sense. द्विजार्थः is not dissolved by using अर्थं in the विग्रहवाक्य. It is therefore a नित्यसमास. A compound, which cannot be dissolved at all or cannot be dissolved by words forming it, is a नित्यसमास. अधिहरि, प्रतिदिनम्, &c. are all नित्यसमास's. Thus अविग्रहोऽस्वपदविग्रहो वा नित्यसमासः.

अश्वघासः—अश्वस्य घासः, रन्धनस्थाली–रन्धनस्य स्थाली (a cooking-pot). These are षष्ठीतत्पु॰ compounds. यूपाय दारु यूपदारु—चतु॰ तत्पु॰ takes place only when there is प्रकृति-विकृतिभाव, *i. e.*, the relation of a material and a thing made of it. In यूपदारु, दारु is प्रकृति or a material and यूप, विकृति or a thing made of it. There is no such relation between अश्व and घास and also between रन्धन and

4. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।२।१।३६॥

१. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे।२।२।१।।
२. विशेषणं विशेष्येण बहुलम्।२।१।५७।।

स्थाली; and therefore अश्वघासः, रन्धनस्थाली, and similar compounds are षष्ठीतत्पु० and not चतु०तत्पु०.

पुरुषोत्तमः—पुरुषेषु उत्तमः; नृषु श्रेष्ठः नृश्रेष्ठः; द्विजेषु वरः (the best) द्विजवरः; द्विजेषु सत्तमः (the best) द्विजसत्तमः—

It is correct to say पुरुषाणामुत्तमः or पुरुषेषु उत्तमः, नृणामुत्तमः or नृषु उत्तमः, &c. The षष्ठी and the सप्तमी in such cases are called निर्धारणषष्ठी and निर्धारणसप्तमी; because an individual is as it were separated from a class and determined (निर्धारण = Determination) to possess a certain quality in a higher degree than all the other members of it. The compound of निर्धारणषष्ठी is forbidden and so where a compound *is found* in this sense it should be taken as सप्त०तत्पु० and not षष्ठीतत्पु०.

एकदेशिसमास or अवयविसमास[1]—पूर्वं कायस्य पूर्वकायः; अपरं कायस्य अपरकायः; मध्यं रात्रेः मध्यरात्रः; मध्यमह्नः; (अह्नः the *Gen. Sing.* of अहन्)* मध्याह्नः; सायमह्नः सायाह्नः—

This is a compound of a part and the whole. एकदेश or अवयव means a part and एकदेशिन् or अवयविन्, the whole.

कर्मधारय[2]—पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः (first bathed and then anointed).

मेघ इव श्यामो मेघश्यामः[3], चन्द्र इव सुन्दरं चन्द्रसुन्दरम्, सप्त च ते ऋषयश्च सप्तर्षयः (संज्ञावाचक, *i. e.*, a proper name), शीतं च तदुष्णं च शीतोष्णम् (विशेषणसमास), पुरुषो व्याघ्र इव[4] पुरुषव्याघ्रः; वदनं कमलमिव वदनकमलम् (This is called उपमितसमास; because पुरुषः, वदनम्, &c. are उपमित or उपमेय, *i. e.*, objects com-

* For the declension of अहन् see Les. XXXV.

3. उपमानानि सामान्यवचनैः।२।१।५५।। 4. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।२।१।५६।।

१. नलोपो नञः।६।३।७३॥ २. स नपुंसकम्।२।४।१७॥

3. संख्यापूर्वो द्विगुः।२।१।५२॥, 4. कालाः परिमाणिना।२।२।५॥

5. दिक्संख्ये संज्ञायाम्।२।१।५०॥6. उपपदमतिङ्।२।२।१९॥

pared), पुरुषो व्याघ्र इव शूरः—Here no compound takes place. When the साधारणधर्म is given, the compound is forbidden.

नञ्तत्पुरुष—न ब्राह्मणः अब्राह्मणः. नञ् means a word signifying negation.

द्विगु—त्रयाणां लोकानां समाहारस्त्रिलोकी; अष्टानामध्यायानां समाहारोऽष्टाध्यायी; चतुर्णां सूत्राणां समाहारश्चतुःसूत्री—

These are instances of समाहारद्विगु. समाहार means 'a collection.' A collective द्विगु ending in अ is generally feminine. The ending अ is dropped and ई added to the compound.

पञ्चानां पात्राणां समाहारः पञ्चपात्रम्; also सप्तगङ्गम्, त्रिभुवनम्.

मासो जातस्यास्य मासजातः (one month old); similarly, संवत्सरजातः (one year old)—These are classed as तत्पुरुष.

सप्तर्षयः (a proper name); पूर्वस्यां शालायां भवः पौर्वशालः (here the तद्धित suffix अ is added)*; त्रयाणां लोकानां नाथः त्रिलोकनाथः—Words signifying a direction or a number are compounded only when the compound is a proper noun, or when a तद्धित or primary suffix is added to the compound, or when there is an उत्तरपद (as in त्रिलोकनाथः).

उपपदसमास—कुम्भं करोतीति कुम्भकारः; सर्वं जानातीति सर्वज्ञः. It is a variety of तत्पु०, consisting of a noun and a verbal derivative. Since the noun in this connection is called उपपद, the compound is known as उपपदसमास.

प्रादिसमास—अतिक्रान्तः इन्द्रियाणि अतीन्द्रियः (inaccessible to the senses); निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः (gone out of कौशाम्बी, a city on the Ganges); सुष्ठु शोभनं वा मित्रं

* Before this suffix the initial vowel takes its *Vriddhi* substitute and the final vowel is dropped.

7. (निरादयः क्रान्ताद्यर्थे पञ्चम्या).

१. मयूरव्यंसकादयश्च ।२।१।७२।। 2. प्राप्तापन्ने च द्वितीयया ।२।२।४।।
3. समानाधिकरणाधिकरणे [illegible] नञ् तत्पद-
लोपश्च । (वा० २।१।६०।) 4. राजाहःसखिभ्यष्टच् ।५।४।९१।।

सुमित्रम्; कुत्सितं (censurable) मित्रं कुमित्रम्; प्रकृष्टं तनु प्रतनु (very small).

मध्यमपदलोपी—शाकप्रियः (fond of vegetables) पार्थिवः शाकपार्थिवः; देवपूजको ब्राह्मणः देवब्राह्मणः. It is called मध्यमपदलोपी, because the middle term (*e.g.*, प्रिय in शाकपार्थिव and पूजक in देवब्राह्मण) is dropped.

मयूरव्यंसकादि—Some irregular compounds are classed under this class and called तत्पु०.

मयूरो व्यंसकः (धूर्तः=a rogue) मयूरव्यंसकः; वदनमेव कमलं वदनकमलम्; अन्यो राजा राजान्तरम्; चिदेव चिन्मात्रम् (pure intelligence); नास्ति कुतोऽपि भयं यस्य सः अकुतोभयः; उदक् च अवाक् च उच्चावचम् (high and low; of various kinds); नास्ति किंचन यस्य सोऽकिंचनः (Though अकुतोभयः and अकिंचनः are बहु० in sense, they are classed as तत्पु०).

In a तत्पु० स०, the sense of the उत्तरपद (the last word) is generally predominant.

Exception—पूर्वकायः (पूर्वं कायस्य, the fore-part of the body); प्राप्तजीविकः (प्राप्तो जीविकां [livelihood] प्राप्तजीविकः); आपन्नजीविकः (आपन्नो जीविकाम्, one who has obtained a living).

समासान्तप्रत्यय-अङ्गानां (अङ्गदेशानाम्) राजा अङ्गराजः; परमश्चासौ राजा च परमराजः; महांश्चासौ राजा च महाराजः; महान् बाहुर्यस्य स महाबाहुः; महतां सेवा महत्सेवा; शच्याः (इन्द्राण्याः) सखा शचीसखः; पुण्यं च तदहश्च पुण्याहम्—(1) At the end of a तत्पु०स०, राजन्, अहन्, and सखि have their final vowel or final consonant with the preceding vowel dropped and अ added; *i. e.*, they are changed to राज, अह, and सख. (2) महत् is changed to महा in कर्म० and बहु० compounds, but not in तत्पु० compounds; *e. g.*, महाबाहुः, but महत्सेवा.

15

5. आन्महतः समानाधिकरणजातीययोः ।६।३।४६।।

1. अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।५।४।८७॥
2. अह्नोऽह्न एतेभ्यः ।५।४।८८॥ 3. न संख्यादेः समाहारे ।५।४।८९॥ 3. पुण्यसुदिनाभ्यामह्नः क्लीबता (वा०).
4. संख्यापूर्वं रात्रं क्लीबम् (वा०), 5. रात्राह्नाहाः पुंसि ।२।४।२९॥

मध्यं रात्रेः मध्यरात्रः; अतिक्रान्तो रात्रिमतिरात्रः (प्रादिस०); मध्यमह्नः मध्याह्नः; पूर्वमह्नः पूर्वाह्णः; अपरमह्नः अपराह्णः; सायमह्नः सायाह्नः; पुण्यं च तदहश्च पुण्याहम्; द्वयोरह्नोः समाहारो द्व्यहः; नवानां रात्रीणां समाहारो नवरात्रम्; अहश्च रात्रिश्च अहोरात्रः (द्वन्द्व)—(3) रात्रि preceded by अहन्, सर्व, words signifying a part—like पूर्व, अपर, and मध्य–, संख्यात (enumerated), पुण्य, a numeral, or an उपसर्ग, is changed to रात्र; and under the same conditions, *i. e.*, when preceded by सर्व &c., अहन् is changed to अह्न; but अहन् is changed to अह when preceded by पुण्य, सुदिन, or a numeral. (4) द्वन्द्व and तत्पु० compounds ending in रात्र, अह्न, and अह are masculine; but रात्र preceded by a numeral and अह preceded by पुण्य and सुदिन are neuter. (सुदिनं च तदहश्च सुदिनाहम्—a happy day; an auspicious day).

(5) इक्षूणां (of sugar—canes) छाया इक्षुच्छायम्—छाया is changed to छाय when the preceding member of the compound has the sense of the plural number. *N. B.* इक्षोश्छाया इक्षुच्छाया.

द्वयोः गवोः समाहारः द्विगवम्; पञ्चानां गवां समाहारः पञ्चगवम्; पञ्चभिर्गोभिः क्रीतं पञ्चगु; द्वाभ्यां गोभ्यां क्रीतं द्विगु—

(6) A तत्पु० compound ending in गो has अ added to it, but it is not added when a तद्धित termination applied to it is dropped.

कुत्सितो (censurable) राजा किंराजा; कुत्सितः सखा किंसखा ("स किंसखा शास्ति न यो नराधिपम्"); शोभनो राजा सुराजा; अत्यधिको (very great) राजा अतिराजा—

(7) समासान्त terminations are not added when किम् signifying censure and सु and अति signifying respect are used as पूर्वपद of the compound.

6. छाया बाहुल्ये ।२।४।२२॥ 7. गोरतद्धितलुकि ।५।४।९२॥

अन्यस्मिञ्जन्मनि न कृतमवदातं कर्मास्माभिः। जन्मांतरकृतं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि।

किमत्र क्रियते दैवायत्ते वस्तुनि। मुच्यतां शोकानुबन्धः।

एतस्येदृशेन दर्शनेन कीदृशो मे हृदयानुबन्ध इति न जानासि।

परं हि दैवतमृषयः। यत्नेनाराधिता यथासमीहितफलानां दुर्लभानामपि वराणां दातारो भवन्ति।

प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि च सदा भवन्ति सतां चेतांसि।

दिवसस्येयमतिकष्टा दशा वर्तते। तथा हि रविरम्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनलधूलिनिकरमिव विकिरति करैः।अधिकामुपजनयति तृषाम्। संतप्तपांसुपटलदुर्गमा भूः। अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि। अप्रभुरस्म्यात्मनः। सीदति मे हृदयम्। अन्धकारतामुपयाति चक्षुः। अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेत्॥

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव॥
स्नेहमूलानि दुःखानि रसमूला हि व्याधयः।
लोभमूलानि पापानि त्रीणि त्यक्त्वा सुखी भवेत्॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात्।
मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम्॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय॥
*लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।

---

* This is a description of evening. The falling of darkness is as it were its besmearing our limbs or the sky showering collyrium. The pervading of darkness is considered to be identical with its besmearing our limbs or with the showering of collyrium by the sky.

असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥
*कुण्डले नैव जानामि नैव जानामि कङ्कणे ।
नूपुरावेव जानामि नित्यं पादाभिवन्दनात् ॥
शरणं करवाणि कामदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब† कृतार्थसार्थवाहम् ॥

A certain Brâhmin living in a village went to another village for the sake of acquiring knowledge.

The thought of sin committed by a good man pains him as long as life endures.

The island of Dwârakâ stands in the midst of the ocean.

Being overpowered by heat and thirst, I cannot move even a step.

My body grows weak day by day; God of Death (Yama) would probably take away my life even against my wish.

Though poor, he was very liberal indeed; or what wonder is there in this, for he was very merciful !

He was the best of all teachers: his students looked upon him as their father.

The more you work, the more you acquire glory.

Nouns

अङ्गक (अङ्ग *n.*+क a suffix signifying tenderness) *n.*–A tender limb.

अज्ञानसंमोह (तत्पु०) *m.*–Infatuation arising from ignorance.

अनल (अनलः) *m.*–Fire.

अञ्जन (अञ्जनम्) *n.*–Collyrium.

अनुबन्ध (अनुबन्धः) *m.*–1. A tie, a continuity; 2. An attachment.

अभिवन्दन (अभिवन्दनम्) *n.*–Salutation.

†अम्बा *f.*–A mother.

अम्बर (अम्बरम्) *n.*–The sky.

* Said by Lakshmaṇa in regard to Sitâ. "ऊर्ध्वदृष्ट्या परस्त्रीत्वेन कदाप्यदर्शनादिति भावः ॥"

† *Voc. Sing.* हे अम्ब, but अम्बिका is regular; हे अम्बिके.

आतप (आतपः) *m.*–Heat.
कटाक्ष (कटाक्षः) *m.*–A side-long glance.
कुण्डल (कुण्डलः-लम्) *m.*, *n.*–An ear-ring.
केयूर (केयूरः-रम्) *m.*, *n.*–An arm-let.
कर (करः) *m.*–A ray.
काञ्चन (काञ्चनम्) *n.*–Gold.
गुणानुबन्धित्व *n.*–(गुण *m.*+अनुबन्ध *m.*–A tie, continuity)–The state of the continuity of merits.
तमस् *n.*–Darkness.
तल (तलः-लम्) *m.*,*n.*–A surface.
तृषा *f.*–Thirst.
तैल (तैलम्) *n.*–Oil.
त्याग (त्यागः) *m.*–Charity.
दैवत (दैवतम्) *n.*–A deity.
धनञ्जय *m.*–Name of Arjuna.
धूलि *m.*, *f.* (धूली *f.*)–Dust.
निकर (निकरः *m.*)–A collection.
नभस् *n.*–The sky.
निष्फलता *f.* (निष्क्रान्तं फलं यस्मात् तन्निष्फलं तस्य भावस्तत्ता)–Fruitlessness; the state of being of no use.
नूपुर (नूपुरम्) *n.*–An anklet.
पटल (पटलम्) *n.*–A heap; a multitude.
पांसु *m.*–Dust.
पात (पातः) *m.*–A fall; the act of falling.
पिपासा *f.*–Thirst.
प्रसव (प्रसवः) *m.*–Birth.
बन्धन (बन्धनम्) *n.*–A tie.
मौन (मौनम्) *n.*–Silence.
रस (रसः) *m.*–Taste.
वर (वरः) *m.*–A boon.
विपर्यय (विपर्ययः) *m.*–Reverse; contrariety.
श्लाघा *f.*–Praise.
सार्थवाह (सार्थवाहः) *m.*–A leader of a caravan; a leader.

Adjectives

अचर–Immovable.
अतिकष्ट–Very woful.
अतिप्रबल–Very powerful.
अप्रभु–Not lord; not master, unable to control.
अवदात (*p. p.* of अव+दै 1*st* *Par.*)–Purified; holy.
अवसन्न (*p. p.* of अव+सद् [सीद्] 1*st*,6*th Par.*)–Sinking; drooping.
आयत्त (*p. p.* of आ+यत् 1*st* *Âtm.*)–Dependent.
आराधित (*p. p.* of आ+राध् 10*th* *Par.*)–Worshipped.
आर्द्र–Wet.
उपजीव्य (*pot. p.* of उप+जीव् 1*st Par.*)–(That) on which one depends; supporting.
एकाग्र–Fixed on one object; closely attentive.
कामद (उपपदसमा०)–Giving or fulfilling all desires.
कृतार्थ (बहु०)–One whose desires are fulfilled.
चर–Movable.

दुर्गम–Difficult to cross.
प्रनष्ट (*p. p.* of प्र+नश् 4*th Par.*)–Destroyed (Mark that न् is not changed to ण् in this word).
मसृण–Soft.
शिथिल–Loose.
संतप्त (*p. p.* of सम्+तप् 1*st Par.*)–Heated.
समीहित (*p. p.* of सम्+ईह् 1*st Âtm.*)–Desired.

Roots

उप+जन् (*Cau.* उपजनयति)–To produce.
उप+नी (उपनयति) (1*st Par.*)–To bring; To produce.
उप+पद् (*Cau.* उपपादयति)–To produce.
उप+या (उपयाति) (2*nd Par.*)–To go to; to obtain.
लिप् [लिम्प्] (लिम्पति-ते) (6*th Ubh.*)–To besmear.
वि+कॄ (विकिरति) (6*th Par.*)–To scatter.
सद् (सिदति) (1*st*, 6*th Par.*)–To droop; to sink.
सम्+आ+गम् (समागच्छति) (1*st Par.*)–To unite.

Indeclinables

अनवरतम् (अन्+अव+रत *p. p.* of रम् 1*st Âtm.*)–Constantly.
अपि नाम–Probably; how I wish! (It signifies I. Probability; II. Wish).
अलम्–Able (समर्थ).
अल्पम्–A little.

LESSON XXXIII

Compounds (*Continued*).

Bahuvrîhî and Dvandva

बहुव्रीहि—प्राप्तमुदकं यं स प्राप्तोदको ग्रामः; वीराः पुरुषा यस्मिन् स वीरपुरुषो ग्रामः; पीतमम्बरं यस्य स पीताम्बरो हरिः (Here the members of compounds are in apposition). In this compound there may be two or more members and they are समानाधिकरण, *i. e.*, in apposition or in the same case.

व्यधिकरणबहुव्रीहि—असिः पाणौ यस्य सोऽसिपाणिः; दण्डः पाणौ यस्य स दण्डपाणिः. It is a बहु० compound in which members are not in apposition. It is therefore called व्यधिकरण (not in apposition). Such a compound is not sanctioned except in a few cases.

तद्गुणसंविज्ञान and अतद्गुणसंविज्ञान—We say लम्बकर्णमानय. When लम्बकर्ण (लम्बौ कर्णौ यस्य सः, गर्दभ इत्यर्थः) or an ass comes, his long ears come with him; there is thus a recognition (संविज्ञान) of his quality—long ears. The compound is therefore तद्गुण०बहु०. When we say दृष्टसागरमानय (दृष्टः सागरो येन स दृष्टसागरस्तं दृष्टसागरम्), there is no recognition of his quality—his having seen a sea. The compound is therefore अतद्गु०बहु०.

सीतया सह वर्ततेऽसौ or वर्तमानः ससीतः सहसीतो वा (सह is optionally changed to स). उत्तरस्याः पूर्वस्या दिशोऽन्तरालं मध्यमुत्तरपूर्वा; दक्षिणस्याः पूर्वस्या दिशोऽतरालं दक्षिणपूर्वा—Such compounds are called बहु०, though they have not the sense of बहु०.

वक्तुं कामो (desire) यस्य स वक्तुकामः; गन्तुं मनो यस्य स गन्तुमनाः (तुम् drops its म् when followed by काम or मनस्).

आहितोऽग्निर्येन स आहिताग्निरग्न्याहितो वा (one who keeps the sacred fire); असिरुद्यतो येन सोऽस्युद्यत उद्यतासिर्वा (one who has raised the sword)—In some cases, a past participle which is generally the first member of a compound, becomes उत्तरपद also.

In a बहु० compound, the sense of a word other than the members of the compound is generally predominant.

Exception—द्वित्राः(द्वौ वा त्रयो वा) &c. Here the sense of both the members is predominant. पीताम्बरः means neither पीत, nor

अम्बर, but one whose garment is yellow. It is thus अन्यपदार्थ-प्रधान, *i. e.*, a compound in which the sense of a word other than the members of the compound is predominant.

समासान्तप्रत्यय—सस्त्रीकः; सवधूकः; बहुकर्तृकः—(1) When the final member of a बहु० compound ends in ऋ or is a feminine noun ending in ई or ऊ, क is added to the compound. सकर्मकम्, अकर्मकम्—(2) क is generally added at the end of a बहु० compound.

एको वा द्वौ वा एकद्वाः (used in the Plu.); द्वौ वा त्रयो वा द्वित्राः (used in the Plu.); त्रयो वा चत्वारो वा त्रिचतुराः; चत्वारो वा पञ्च वा चतुष्पञ्चाः; पञ्च वा षड् वा पञ्चषाः; दशानां समीपे ये सन्ति ते उपदशाः; द्विर्दश द्विरावृत्ता वा दश द्विदशाः; विंशतेरधिका अधिकविंशाः; त्रिंशत आसन्ना आसनत्रिंशाः; पञ्चाशतोऽदूरा अदूरपञ्चाशाः; चत्वारिंशतोऽधिका अधिकचत्वारिंशाः—(3) The compound of a numeral with another numeral, or an indeclinable, or with आसन्न, अदूर, or अधिक is classed under बहु०. In this, the ending vowel or the ending consonant with the preceding vowel is dropped and अ added. विंशति drops its ति and चतुर् has अ added on. All these compounds are used in the *Plu.*

केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तमिति केशाकेशि (fighting by catching each other's hair); दण्डैर्दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति दण्डादण्डि; similarly, मुष्टीमुष्टि—(4) Such compounds are classed as बहु०. Here the ending vowel of the पूर्वपद is lengthened and the compound ends in इ. The compound is an indeclinable and signifies repetition of action (कर्मव्यतिहार).

कमले इवाक्षिणी यस्य स **कमलाक्षः**; हरिणस्याक्षिणी इवाक्षिणी यस्याः सा **हरिणाक्षी**—(5) At the end of a बहु॰ compound अक्षि is changed to अक्ष (*f.* अक्षी).

नास्ति प्रजा यस्य सोऽ**प्रजाः**; दुष्टा मेधा यस्य स **दुर्मेधाः**; शोभना प्रजा यस्य स **सुप्रजाः**—(6) प्रजा and मेधा are changed to प्रजस् and मेधस् when preceded by नञ् (अ), दुस्, and सु.

सीता जाया यस्य स **सीताजानिः** (Râma)—(7) जाया is

॰ compound.

ऽधन्वा one

the end of a

ि; but परमः स्वः

f a बहु॰ धर्म is

single word.

द्विपाद्—(9) पाद

numeral. चतुष्पदः

the भ base of these

यस्य स **उद्गन्धिः**;

स्य स **पद्मगन्धिः**—

anged to गन्धि,

rid), सु, सुरभि, or

of comparison.

तरद्वन्द्व and समा-

. are instances

each member

ly.

अम्बर, but one whose garment is yellow. It is thus अन्यपदार्थ-प्रधान, *i. e.*, a compound in which the sense of a word other than the members of the compound is predominant.

समासान्तप्रत्यय—सस्त्रीकः; सवधूकः; बहुकर्तृकः—(1) When the final member of a बहु० compound ends in ऋ or is a f… in ई or ऊ, क is added
to th… gene-
ally …

एक… द्वित्राः
(use… त्वारो वा
पञ्च… सन्ति ते
उप… कविंशाः;
त्रिंश… चत्वारिं-
शतो… of a
nu… linable,
or… बहु०. In
th… nsonant
w… अ added.
विं… All these
c…

…hting by
c… दं प्रवृत्तमिति
… mpounds
… vel of the
… ends in इ.
… d signifies

कमले इवाक्षिणी यस्य स कमलाक्षः; हरिणस्याक्षिणी इवाक्षिणी यस्याः सा हरिणाक्षी—(5) At the end of a बहु० compound अक्षि is changed to अक्ष (*f.* अक्षी).

नास्ति प्रजा यस्य सोऽप्रजाः; दुष्टा मेधा यस्य स दुर्मेधाः; शोभना प्रजा यस्य स सुप्रजाः—(6) प्रजा and मेधा are changed to प्रजस् and मेधस् when preceded by नञ् (अ), दुस्, and सु.

सीता जाया यस्य स सीताजानिः (Râma)—(7) जाया is changed to जानि at the end of a बहु० compound.

ज्यामधिरूढमधिज्यम्। अधिज्यं धनुर्यस्य सोऽधिज्यधन्वा one whose bow is strung)—(8) धनुस् at the end of a बहु० is changed to धन्वन्.

कल्याणो (beneficial) धर्मो यस्य स कल्याणधर्मा; but परमः स्वः धर्मो यस्य स परमस्वधर्मः—At the end of a बहु० धर्म is changed to धर्मन्, when preceded by a single word.

शोभनौ पादौ यस्य स सुपाद्; द्वौ पादौ यस्य स द्विपाद्—(9) पाद is changed to पाद् when preceded by सु or a numeral. चतुष्पदः *Acc. Plu.*, चतुष्पदाम् *Gen. Plu.*—In declension the भ base of these words ends in पद्.

शोभनो गन्धो यस्य स सुगन्धिः; उद्गतो गन्धो यस्य स उद्गन्धिः; सुरभिर्गन्धो यस्य स सुरभिगन्धिः; पद्मस्येव गन्धो यस्य स पद्मगन्धिः—(10) गन्ध at the end of a बहु० is changed to गन्धि, when it is preceded by उद्, पूति (putrid), सु, सुरभि, or when the compound has the sense of comparison.

द्वन्द्व—There are two varieties, इतरेतरद्वन्द्व and समाहारद्वन्द्व. रामलक्ष्मणौ, हरिहरौ, युधिष्ठिरार्जुनौ, &c. are instances of इतरेतरद्वन्द्व, a kind of द्वन्द्व, in which each member of the compound is viewed separately.

पाणिपादम् (पाणी च पादौ च तयोः समाहारः); **रथिकाश्वारोहम्** (a charioteer and a horse-man); **मार्दङ्गिकपाणविकम्** (one who plays upon a मृदङ्ग, a kind of drum and one who plays upon a पणव, a kind of drum); **यूकालिक्षम्** (यूका–a louse and लिक्षा-its egg); and **अहिनकुलम्** (a serpent and a mungoose) are instances of समा० द्वन्द्व—The compound of words signifying members of an animal body, or of an army, or of a musical instrument, insignificant creatures, or animals between which there is natural antipathy is समा० द्वन्द्व. समाहार means a collection. इतरेतरद्वन्द्व is not allowed in such cases. पाणिपादौ is thus not allowed. समाहारद्वन्द्व is *neuter* and *singular*. In this, members of the compound are viewed collectively or as one.

देवताद्वन्द्व—मित्रश्च वरुणश्च **मित्रावरुणौ**; सूर्यश्च चन्द्रमाश्च **सूर्याचन्द्रमसौ**; **अग्नीषोमौ** (अग्निश्च सोमश्च); **अग्नीवरुणौ** (The ending vowel of the पूर्वपद is lengthened). This is a द्वन्द्व of words signifying deities.

In इतरेतरद्वन्द्व, the sense of both the members is predominant, but in समाहारद्वन्द्व, the sense of collection is predominant.

एकशेष—माता च पिता च **पितरौ**; भ्राता च स्वसा च **भ्रातरौ**; पुत्रश्च दुहिता च **पुत्रौ**; हंसी च हंसश्च **हंसौ**; श्वश्रूश्च श्वशुरश्च **श्वशुरौ**. Of two members of a compound only one is left to express the sense of both. It is therefore called एकशेष.

अलुक्समास—युधिष्ठिरः; परस्मैपदम्; आत्मनेपदम्; विशांपतिः;

सरसिजम्; &c.—The case-ending of the पूर्वपद is not dropped, so the compound is called अलुक्समास.

स्वर्गस्य पन्थाः स्वर्गपथः; रम्यः पन्था यस्य स रम्यपथो देशः (पथिन् is changed to पथ at the end of a compound); विष्णोः पूः विष्णुपुरम्; राज्यस्य धूः राज्यधुरा (पुर् and धुर् take अ).

पृषोदरादि—पृषतः (of a water-drop) उदरं पृषोदरम् or पृषत् उदरं यस्य तत् पृषोदरम् (the wind); मनसः ईषिणः (thinkers) मनीषिणः (the learned); वारीणां वाहकः वलाहकः (a cloud)—In some compounds the पूर्वपद has some of its letters dropped. Such irregular compounds are placed under this class.

धृतधनुः—धृतं धनुर्येन स धृतधनुः. The समासान्त terminations are अनित्य, *i. e.*, they are sometimes not added; "स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्."

सुप्सुप्समास—पूर्वं भूतः भूतपूर्वः; पूर्वं दृष्टः दृष्टपूर्वः—A compound which cannot be classed under अव्य०, तत्पु०, बहु०, or द्वन्द्व is called सुप्सुप्समास. Here one सुबन्त (a word ending in सुप्, *i. e.*, a case-ending) is compounded with another सुबन्त.

संदेहदोलाधिरूढं मे चेतः।

न शक्नोमि भवन्तं विना क्षणमप्यवस्थातुमेकाकी। कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपद उत्सृज्य प्रयासि।

सखे ! नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चन प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि।

अहह ! हृदयमर्मच्छिदः खल्वमी कथोद्घाताः।

किमपि वक्तुकामोऽस्मि।

वत्स! कथय किमप्यन्यचेतसा मया नावधारितं किमनयोक्तमिति। अन्तरेणापि शब्दप्रयोगं बहवोऽर्था गम्यन्तेऽक्षिनिकोचैः पाणिविहारैश्च।

वक्ता कश्चिदाश्वभिधायी भवति। आशु वर्णानभिधत्ते। कश्चिच्चिरेण। कश्चिच्चिरतरेण। तद्यथा। तमेवाध्वानं कश्चिदाशु गच्छति। कश्चिच्चिरेण गच्छति। कश्चिच्चिरतरेण गच्छति। रथिक आशु गच्छत्यश्वश्चिरेण पदातिश्चिरतरेण।

गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात् पादोपसंग्रहणाच्च। यदि च गुरुपुत्रोऽपि गुरुर्भवति तदपि कर्तव्यं भवति।

अतिमहदिदमाश्चर्यमाख्यातव्यम्। अल्पशेषमहः। प्रत्यासीदति च नः स्नानसमयः। तदुत्तिष्ठन्तु भवन्तः। सर्व एवाचरन्तु यथोचितं दिवसव्यापारम्। अपराह्णसमये भवतामादितः प्रभृति सर्वमावेदयामि योऽयं यच्चानेन कृतमपरस्मिञ्जन्मनीह लोके यथास्य संभूतिः।

तद्गुणोऽतद्गुणश्चेति बहुव्रीहिर्द्विधा मतः।
लम्बकर्णश्च कर्णाटो दृष्टसागरपूरुषः॥
अहो दुरासदोऽयं राजमहिमा। तथा हि
न च न परिचितो न चाप्यगम्य-
श्चकितमुपैमि तथापि पार्श्वमस्य।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः॥
बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
*त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥

Oh! how beautiful this island within the ocean is!

Stay here for three or four days. I shall mean-while try to accomplish your object.

---

* In thee, *i. e.*, the Supreme Being.

The protection of the distressed is but proper for you who imitate the actions of your predecessors.

Oh! it is morning. I should get up early. Or what shall I do, getting up early? My hand and feet do not work.

The king who had returned from the chase took rest on the bank of the Godâvarî and his fatigue was destroyed by breezes coming from the river.

My mind was diverted, so I did not hear what you said.

A friend who does not advise the king properly is a bad friend.

When the king whose bow was strung and who had long arms and a broad chest, entered the battle-field, his enemies at once submitted to him.

Nouns

अर्णव (अर्णवः) *m.*–An ocean.

आगम (आगमः) *m.*–A Śâstra; a sacred work.

उपसंग्रहण (उपसंग्रहणम्) *n.*–The act of catching or pressing gently.

ओघ (ओघः) *m.*–A collection.

कथोद्घात (कथोद्घातः) *m.*–The narration or commencement of a story.

कर्णाट (कर्णाटः) *m.*–An inhabitant of the Karṇâṭaka.

दोला *f.*–A swing.

निकोच (निकोचः) *m.*–Contraction.

पदाति *m.*–A foot-soldier.

रथिक (रथिकः) *m.*–One going in a chariot.

विहार (विहारः) *m.*–Sport; movement.

व्यापार (व्यापारः) *m.*–Work; movement.

संभूति *f.*–Birth.

Adjectives

अधिरूढ (*p. p.* of अधि+रुह् 1*st Par.*)–Grown.

अनुरूप–Proper.

अल्पशेष (बहु०, अल्पो भागः शेषो यस्य तद्)–With a small portion left.

अवधारित (*p. p.* of अव+धृ 10*th Par.*)–Thought.

उच्छिष्ट (*p. p.* of उद्+शिष् 7*th Par.*)–Left as a remainder.

एकाकिन्—Alone.
क्षुण्ण (*p. p.* of क्षुद् 7*th Ubh.*)-[Trodden.
क्षुद्र-Mean.
जाह्नवीय-Of the Ganges.
दुरासद-Inaccessible.
प्राकृत-Ordinary.
मर्मच्छिद् (मर्मन् *n.*-The vitals)-Piercing the vitals.
*विक्लवीभवत्—Being overpowered by grief.

Roots

आ+विद् (*Cau.*)-To relate; to communicate.
प्रति+आ+सद् [सीद्] (प्रत्यासीदति) (1*st*, 6*th Par.*)-To come near.
प्र+या (प्रयाति)-(2*nd Par.*)-To [go.

Indeclinables

अहह-Oh ! (It signifies sur-[prise.)
आशु-Qnickly.
एकपदे-All at once.
चकितम् (*p. p.* of चक् 1*st Ubh.*)-With fear and wonder.
पार्श्वम् (पार्श्व *m.*, *n.* A side)-On a side.
प्रभृति-Beginning with.

LESSON XXXIV

The Kârakas

The senses of cases have been given in Les. VI. Their uses in connection with certain verbs and prepositions have also been dealt with in vocabularies and foot-notes of the preceding lessons. The subject is treated here in one lesson and at greater length for the facility and convenience of students.

All the cases except the genitive are called कारकविभक्ति's; because they are connected with verbs. The genitive is not thus connected. It has the sense of an adjective and is therefore called विशेषणविभक्ति.

---

* विक्लवीभवति—न विक्लवो विक्लवो यथा संपद्यते तथा भवतीत्यर्थः, becomes like one over-powered. The sense is that of अभूततद्भाव, the being the one denoted by the base. In this sense ई is added to a noun or an adjective and the forms of कृ, भू, or अस् are added.

१ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।२।३।४६।।

प्रथमा—The nominative is simply the naming case. It has the sense of a नाम or प्रातिपदिक, the crude form. In the active voice, the sense of the agent is expressed by the verb and so the nominative case, though it is the subject, is not said to have the sense of the agent; for the agent or कर्ता is अभिहित, *i. e.*, expressed by the verb.

The following are the senses of the Nom.:—

1. माणवकः पुस्तकं लिखति—प्रातिपदिकार्थ, नामार्थ, or निर्देशार्थ, *i. e.*, the sense of the crude form. The construction is कर्तरि or active and the agent or कर्ता is अभिहित or expressed by the verb.

2. द्रोणो व्रीहिः—परिमाण or measure. Here द्रोणः means द्रोणपरिच्छिन्नः, measured by a measure called द्रोण (द्रोणो व्रीहिः = A droṇa of rice).

3. एहि देवदत्त—संबोधन. संबोधने च।२।३।४७।।

द्वितीया—अनभिहित कर्म is the sense of the *Acc.* In the passive (कर्मणि) construction the sense of the object is expressed by the verb. The object is therefore used in the *Nom.*

कर्तुरीप्सिततमं कर्म।१।४।४९।।
कर्मणि द्वितीया।२।३।२।।

1. माणवको ग्रन्थं लिखति—Here the construction is कर्तरि. The verb does not express the sense of the object. कर्म is thus अनभिहित or unexpressed by the verb. The *Acc.* therefore expresses this sense. माणवकेन ग्रन्थो लिख्यते—the construction is कर्मणि, कर्म is अभिहित by लिख्यते. The *Acc.* has not therefore to express it. ग्रन्थः is consequently put in the *Nom.* in the sense of a प्रातिपदिक.

विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्—Here the indeclinable **असाम्प्रतम्** means **न युज्यते** (is not proper). It thus expresses the sense of the object and **विषवृक्षः** is therefore in the *Nom.*

Similarly, वदन्त्यपर्णेति च तां पुराविदः—तामपर्णेति (तामपर्णा इति) वदन्ति (अपर्णा=Pârvatî; so called because she fasted and did not eat even a leaf).

Here **इति** expresses the sense of the object, hence **अपर्णा** is in the *Nom.* **तामपर्णां वदन्ति** when **इति** is omitted.

पण्डितं मूर्खं इति मन्यते or **पण्डितं मूर्खं मन्यते.**

स्वयमेव दृश्यन्ते दुष्टजनदोषाः-Such a construction is called **कर्मकर्तरि.** Here the object **दोष** is intended to be both **कर्ता** and **कर्म.** The sense is:—The faults are not seen by any one; they are seen by themselves.

2. **दुह्, याच्**, &c. are **द्विकर्मक** roots (*Vide foot-note p.* 164). All the roots having the sense of these roots take two objects.

गां दोग्धि पयः; व्रजमवरुणद्धि गाम्; माणवकं मार्गं पृच्छति; पौरवं गां भिक्षते याचते वा; पुत्रं धर्मं ब्रूते अनुशास्ति वा; वृक्षमवचिनोति फलानि; अजां ग्रामं नयति-हरति-वहति-कर्षति वा; तण्डुलानोदनं पचति; शतं मुष्णाति देवदत्तम्; &c.

In these instances one object is **प्रधान** or primary and the other is **गौण** or secondary. **पयः, गाम्, मार्गम्, गाम्, धर्मम्, फलानि, अजाम्, ओदनम्,** and **शतम्** are respectively **प्रधान** objects; the rest are **गौण**. In **तण्डुलानोदनं पचति, पचति** means **निर्वर्तयति** (causes **ओदन** to be brought about from **तण्डुल**). **ओदन** is therefore **प्रधान कर्म.**

गां दोग्धि पयः—गौर्दुह्यते पयः; वृक्षमवचिनोति फलानि—वृक्षोऽवचीयते फलानि; अजां ग्रामं वहति—अजा ग्राममुह्यते—

3. In the passive construction the primary object of **नी, हृ, कृष्,** and **वह्** and the secondary object of the rest of the **दुहादि**'s is **अभिहित** or expressed by the verb and therefore put in the *Nom.*, the other object, being **अनभिहित**, is put in the *Acc.*

The following are the rules for the causal construction:—

हरिः पुस्तकं लिखति (अण्यन्तरचना; णिच् or णि is given as the causal termination by Pâṇini; ण्यन्तरचना=Causal construction and अण्यन्तरचना=Primitive construction).

माणवको हरिणा पुस्तकं लेखयति–ण्यन्तरचना or *Cau.* construction. माणवकः is called हेतुकर्ता (The Causal Agent).

माणवकेन हरिः पुस्तकं लेख्यते—ण्यन्त कर्मणि or *Cau. Pas.*

4. The subject in the primitive construction takes the *Inst.* case in the causal construction.

गच्छति भृत्यो ग्रामम्। गमयति भृत्यं ग्रामं राजा। गम्यते भृत्यो ग्रामं राज्ञा।; देवा अमृतमश्नन्ति। हरिर्देवानमृतमाशयति। हरिणा देवा अमृतमाश्यन्ते।

शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम्॥
आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः*॥

दर्शयति हरिं भक्तान्।—

5. In the case of verbs signifying motion, knowledge, eating, or a literary work, and in the case of intransitive roots, the subject of the primitive construction is used in the *Acc.* and not in the *Inst.* in the causal construction. The above verses contain all instances of the rule. दृश् follows the same construction.

नाययति वाहयति वा भारं भृत्येन। हारयति कारयति वा भृत्यं भृत्येन वा कटम्।—

हृक्रोरन्यतरस्याम् (१।४।५३)

9. In the causal construction of नी and वह्, the subject of the primitive construction is put in the *Inst.*; while in the causal construction of कृ and हृ, it is put in the *Acc.* or the *Inst.* नीवह्योर्न. वा०

बोध्यते माणवकं धर्मः। बोध्यते माणवको धर्ममिति वा। भोज्यते ब्राह्मण ओदनम्। भोज्यते ब्राह्मणमोदन इति वा। शिष्यो वेदमध्याप्यते। शिष्यं वेदोऽध्याप्यत इति वा।—

---

* That venerable Hari who caused enemies to go to heaven, his own kinsmen to know the sense of the Vedas, gods to eat nectar, Brahmâ to study the Vedas, and the earth to sit in water—that Hari is my resort.

16

7. There are two constructions as above in the case of roots having the sense of knowledge, or eating, or having a literary object.

उपवसति-अनुवसति-अधिवसति-आवसति वा वैकुण्ठं हरिः। (*Vide* p. 113 foot-note).

अन्तरा त्वां मां च कमण्डलुः। अन्तरेण हरिं न सुखम्। (*Vide* p. 146 Vocab.).

अधिशेते-अधितिष्ठति-अध्यास्ते वा वैकुण्ठं हरिः। (*Vide* p. 122 foot-note).

हा कृष्णाभक्तम्। बुभुक्षितं (to a hungry man) न प्रतिभाति किंचित्। (हा and प्रति govern the *Acc.*).

धिग् जाल्मान्। धिक् कृष्णाभक्तम्। (*Vide* p. 54 Vocab.).

(धिगर्थाः कष्टसंश्रयाः। धिगियं दरिद्रता। धिङ् मूर्ख। (धिक् is thus used with the *Acc.*, the *Nom.*, or the *Voc.*).

मासमधीते-क्रोशं कुटिला (अत्यन्तसंयोगवाचक)—

8. Words signifying duration of space or time are used in the *Acc.* This is called अत्यन्तसंयोग—close relation of क्रिया to काल or स्थल.

तृतीया—It has the sense of the Agent or the Instrument of action.

प्रकृत्या चारुः; प्रायेण याज्ञिकः; गोत्रेण गार्ग्यः; समेनैति (समेन मार्गेणैतीत्यर्थः); विषमेणैति।

अक्ष्णा काणः। कर्णेन बधिरः। पादेन खञ्जः। पुत्रेण सह सार्धं साकं वा गतः पिता।—

1. The *Inst.* is used in instances like the above.

पुण्येन दृष्टो हरिः। अध्ययनेन वसति।—

2. The *Inst.* signifies हेतु or cause.

अलं महीपाल तव श्रमेण (श्रमेण न किमपि साध्यमित्यर्थः)। अलमतिविस्तरेण। कृतं प्रयत्नेन।—

3. अलम् and कृतम् in the sense of 'enough' govern the *Inst.* Here साधनक्रिया (the act of accomplishment) is to be inferred or understood (गम्यमान) and श्रम is its करण.

1. इत्थंभूतलक्षणे ।२।३।२१।। 2. कर्मणा यमभिप्रैति स संप्रदानम् ।१।
४।३२।। 3. चतुर्थी संप्रदाने ।२।३।१३।। 4. तादर्थ्ये चतुर्थी वाच्या (वा०)

जटाभिस्तापसः; श्वेतच्छत्रेण राजानमपश्यत्; कमण्डलुना छात्रः—

4. This is called लक्षणतृतीया; because the *Inst.* shows the characteristics with which a person is marked (जटाभिर्ज्ञाप्यस्तापसः, one known to be an ascetic from his matted hair).

चतुर्थी—The Dative is used in the sense of संप्रदान and तादर्थ्य (तस्मै इदं तदर्थं तदर्थस्य भावस्तादर्थ्यम्, purpose). संप्रदान is the person to whom something is given or in reference to whom some action is done; *e. g.*, विप्राय गां ददाति; युद्धाय संनह्यते (becomes ready, puts on an armour); राज्ञे करमर्पयति; शिष्याय शास्त्रमुपदिशति गुरुः; अतिथये पाद्यमुपनयति (पाद्यम्=water for washing the feet).

हरये रोचते भक्तिः। यज्ञदत्ताय स्वदतेऽपूपः। (अपूपः=A cake mixed with sugar)—Here the person who is pleased (प्रियमाण) is called संप्रदान.

रुच्यर्थानां प्रीयमाणः । रुच्यर्थानां प्रीयमाणः ।

हरये क्रुध्यति-कुप्यति-द्रुह्यति-ईर्ष्यति-असूयति वा; but क्रूरमभिक्रुध्यति-अभिद्रुह्यति वा—Verbs, having the sense of anger (क्रोध), injury or malice (द्रोह), envy (ईर्ष्या), and fault-finding (असूया), govern the *Dat.* of the person against whom anger is directed; but क्रुध् and द्रुह्, when they are preceded by a preposition, govern the *Acc.*

भक्तिर्ज्ञानाय कल्पते संपद्यते जायते वा ॥ (*Vide p.* 62 Vocab.).

देवदत्ताय गां प्रतिशृणोति आशृणोति वा (promises).

प्रतिश्रु and आश्रु govern the *Dat.*

फलेभ्यो याति (फलान्याहर्तुं यातीत्यर्थः). Mark the use of the *Dat.*

यागाय याति (यष्टुं यातीत्यर्थः)—तादर्थ्ये चतुर्थी, the *Dat.* signifying purpose.

नमो भगवते वासुदेवाय। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा (a word used in offering oblations to the manes);

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ।२।३।१६।।

1. ध्रुवमपायेऽपादानम् ।१।४।२८।। २. अपादाने पञ्चमी ।२।३।२८।।

दैत्येभ्यो हरिरलम् (समर्थः प्रभुर्वा); वषट् (a word pronounced in making an oblation to a deity) इन्द्राय ।

ग्रामं ग्रामाय वा गच्छति—Verbs implying motion govern the *Acc.* or the *Dat.*; but पन्थानं गच्छति—if the place to which motion is directed is a way, the *Acc.* alone is used; मनसा हरिं व्रजति—if actual motion is not meant, then too the *Acc.* alone is used.

उपपदविभक्ति—The case connected with indeclinables like नमः is called उपपदविभक्ति as distinguished from कारकविभक्ति. The verb is the principal word in a sentence. Other words are उपपद's or गौणपद's. कारकविभक्ति is used in preference to उपपदविभक्ति (उपपदविभक्तेः कारकविभक्तिर्बलीयसी); *e. g.*, नृसिंहं नमस्करोमि (Here नमः requires चतु०, and करोमि, द्विती०; चतु०, is an उप० विभ०, and द्विती०, a कार० विभ०; therefore द्विती० is used).

An expression like नृसिंहाय नमस्करोमि may be explained as नृसिंहमनुकूलं कर्तुं नमस्करोमि. It will thus be like फलेभ्यो याति.

भक्ताय धारयते मोक्षं हरिः (हरि is अधमर्ण—a debtor and भक्त, उत्तमर्ण–a creditor). धृ in the sense of 'to owe' governs the *Dat.*

पुष्पेभ्यः स्पृहयति; but, if the desire is very strong, पुष्पाणि स्पृहयति.

न त्वां तृणाय मन्ये—I do not consider thee worth even a straw.

पञ्चमी—It is used in the sense of अपादान (that from which any thing is separated physically or mentally) and हेतु.

चौराद्बिभेति । चौरात् त्रायते । अध्ययनात् पराजयते (ग्लानो भवति, becomes disgusted) । यवेभ्यो गां वारयति । मातुर्निलीयते कृष्णः । कृष्ण उपाध्यायादधीते । ब्रह्मणः प्रजाः प्रजायन्ते । हिमवतो गङ्गा प्रभवति । तिलेभ्यः प्रतियच्छति माषान् ।

पृथग् रामेण रामाद्रामं वा । विना रामेण रामाद्रामं वा ।

प्रासादात् प्रेक्षते (प्रासादमारुह्य प्रेक्षते); आसनात् प्रेक्षते (आसन उपविश्य प्रेक्षते); माथुराः पाटलिपुत्रकेभ्य आढ्यतराः (an adj. in the comparative degree governs the *Abl.*).

अन्यो भिन्न इतरो वा कृष्णात् ।

आ मुक्तेः संसारः (आ=up to, exclusive of. It signifies मर्यादा)। आ मूलाच्छ्रोतुमिच्छामि(आ=from, inclusive of. It signifies अभिविधि or आरम्भ).

मर्यादा and अभिविधि—तेन विनेति मर्यादा। तेन सहेत्यभिविधिः ।

भवात् प्रभृति आरभ्य वा सेव्यो हरिः ।

ऋते कृष्णात् । ऋतेऽपि त्वां न भविष्यन्ति सर्वे । ऋते वाताद्वातं वा वृक्षः पतति । रामादृते धनुर्धरो न।—ऋते governs the *Abl.* and is sometimes found with the *Acc.*

षष्ठी—It signifies संबन्ध or relation.

किं निमित्तं वसति । केन निमित्तेन, कस्मै निमित्ताय, &c.—All the cases are used with निमित्त and its synonyms.

नृणां नृषु वा द्विजः श्रेष्ठः—निर्धारणषष्ठी or निर्धारणसप्तमी (*Vide* p. 215).

रुदति (पुत्रादिके) रुदतो (पुत्रादिकस्य) वा प्राव्रजत्—Notwithstanding that (his) son &c. were crying, he turned a recluse. This is अनादरषष्ठी or अनादरसप्तमी, the sense being रुदन्तं पुत्रादिकमनादृत्य.

मातुः स्मरति बालः । मातरं स्मरति वा (स्मृ governs the *Gen.* or the *Acc.*).

राज्ञां मतो बुद्धः पूजितो वा (Here the Past Part. has the sense of the Present Part.). Cf. "अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।" रघुवंश ८–८. महीपतेः=महीपतिना.

तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा ।

दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते; दक्षिणेन ग्रामं ग्रामस्य वा; उत्तरेण ग्रामं ग्रामस्य वा—दक्षिणेन and उत्तरेण are indeclinables ending in एन and govern the *Acc.* or the *Gen.*

सप्तमी—It signifies अधिकरण or place.

गोषु दुह्यमानासु गतः—सतिसप्तमी or the *Loc. Absolute.*

प्रसित उत्सुको वा हरिणा हरौ वा । प्रसितः=उत्सुकः.

अयि वत्स ! कृतं कृतमतिविनयेन । अनेकवारमपरिश्रथं परिष्वजस्व माम् ।

कुशलवौ भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च । वृत्तचूडौ च त्रयीवर्जमितरा विद्याः सावधानेन परिपाठितौ । समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ ॥

हा देव । एष मया विनाहमप्येतेन विनेति स्वप्नेऽपि केन संभावितमासीत् । तन्मुहूर्तकमपि जन्मान्तरत इव लब्धदर्शनं बाष्पसलिलान्तरेषु प्रेक्षे तावद्वत्सलमार्यपुत्रम् ॥

अनया कालकलया सुदूरमुपक्रान्तः स पापकृदिति मनसिकृत्य तरुमूलान्निष्क्रम्य सलिलसमीपं सर्तुं प्रयत्नमकरवम् ।

सा तु प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च निःश्वस्य शनैः प्रत्यवदत् । राजपुत्र ! किमनेनातिनिर्घृणहृदयाया मम मन्दभागिन्याः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन । तथापि यदि महत् कुतूहलं तत् कथयामि । श्रूयताम् ।

अतिकष्टास्वप्यवस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति प्राणिनां वृत्तयः । नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम् । एवमुपरतेऽपि सुगृहीतनाम्नि ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि । धिङ् मामकरुणमतिनिष्ठुरमकृतज्ञम् । उपकृतमपि नापेक्षते खलं हि खलु मे हृदयम् ॥

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥

चिरं जीव चिरं नन्द चिरं पालय मेदिनीम् ।
चिरमाश्रितलोकानां पूरय त्वं मनोरथान् ॥

कमलभूतनया मुखपङ्कजे
वसतु ते कमला करपल्लवे ।
वपुषि ते रमतां कमलाङ्गजः
प्रतिदिनं हृदये कमलापतिः ॥

Instruction to a fool simply goes to (क्लृप्) increase his folly. It does not make him wise.

Oh! fie! A very unpleasant thing has happened. Śakuntalâ has offended some very venerable sage.

What else than fire is competent to burn a person ?

A scorpion is produced from cow-dung.

I do not know how clever the prince has become by this time.

A mean person does not heed obligation done to him by another.

Pre-eminent is the conduct of good men who always speak the truth and who never go by the way trodden upon by low men.

Râma caused Nala to make a bridge on the ocean to go to Lankâ (Use the *Active* and also the *Passive* cons.).

Do not interrupt him, please. I am very anxious to hear the story from the very beginning.

Nouns

उपकृत (उपकृतम्) *n.* (*p. p.* of उप+कृ 8*th* *Ubh.*)–An obligation.

कमलभू *m.*–Brahmâ (Born of a lotus on the navel of Vishṇu).

कमलभूतनया *f.*–Sarasvatî, daughter of Brahmâ.

कमला *f.*-Lakshmî.

कमलाङ्गज (अङ्गज *m.*-A son) *m.*-A son of Lakshmî, Pradyumna.

करपल्लव (कर+पल्लव *m.*, *n.*) *m.*, *n.*-A hand as tender as a leaf.

कल्प (कल्पः) *m.*-A ceremony.

कालकला *f.*-A digit of time; a very short time.

चूडा *f.*-The ceremony of removing hair.

जीवित (जीवितम्) *n.* (*p. p.* of जीव् 1*st Par.*)-Life.

धात्री *f.*-A nurse.

परिचय (परिचयः) *m.* Familiarity.

बाष्प (बाष्पः-ष्पम्) *m.*, *n.*-A tear.

रस (रसः) *m.*-Feeling; affection.

रहस्य (रहस्यम्) *n.*-A secret.

वल्कलोपान्त (वल्कल *m.*, *n.*-A bark + उपान्त *m.*-An end)-An end of a bark-dress.

वृत्ति *f.*-Mental condition.

वृश्चिक (वृश्चिकः) *m.*-A scorpion.

वैराग्य (वैराग्यम्) *n.*-Disgust for worldly pleasures.

Adjectives

अकृतज्ञ-One who does not appreciate the favour done to him.

अतिकष्ट-Very woful.

अतिनिष्ठुर-Very hard-hearted; very cruel.

अध्यापित (*p. p.* of the *Cau.* of अधि+इ 2*nd Âtm.*)-Taught.

अनवगीत (अन्+अवगीत, *p. p.* of अव+गै 1*st Par.*)-Uncensurable.

अनुपधि-Guileless (उपधि *m.*-Fraud).

अभिमत (*p. p.* of अभि+मन् 4*th Âtm.*)-Dear.

अविकल-Unoverpowered by feelings; untouched.

अविपर्यासित-(अ+विप० *p. p.* of the *Cau.* of वि+परि+अस् 4*th Par.*)-Unchanged.

उपक्रान्त (*p. p.* of उप+क्रम् 1*st Âtm.*, 4*th Par.*)-Gone.

उपरत (*p. p.* of उप+रम् 1*st Ubh.*)-Dead.

कल्याणिन्-Wishing the good of others.

क्षात्र-Pertaining to a Kshatriya.

गर्भैकादश-Eleventh from conception.

निरपेक्ष-Without desire, regardless.

परिपाठित (*p. p.* of the *Cau.* of परि+पठ्)-Taught.

पापकृत्-Sinful.

प्रियप्राय (*f.* प्रियप्राया) (बहु०; प्रिय +प्राय *m.*-A great part)-Mostly such as is liked; for the most part pleasant.

मन्दभागिन्–Unfortunate.
मसृण–Sweet; affectionate.
संभावित (*p.p.* of सम्+भू, *Cau.*)–Thought of; conceived.
सुगृहीतनामन्–(बहु०)–Of auspicious name.
विशुद्ध (*p. p.* of वि+शुध् 4*th Par.*)–Very holy.

Roots

अप+मृज् (अपमार्ष्टि) (2*nd Par.*)–To wipe away.
उप+नी (उपनयति-ते) (1*st Ubh.*)–To invest a person with the sacred thread.
नन्द् (नन्दति) (1*st Par.*)–To be pleased.
निष्क्रम् (निष्क्रामति-म्यति) (1*st* and 4*th Par.*)–To get out.
परि+स्वञ्ज् (परिष्वजते) (1*st Âtm.*)–To embrace.
प्र+क्षल् (प्रक्षालयति) (10*th Par.*)–To wash.
मनसि कृ (8*th Ubh.*)–To think.

Indeclinables

अपरिश्लथम्–Not loosely; tightly; very closely.
अनेकवारम्–Very often.
उष्णम्–Hotly.
कृतम्–Enough.
तत्–Then.
त्रयीवर्जम् (त्रयी *f.* The three Vedas; तत्पु०, क्रियाविशे०)–Except the three Vedas.
दीर्घम्–Long.
पश्चात्–Behind.
पुरः–In front.
प्रभृति–Beginning (ततः प्रभृति= Thenceforth).
मुहुः–Frequently.
वस्तुतः–Really speaking.
समनन्तरम्–Afterwards.
सावधानेन–(अव्य०, अवधानेन सहितं यथा स्यात् तथा)–Attentively.
सुदूरम्–Very far.

LESSON XXXV

THE FUTURE AND THE CONDITIONAL

न जाने प्रातःकाले किं भविष्यति—I do not know what will take place in the morning.

शत्रून् विजेष्ये वा मरिष्यामि वा–I will conquer enemies or die.

सुवृष्टिश्चेदभविष्यद् दुर्भिक्षं नैव समपत्स्यत–If there had been good rain, famine would not certainly have happened.

अथ धर्मं व्याख्यास्यामः कृत्स्नं धर्मं व्याख्यास्याम इति यावत्—The whole duty, we shall explain, the whole duty, we shall explain, that is=अथ धर्मं व्याख्यास्यामः means कृत्स्नं धर्मं व्याख्यास्यामः—We shall explain the whole duty. The words इति यावत् are used in the sense of 'that is', 'in other words'.

अथ भगवान् कुशली काश्यपः। अत्र प्रश्नार्थोऽथशब्दः। "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरात्—What, His Reverence, happy, Kâśyapa. Here, having the sense of a question, the word अथ. In the sense of 'auspiciousness', 'immediately after,' 'a beginning,' 'a question,' and 'entirety,' अथो and अथ are used,so,from the Amarakośa=Is His Reverence Kâśyapa happy ? In this sentence, the word अथ has the sense of a question; because according to the Amarakośa the words अथो and अथ have the sense of 'auspiciousness,' 'immediately after,' 'a beginning,' 'a question,' and 'entirety.'

अह्ना क्रोशेन वानुवाकोऽधीतो मया। तेन तु मासमधीतो नायातः—A chapter of the Vedas was studied by me (successfully) in one day or while going over one Krośa (2 miles); while he studied it for one month, but could not master it.

The declensional forms of अहन् are as under:—

प्र० द्वि० सं०	अहः	अह्नी—हनी	अहानि
तृ०	अह्ना	अहोभ्याम्	अहोभिः
सं०	अह्नि—हनि	अह्नोः	अहःसु—अहस्सु

Mark the form अहः. The पद base of अहन् is अहः. (*Vide* अहोभ्यां &c.).

Mark the construction. When an action is accomplished the *Inst.* is used (अह्ना क्रोशेन वा); otherwise, the *Acc.* (मासम्).

This lesson illustrates the two Futures and the Conditional.

The tenses and the moods treated up to now are called conjugational tenses and moods; because in them the conjugational sign has to be added to roots or the conjugational change like the reduplication of a root has to be made. The tenses and the mood that are treated in this and the following lessons are called non-conjugational tenses and mood. It is not necessary to know the conjugation of a root in making up their forms.

Before non-conjugational terminations beginning with any consonant except य्, some roots take the augment इ, some do not take it, while others take it optionally. Those that take इ are called सेट् (स+इट्, with इ), those that do not take it are called *अनिट् (अन्+इट्, without इ), while those that take it

---

* *Aniṭ* roots are given in the following two *Kârikâs*. The first contains roots ending in a vowel, while the second, those ending in a consonant.

(अ) ऊदृदन्तैर्यौति रु, क्ष्णु, शीङ्, स्नु, नु, क्षु, श्वि, डीङ्, श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥ १ ॥

Among roots ending in a vowel (अच्=a vowel) those of one vowel excepting such as end in ऊत् (ऊ) and ऋत् (ऋ), यु, रु, क्ष्णु, शी (*Âtm.*, ङ् indicating *Âtm.*), स्नु, नु, क्षु, श्वि, डी (*Âtm.*, ङ् indicating *Âtm.*), and श्रि, वृ (*Âtm.*) and वृ (*Ubh.*, ञ् indicating *Ubh.*) are निहत or अनुदात्त. *Ânit* roots have अनुदात्त स्वर (low accent) in the Vedas: the term अनुदात्त or निहत or निवात is therefore equal to अनिट्. Thus among अजन्त roots those that end in ऊ and ऋ, and यु &c. enumerated in the *Kârikâ* are *Seṭ*. The rest with one vowel are *Aniṭ*.

Those that have more than one vowel are *Seṭ*. Derived roots, such as Causals, Desideratives, Frequentatives, and Nominal verbs, are therefore all *Seṭ*.

(का) शक्लृ, पच्, मुच्, रिच्, वच्, विच्, सिच्, प्रच्छि, त्यज, निजिर्, भजः ।

optionally are called वेट्* (वा+इट्, having इ optionally).

भञ्ज्, भुज्, भ्रस्ज्, मस्जि, यज्, युज्, रुज्, रञ्ज्, विजिर्, स्वञ्जि, सञ्ज्, सृजः ॥ २ ॥
अद्, क्षुद्, खिद्, छिद्, तुदि, नुदः, पद्य, भिद्, विद्यतिर्, विनद् ।
शद्, सदी, स्विद्यति, स्कन्दि, हदी, क्रुध्, क्षुधि, बुध्यती ॥ ३ ॥
बन्धिर्, युधि, रुधी, राधिर्, व्यध्, शुधः, साधि, सिध्यती ।
मन्य, हन्नाप्, क्षिप्, छुपि, तप्, तिपस्तृप्यतिदृप्यती ॥ ४ ॥
लिप्, लुप्, वप्, शप्, स्वप्, सृपि, यभ्, रभ्, लभ्, गम्, नम्, यमो, रमिः ।
क्रुशिर्, दंशि, दिशी, दृश्, मृश्, रिश्, रुश्, लिश, विश्, स्पृशः, कृषिः ॥ ५ ॥
त्विष्, तुष्, द्विष्, दुष्, पुष्य, पिष्, विष्, शिष्, शुष्, श्लिष्यतयो, घसिः ।
वसतिर्, दह्, दिहि, दुहो, नह्, मिह्, रुह्, लिह्, वहिस्तथा ॥ ६ ॥
अनुदात्ता हलन्तेपु धातवो द्व्यधिकं शतम् ॥

Among roots ending in a consonant (हल्=a consonant) the 102 roots given in the *Kârikâ* are *Aniṭ*; the rest are *Seṭ*. The order of roots in the *Kârikâ* is guided by the final letter, those ending in क् having been given first, then those ending in च्, and so on. If there are many roots in a class ending in one letter, they are arranged in an alphabetical order. Some roots have इ (as in प्रच्छि), some, ति (विद्यति), and some, a conjugational sign (विनद्, *i. e.*, विद् 7*th* conj.) added to them for the sake of the metre.

Mark the following points:—

1. Roots end either in a vowel (are अजन्त) or a consonant (are हलन्त).
2. Those ending in a vowel are either monosyllabic or pollysyllabic (of one syllable or of more than syllable).
3. Monosyllabic अजन्त roots given in the *Kârikâ* ऊदॄदन्तै॰ are *Seṭ*.
4. Monosyllabic अजन्त roots not given in the *Kârikâ* ऊदॄदन्तै॰ are *Aniṭ*.
5. Pollysyllabic अजन्त roots are all *Seṭ*.
6. हलन्त roots given in the *Kârikâ* शक्लृपच्॰ are *Aniṭ*.
7. हलन्त roots not given in the *Kârikâ* शक्लृपच्॰ are *Seṭ*.

*क्षम्, मृज्, गुह्, गाह्, सिध् (1*st Par.*, To regulate), क्लृप्, स्यन्द्, नश्, त्रप्, द्रुह्, मुह्, स्नुह्, स्निह्, तृप्, दृप्, &c. are *Veṭ* roots.

Generally, the forms themselves will show whether a root is सेट्, अनिट्, or वेट्. *Aniṭ* roots are more in use in literature than *Seṭ* roots. These roots are given in the foot-note on pp. 243–44. They need not be committed to memory by beginners. Those who wish to have a good knowledge of grammar must, however, commit them to memory.

There are two Future tenses. The 1*st* Future is called अनद्यतन or श्वस्तन भविष्यकाल; because it does not signify the future of this day; while the second is called सामान्यभविष्यकाल. अनद्यतन=not of to-day; श्वस्तन=of to-morrow.

The 1*st* Future

	जि *Par.*			कृ *Ātm.*		
1*st p.*	जेतास्मि	जेतास्वः	जेतास्मः	कर्ताहे	कर्तास्वहे	कर्तास्महे
2*nd* ,,	जेतासि	जेतास्थः	जेतास्थ	कर्तासे	कर्तासाथे	कर्ताध्वे
3*rd* ,,	जेता	जेतारौ	जेतारः	कर्ता	कर्तारौ	कर्तारः

The 2*nd* Future

	स्था *Par.*			दा *Ātm.*		
1*st pers.*	स्थास्यामि	स्थास्यावः	स्थास्यामः	दास्ये	दास्यावहे	दास्यामहे
2*nd* ,,	स्थास्यसि	स्थास्यथः	स्थास्यथ	दास्यसे	दास्येथे	दास्यध्वे
3*rd* ,,	स्थास्यति	स्थास्यतः	स्थास्यन्ति	दास्यते	दास्येते	दास्यन्ते
	जि *Par.*			शी *Ātm.*		
3*rd pers.*	जेष्यति	जेष्यतः	जेष्यन्ति	शयिष्यते	शयिष्येते	शयिष्यन्ते

The Conditional

	स्था *Par.*			दा *Ātm.*		
1*st p.*	अस्थास्यम्	अस्थास्याव	अस्थास्याम	अदास्ये	अदास्यावहि	अदास्यामहि
2*nd p.*	अस्थास्यः	अस्थास्यतम्	अस्थास्यत	अदास्यथाः	अदास्येथाम्	अदास्यध्वम्
3*rd p.*	अस्थास्यत्	अस्थास्यताम्	अस्थास्यन्	अदास्यत	अदास्येताम्	अदास्यन्त

1. The terminations are as under:—

The 1*st* Future

	Par.			*Ātm.*		
1*st pers.*	तास्मि	तास्वः	तास्मः	ताहे	तास्वहे	तास्महे
2*nd* ,,	तासि	तास्थः	तास्थ	तासे	तासाथे	ताध्वे
3*rd* ,,	ता	तारौ	तारः	ता	तारौ	तारः

The 2nd Future

	Par.			Âtm.		
1st pers.	स्यामि	स्यावः	स्यामः	स्ये	स्यावहे	स्यामहे
2nd ,,	स्यसि	स्यथः	स्यथ	स्यसे	स्येथे	स्यध्वे
3rd ,,	स्यति	स्यतः	स्यन्ति	स्यते	स्येते	स्यन्ते

The Conditional

	Par.			Âtm.		
1st. pers.	स्यम्	स्याव	स्याम	स्ये	स्यावहि	स्यामहि
2nd ,,	स्यः	स्यतम्	स्यत	स्यथाः	स्येथाम्	स्यध्वम्
3rd ,,	स्यत्	स्यताम्	स्यन्	स्यत	स्येताम्	स्यन्त

जेता, जेष्यति—These terminations are strong. The final vowels and the penultimate short vowels of roots, therefore, take their *guṇa* substitute before them.

	गम् *Par.* The 2nd Future			संगम् *Âtm.* The 2nd Future		
3rd pers.	गमिष्यति	गमिष्यतः	गमिष्यन्ति	संगंस्यते	संगंस्येते	संगंस्यन्ते

हन् *Par.* 3rd pers हनिष्यति &c. — कृ *Par.* करिष्यति &c.

हृ. *Par.* The Condi. 3rd pers. अहरिष्यत् &c. — भृ. *Âtm.* The Condi. अभरिष्यत &c.

Rules:—

3. गम् *Par.*, हन्, and roots ending in ऋ take इ before terminations of the 2nd Future.

4. The X rules that apply to the 2nd Future apply to the Conditional. X. स्यतासी लृलुटोः ।३।१।३३॥

वृत्–वर्तिष्यते, वर्त्स्यति; वृध्–वर्धिष्यते, वर्त्स्यति; स्यन्द्–स्यन्दिष्यते–स्यन्त्स्यते–स्यन्त्स्यति; क्लृप्–कल्पिताहे–कल्प्ताहे–कल्प्तास्मि, कल्पिष्यते–कल्प्स्यते–कल्प्स्यति.

The rule:—1.

5. वृत्, वृध्, स्यन्द्, and क्लृप् are optionally Parasmaipadî in the 2nd Future and do not take इ in the *Par.* forms; क्लृप् 2 follows this rule in the 1st Future also.

1. वृद्भ्यः स्यसनोः ।१।३।९२॥ न वृद्भ्यश्चतुर्भ्यः ।७।२।५९॥
2. लुटि च क्लृपः ।१।३।९३॥ तासि च क्लृपः ।७।२।६०॥

दृश्—द्रष्टा द्रष्टारौ द्रष्टारः; द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति; द्रष्टुम् *(Inf.)*; द्रष्टृ (a seer); but दृष्ट, दृष्ट्वा, दृष्टि.

सृज्—स्रष्टा स्रष्टारौ स्रष्टारः; स्रक्ष्यति स्रक्ष्यतः स्रक्ष्यन्ति; स्रष्टुम्; स्रष्टृ; but सृष्ट, सृष्टि, सृष्ट्वा.

तृप्—तर्पिता, त्रप्ता, तर्प्ता; तर्पिष्यति, त्रप्स्यति, तर्प्स्यति.

The rule:—

(अ) दृश् and सृज् change their ऋ to र् neccessarily and other *Aniṭ* roots having ऋ for their penultimate, optionally before strong terminations beginning with any consonant except a nasal or a semi-vowel; *e. g.*—

दृश्+ता=द्रश्+ता=द्रष्+ता [Les 28 (अ)]=द्रष्+टा=द्रष्टा; दृश्+स्यति =द्रश्+स्यति=द्रष्+स्यति=द्रक्+स्यति (L. 28 [ए])=द्रक्+ष्यति=द्रक्ष्यति; सृज्+तुम्=स्रज्+तुम्=स्रष्+तुम्=स्रष्+टुम्=स्रष्टुम्; यज्-यष्टा, यक्ष्यति, यष्टुम्, इष्ट, इष्ट्वा; मृज्-मार्जिता, मार्ष्टा; मार्जिष्यति, मार्क्ष्यति (Les. 28 [ऊ]).

In these forms ज् is changed to ष् (Les. 28 [अ]). तुम् is a strong termination, while त and त्वा are weak ones. The *samprasâraṇa* change takes place in weak forms. मृज् is a *Veṭ* root. For its *vriddhi Vide* Les. 28 [ऊ].

नश्—नशिता, नंष्टा; नशिष्यति, नङ्क्ष्यति; मस्ज्-मङ्क्ता, मङ्क्ष्यति;

नश्+स्यति=नन्श् + स्यति=नन्ष् + स्यति=नन्क् + स्यति=नङ्क्+स्यति= नङ्क्+ष्यति=नङ्क्ष्यति; मङ्क्ष्यति—

(आ) The roots नश् and मस्ज् insert a nasal before the final letter, when followed by strong terminations beginning with any consonant except a nasal or a semi-vowel.

वस्—वत्स्यति वत्स्यतः वत्स्यन्ति—

6. The ending स् of a root is changed to त् before a termination beginning with स्.

मृ—मरिष्यति, मर्तास्मि—

7. The root मृ takes *Par*. terminations.

तॄ—तरिता, तरीता; तरिष्यति, तरीष्यति; वॄ-वरिता, वरीता;
ग्रह्—ग्रहीता, ग्रहीष्यति; गृहीत, गृहीत्वा, ग्रहीतुम्, ग्रहीतृ—

(इ) The augment इ is optionally lengthened in the case of roots ending in ऋ, वृ *Âtm.* (9th), and वृ *Ubh.* (1*st*, 5*th*, and 10*th*), and necessarily in the case of ग्रह्*.

लभ्—लब्धाहे, लप्स्ये, अलप्स्ये, लब्ध, लब्धुम्, लब्ध्वा. लभ्+ताहे=लभ्+धाहे=लब्+धाहे+लब्धाहे; दुह्–दोग्धा, धोक्ष्यति, दुग्ध, दोग्धुम्, दुग्ध्वा, दुह्+ता=दोह्+ता=दोघ्+ता=दोघ्+धा=दोग्+धा=दोग्धा.

दुह्+स्यति=दोह्+स्यति=दोघ्+स्यति=धोघ्+स्यति (L. 29[ए])=धोक्+स्यति=धोक्+ष्यति=धोक्ष्यति. वह्–वोढा, वक्ष्यति, वोढुम् (*Inf.*); वह्+ता=वढ्+ता=वढ्+धा=वढ्+ढा=वोढा (Les. 29 [ऊ]); वह्+स्यति=वढ्+स्यति=वक्+स्यति= (Les. 28 [ए])=वक्+ष्यति=वक्ष्यति. वच्–वक्ता, वक्ष्यति. वच्+स्यति=वक्+स्यति (Les. 13, 2)=वक्+ष्यति=वक्ष्यति; नह्–नद्धा, नत्स्यति(Les. 29 [उ];) गुह्–गूहिता(*p.* 104 foot-note) –गोढा;गूहिष्यति–घोक्ष्यति(for the lengthening of the penultimate उ of गुह्, *Vide* foot-note, *p.* 104).

कृ-*Cau.base*-कारय–कारयिता,कारयिष्यति; नश् *Pas.*—नङ्क्ष्यते= Will be destroyed; त्यज् *Pas.*-त्यक्ष्यते= Will be abandoned—

The passive or the impersonal forms of non-conjugational tenses and mood are made up by applying Âtmanepada terminations.

दा—दाता, दायिता दास्यते, दायिष्यते; कृ–करिष्यते, कारिष्यते; कर्ताहे, कारिताहे; हन्–हन्ता, घानिता; हनिष्यते, घानिष्यते; ग्रह्–ग्रहीता, ग्राहिता; ग्रहीष्यते, ग्राहिष्यते; दृश्–द्रष्टा, दर्शिता; द्रक्ष्यते, दर्शिष्यते—

(ई) Roots ending in a vowel, and हन्, ग्रह्, and दृश् optionally form their passive or impersonal forms of non-conjugational tenses and mood (except the Perfect) in two ways—(1) By applying

---

* This rule is not applicable in the Perfect, the Benedictive *Âtm.*, and the Aorist *Par.*

Âtmanepada terminations of the respective tenses and mood; (*e.g.*, दास्यते, करिष्यते, हनिष्यते, ग्रहीष्यते, द्रक्ष्यते) and (2) By prefixing the augment इ to the terminations even when the roots are *Aniṭ* and changing the final vowel and the penultimate अ to their *vṛiddhi* substitute and any other penultimate short vowel to its *guṇa* substitute (*e. g.* कारिताहे, ग्राहिताहे, दर्शिताहे). When the penultimate अ of हन् takes *vṛiddhi* ह् is changed to घ् (घानिष्यते). Roots ending in आ take the augment य before इ in these optional forms (दायिताहे).

त्वत्कृते मुम्बापुर्या बहूनि पुस्तकान्यानेष्यामि ।

त्वयैष वध्यः । नो चेत् त्वां व्यापादयिष्यति ।

युद्धाय कृतनिश्चयोऽयं दृश्यते दुरात्मा । तद्यदि कदाचित् तीक्ष्णशृङ्गाभ्यां स्वामिनं प्रहरिष्यति तन्महाननर्थः संपत्स्यते ।

न ज्ञायते किमद्य वटवासिनां विहङ्गमानां संक्षयो भविष्यति नो वा ।

मया सह सुभाषितगोष्ठीसुखमनुभवन् सुखेन कालं नेष्यति । न त्वयास्य कृते चिन्ता कार्या ।

ब्रह्मचर्यं समाप्य गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । यदहरेव विरजेत्तदहरेव प्रव्रजेत् ।

विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।

वादे वादे जायते तत्त्वबोधः ।

गतानुगतिको लोको न लोकः पारमार्थिकः ।

आशा बलवती राजन् शल्यो जेष्यति पाण्डवान् ।

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।

केका वाणी मयूरस्य समौ चन्द्रकमेचकौ—इत्यमरः ।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।

17

द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥
*त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इति हारमतैवासौ स्नेहस्तस्याः स तादृशः ॥
जतौ तु वंशस्थमुदीरितं जरौ ।

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषपरो हि यो भवेत्
कथं जनस्तं परितोषयिष्यति ॥
सुताम्रपर्णीजलराशियोगे
निबध्य सेतुं विशिखैरसंख्यैः ।
श्रीरामचन्द्रेण समर्पितं तं
रामेश्वराख्यं नियतं स्मरामि ॥

तृणादपि लघुस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥
आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥

I will either accomplish my object or let my body fall.
When I go to Bombay, I will bring you those two books.
Thieves cannot steal the wealth of knowledge.
If you do not obey my words, I will burn you by my lustre.

---

* 'I shall sport with you (Râma) in forests'—With this very thought Sitâ was delighted, so strong was her affection for Râma.

Wicked one! thou shalt not stand up again.

I do not know whether my friend will be at home or not this time.

He renounced the world on the very day on which he felt disgusted with its pleasures.

Do not be anxious on their account; they will enjoy happiness wherever they go by their conversation with learned men on literary topics.

Nouns

अच्युत (अच्युतः) *m.*–Vishṇu.

अनर्थ (अनर्थः) *m.*–An injury.

अपगम (अपगमः) *m.*–Removal.

अहन् *n.*–A day.

आशा *f.*–Hope.

केका *f.*–A peacock's cry.

गृहिन् *m.*–One belonging to the second stage of life, called गृहस्थाश्रम (married life).

गोष्ठी *f.*–Talk; conversation.

चन्द्रक (चन्द्रकः) *m.*–An eye in the tail of a peacock.

जलराशि *m.* (तत्पु०, जल *n.*+राशि *m.* a store)–A sea.

तत्त्वबोध *m.* (तत्पु०, तत्त्व *n.* Reality +बोध *m.*)–Knowledge of the truth.

तूल (तूलः-लम् *m.*, *n.*)–Cotton.

दुर्भिक्ष (दुर्भिक्षम्) *n.*–Famine.

नारायण (नारायणः) *m.* (बहु०, नार *m.* water+अयन *n.* a place)–One whose place is water; Hari; Vishṇu.

निमित्त (निमित्तम्) *n.*–Cause.

नीलकण्ठ (नीलकण्ठः) *m.*–A peacock.

पाण्डव (पाण्डवः) *m.*–A son of पाण्डु.

प्रातःकाल *m.* (प्रातर् *Ind.* In the morning)–The morning time.

बर्हिण (बर्हिणः) *m.*–A peacock.

बर्हिन् *m.* (बर्ह *n.* A feather+इन् a possessive affix)–A peacock.

ब्रह्मचर्य (ब्रह्मचर्यम्) *n.*–A stage of life in which a person is to give himself up to the study of the Vedas.

भुजङ्गभुज् *m.* (उप० स०)–One who feeds upon serpents; a peacock.

मुम्बापुरी *f.*–Bombay.

मेचक (मेचकः) *m.*–An eye in the tail of a peacock.

योग (योगः) *m.*–Union; connection.

वंशस्थ (वंशस्थम्) *n.*–Name of a a metre.

वनिन् *m.*–One living in a forest and living the life of a forester or वानप्रस्थ.

वाद (वादः) *m.*–A dispute.

विज्ञान (विज्ञानम्) *n.*–Knowledge.

विशिख (विशिखः) *m.*–An arrow.

विहङ्गम (विहङ्गमः) *m.*–A bird.

शल्य (शल्यः) *m.*–King Śalya.

शृङ्ग (शृङ्गम्) *n.*–A horn.

श्लोक (श्लोकः) *m.*–*Anushṭubh* metre.

संशय (संशयः) *m.*–Destruction.

सुभाषित (सुभाषितम्) *n.*–A fluent speech.

सुवृष्टि *f.*–Good rain.

सेतु *m.*–A bridge.

सुताम्रपर्णी *f.* (सु+*Ind.* good+ ताम्रपर्णी *f.*)–The beautiful Tâmraparṇî river.

Adjectives

अकारणद्वेषपर (बहु०, न कारणं यस्मिन् कर्मणि यथा स्यात्तथा अकारणम् (अव्य० स०), अकारणं द्वेषः अकारणद्वेषः (कर्म०), अकारणद्वेषः परं प्रधानं वस्तु यस्य सः)–Bent upon hating (another) without a cause.

असंख्य–Innumerable.

उदीरित (*p. p.* of उद्+ईर् 2*nd Âtm.*)–Spoken.

कृत्स्न–Whole.

गतानुगतिक (बहु०, गत, *p.p.* of गम् +अनुगति *f.* following+क–an affix)–Going after one who goes; doing what another [does.

तीक्ष्ण–Sharp.

ध्येय (*Pot. p*, ध्यै 1*st Par.*)– Fit for meditation. [way.

पारमार्थिक–Going on the right

ब्रह्मनिष्ठ (बहु०, ब्रह्मन् *n.* the Supreme Being+निष्ठा *f.* devotion)–One devoted to the Supreme Being.

मद्याजिन् (तत्पु०, मद् 1+याजिन्)– Worshipping me.

मधुगन्धि–Having the fragrance of wine; or the word may be taken as मधुगन्धिन्–मधुनः गन्धः मधुगन्धः, स एषामस्तीति मधुगन्धीनि वनानि–Scented with the honey of flowers.

रामेश्वराख्य (बहु०, रामेश्वर *m.*+ आख्या *f.* name)–(One) whose name is Râmeśvara.

वटवासिन् (वट *m.* A banyan tree +वासिन्)–Dwelling in a banyan tree.

वध्य–Fit for destruction.

श्रोत्रिय–Versed in the vedic lore.

समर्पित (*p. p.* of the *Cau.* of सम्+ऋ[ऋच्छ्]1*st Par.*)–Placed.

समित्पाणि (व्यधि॰ बहु॰, समिध् *f.* sacrificial fuel+पाणि *m.*–the hand)–Having *samidh* in one's hand.

सुनिष्पन्न (सु *Ind.* well+निष्पन्न *p. p.* of निस्+पद् 4*th Âtm.*)–Well proved.

Roots

अनु+भू (अनुभवति) (1*st Par.*)–To experience; to enjoy.

परि+तुष् (4*th Par.*) *Cau.*–To satisfy.

प्र+कुप् (प्रकुप्यति) (4*th Par.*)–To be very angry.

प्रति+ज्ञा [जा] (प्रतिजानाति–नीते) (2*nd Ubh.*)–To promise.

प्र+व्रज् (प्रव्रजति)–(1*st Par.*)–To renounce the world; to resort to the fourth stage of life called संन्यास. [To kill

वि+आ+पद् (4*th Âtm.*) *Cau.*–

वि+रञ्ज् (विरजति–ते, विरज्यति–ते) (1*st Ubh.*, 4*th Ubh.*)–To be disgusted with the world.

सं+पद् (संपद्यते) (4*th Âtm.*)–To become.

Indeclinables

आलोड्य (*Ind. p.* of the *Cau.* of आ+लुड् 1*st Par.* to stir)–Having considered minutely.

इतरथा–Otherwise.

इति–Thus.

उद्दिश्य (*Ind. p.* of उद्+दिश् 6*th Ubh.*)–Having thought of.

निबध्य (*Ind. p.* of (नि+बन्ध् 9*th Par.*)–Having built.

नियतम्–Necessarily.

नो–Not.

विज्ञानार्थम् (चतु॰ तत्पु॰, *Adv.* विज्ञान *n.*+अर्थ *m.*)–For knowledge.

सत्यम्–Truly.

ह–Verily.

LESSON XXXVI

THE PERFECT TENSE

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्—He (Raghu) milked the earth (took taxes from the subjects) for sacrifice (and) Indra milked heaven (poured rain-water from heaven) for corn.

मघवन् *Mas.*

द्वि०	मघवानम्	मघवानौ	मघोनः
तृ०	मघोना	मघवभ्याम्	मघवभिः
स०	मघोनि	मघोनोः	मघवसु
सं०	मघवन्	मघवानौ	मघवानः

मघोन् is the *Bha* base of मघवन्.

शिवधनुर्नामयित्वा रामः सीतां परिणिनाय—Having caused Śiva's bow to bend, Râma married Sîtâ.

स राजा मृगयां कर्तुं वनं जगाम—That king went to a forest to hunt.

सेनयोस्तुमुलं युद्धं बभूव—There was a fierce fight between the two armies.

तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः—There, in the vicinity of a Brâhmin-hermitage he saw a **Vaiśya.**

उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ—The Vaiśya and the king, who were sitting, related some stories.

बहु जगद पुरस्तात्तस्य मत्ता किलाहम्—I spoke much before him; verily I was infatuated.

ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने—When that protector entered the forest, among animals a strong one did not harass a weak one.

This lesson illustrates the Perfect. Thero are three past tenses in Sanskrit. They had originally different senses; but in later literature they are used indiscriminately.

The Perfect originally signified the remote past. It is very freely used in Sanskrit literature. In the 1*st Pers.* it shows that the speaker was in an unconscious state; *e. g.*, बहु जगद पुरस्तात्तस्य मत्ता किलाहम्।

१, आर्धधातुकस्येड्वलादेः।७।२।३५.

Perfect

	गद् *Par.*			विश् *Par.*		
1st Pers	जगद-जगाद	जगदिव	जगदिम	विवेश	विविशिव	विविशिम
2nd ,,	जगदिथ	जगदथुः	जगद	विवेशिथ	विविशथुः	विविश
3rd ,,	जगाद	जगदतुः	जगदुः	विवेश	विविशतुः	विविशुः

	मुद् *Âtm.*			वृध् *Âtm.*		
1st pers.	मुमुदे	मुमुदिवहे	मुमुदिमहे	ववृधे	ववृधिवहे	ववृधिमहे
2nd ,,	मुमुदिषे	मुमुदाथे	मुमुदिध्वे	ववृधिषे	ववृधाथे	ववृधिध्वे
3rd ,,	मुमुदे	मुमुदाते	मुमुदिरे	ववृधे	ववृधाते	ववृधिरे

	नु *Par.*		
1st pers.	नुनव-नुनाव	नुनुविव	नुनुविम
2nd ,,	नुनविथ	नुनुवथुः	नुनुव
3rd ,,	नुनाव	नुनुवतुः	नुनुवुः

1. Roots are reduplicated in the Perfect. Rules of reduplication are given in lesson XXX.

2. The terminations of the Perfect are as under:—

	Par.			*Âtm.*		
1st pers.	अ	व	म	ए	वहे	महे
2nd ,,	थ	अथुस्	अ	से	आथे	ध्वे
3rd. ,,	अ	अतुस्	उस्	ए	आते	इरे

3. Of these terminations,[1] व, म, and थ, and वहे, महे, से, and ध्वे are capable of taking the augment इ (*Vide* Les. XXXV).

4. विवेश, विविशिव, &c.—The Singulars of the *Par.* are strong; Duals and Plurals, and all the *Âtm.* terminations are weak.

5. विवेश, जगद-जगाद, नुनव-नुनाव—Before[2] strong terminations the ending vowel and the penultimate short vowel take their *guṇa* substitute; the final vowel and the penultimate अ take *vṛiddhi* in the 3rd *pers. sing.* and optionally in the 1st *pers. sing.*

6. नुनुविव &c.—The ending उ of a root is changed to उव् before vowel weak terminations.

2, णलुत्तमो वा।७।१।९१।।

1. कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ।७।२।१३।

कृ *Ubh.*

	Par.			*Âtm.*		
1st pers.	चकर-चकार	चकृव	चकृम	चक्रे	चकृवहे	चकृमहे
2nd ,,	चकर्थ	चक्रथुः	चक्र	चकृषे	चक्राथे	चकृढ्वे
3rd ,,	चकार	चक्रतुः	चक्रुः	चक्रे	चक्राते	चक्रिरे

	श्रु *Par.*			सृ *Par.*		
1st pers.	शुश्रव-शुश्राव	शुश्रुव	शुश्रुम	ससर-ससार	ससृव	ससृम
2nd ,,	शुश्रोथ	शुश्रुवथुः	शुश्रुव	ससर्थ	सस्रथुः	सस्र
3rd ,,	शुश्राव	शुश्रुवतुः	शुश्रुवुः	ससार	सस्रतुः	सस्रुः

The above forms will show that these roots do not take the augment इ. The rule—

7. कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, and श्रु do not take the augment इ in the Perfect.

8. चकृढ्वे—ध्वे preceded by any radical vowel except अ or आ is necessarily changed to ढ्वे.

	क्री *Par.*			क्री *Âtm.*		
1st	चिक्रय-चिक्राय	चिक्रियिव	चिक्रियिम	चिक्रिये	चिक्रियिवहे	चिक्रियिमहे
2nd	चिक्रेथ-चिक्रयिथ	चिक्रियथुः	चिक्रिय	चिक्रियिषे	चिक्रियाथे	चिक्रियिध्वे-ढ्वे
3rd	चिक्राय	चिक्रियतुः	चिक्रियुः	चिक्रिये	चिक्रियाते	चिक्रियिरे

	प्रच्छ् *Par.*			त्यज् *Par.*		
1st pers.	पप्रच्छ	पप्रच्छिव	पप्रच्छिम	तत्यज-तत्याज	तत्यजिव	तत्यजिम
2nd ,,	पप्रच्छिथ-पप्रष्ठ	पप्रच्छथुः	पप्रच्छ	तत्यजिथ-तत्यक्थ	तत्यजथुः	तत्यज
3rd ,,	पप्रच्छ	पप्रच्छतुः	पप्रच्छुः	तत्याज	तत्यजतुः	तत्यजुः

	मृ *Âtm.*			हृ *Par.*		
1st pers.	ममर-ममार	मम्रिव	मम्रिम	जहर-जहार	जह्रिव	जह्रिम
2nd ,,	ममर्थ	मम्रथुः	मम्र	जहर्थ	जह्रथुः	जह्र
3rd ,,	ममार	मम्रतुः	मम्रुः	जहार	जह्रतुः	जह्रुः

The rules:—

9. तत्यजिव, मम्रिम, पप्रच्छिम, चिक्रियिषे, चकृव, ससृम, दुद्रुव, &c.— All roots except कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, and श्रु take the augment

इ necessarily before all terminations except थ.

This rule holds even in the case of *Aniṭ* roots.

10. **ममर्थ, जहर्थ**—*Aniṭ* roots ending in ऋ do not take the augment इ before थ.

11. **तत्यजिथ-तत्यक्थ; पप्रच्छिथ-पप्रष्ठ; चिक्रयिथ-चिक्रेथ**—*Aniṭ* roots ending in a vowel or having अ take इ *optionally* before थ.

Mark the above rule which is very important (त्यज् and क्री are both *Aniṭ*. क्री ends in a vowel and त्यज् has अ).

12. **चिक्रियथुः, निन्यथुः,** &c.—Before weak vowel terminations the ending इ or ई of a root is changed to इय् when it is preceded by a conjunct consonant and to य् when it is not preceded by a conjunct consonant.

13. **ममार** &c.—The root मृ is Parasmaipadî in the Perfect. It is *Par.* also in the Futures and the Conditional (*Vide* Les. XXXV, r. 7).

14. **चिक्रियिध्वे-ढ्वे**—When ध्वे takes इ and the इ is preceded by य्, र्, ल्, व्, or ह्, it is optionally changed to ढ्वे.

	भू *Par.*			जि *Par.*		
1st *pers.*	बभूव	बभूविव	बभूविम	जिगय-गाय	जिग्यिव	जिग्यिम
2nd ,,	बभूविथ	बभूवथुः	बभूव	जिगयिथ-गेथ	जिग्यथुः	जिग्य
3rd ,,	बभूव	बभूवतुः	बभूवुः	जिगाय	जिग्यतुः	जिग्युः

	हि *Par.*	चि *Ubh.*	
3rd ,,	जिघाय	चिचाय-चिकाय	चिच्ये-चिक्ये

15. The forms of भू should be made up from the base बभूव्.

16. In the Perfect, the root जि changes its ज् to ग्;, हि, its ह् to घ्; and चि, its च् to क् optionally.

	पा *Par.*			म्लै *Par.*		
प्र०	पपौ	पपिव	पपिम	मम्लौ	मम्लिव	मम्लिम
द्वि०	पपिथ-पपाथ	पपथुः	पप	मम्लिथ-मम्लाथ	मम्लथुः	मम्ल
तृ०	पपौ	पपतुः	पपुः	मम्लौ	मम्लतुः	मम्लुः

ज्ञा—जज्ञौ; ग्लै—जग्लौ—

17. पपौ, जज्ञौ—In the case of roots ending in आ, औ is the termination of the 1*st pers. sing.* and the 3*rd pers. sing.*

जज्ञथुः, जज्ञिथ-जज्ञाथ—The ending आ is dropped before weak terminations beginning with a vowel and before थ when it takes इ.

18. ग्लै-ग्लाता, ग्लास्यति, जग्लौ—Roots ending in ए, ऐ, ओ, and औ are to be looked upon as ending in आ in non-conjugational tenses and mood.

	गम् *Par.*			हन् *Par.*		
प्र०	जगम-गाम	जग्मिव	जग्मिम	जघन-घान	जघ्निव	जघ्निम
द्वि०	जगमिथ-जगन्थ	जग्मथुः	जग्म	जघनिथ-जघन्थ	जघ्नथुः	जघ्न
तृ०	जगाम	जग्मतुः	जग्मुः	जघान	जघ्नतुः	जघ्नुः

खन्—चखान चख्नतुः चख्नुः; जन्—जज्ञे जज्ञाते जज्ञिरे;

अद्—आद-जघास आदतुः-जक्षतुः आदुः-जक्षुः, आदिथ—जघसिथ—

The rules:—

19. जग्मतुः, जघ्नतुः—गम्, हन्, जन्, खन्, and घस् drop their penultimate अ before weak vowel terminations; ह् of हन् is changed to घ् when it drops अ; and घस् is changed to (घ्स्-क्स्-क्ष्) क्ष् and जन् to (ज्न्-ज्ञ्) ज्ञ् when अ is dropped.

20. आद-जघास—अद् substitutes घस् optionally in the Perfect and अद् and ऋ take इ necessarily before थ.

21. The root घस्, being used as a substitute for अद् in the Perfect, has no forms in the Perfect.

पुरा किल समस्ते क्षितिमण्डले सुरथो नाम राजा बभूव। औरसान् पुत्रानिव प्रजाः सम्यक् पालयतस्तस्य केचिद् भूपाः शत्रवो बभूवुः। तैः सहातिप्रबलस्य तस्य युद्धं बभूव। न्यूनैरपि तैर्युद्धे स जिग्ये। ततः स स्वपुरमायातो निजदेशाधिपोऽभवत्। तत्रापि स प्रबलारिभिराक्रान्तः। दुर्बलस्य तस्य कोशो बलं च सर्वं स्वपुरेऽपि दुरात्मभिर्बलिभिररिभिरपजह्रे। ततो हृतस्वाम्यः स भूपतिर्मृगया-

व्याजेन हयमारुह्यैकाकी गहनं वनं जगाम तत्र च कस्यचिद् द्विजवर्यस्याश्रमपदं ददर्श। तेन मुनिना सत्कृतस्तस्मिन्नाश्रमे स कंचित् कालं तस्थौ ममत्वाकृष्टचेतनः सन्नचिन्तयच्च। यत्पुरं मत्पूर्वैः पूर्वं पालितं तदधुना मया हीनम्। न जाने मद्भृत्यैरसद्वृत्तैर्धर्मतः पाल्यते नो वा। धनभोजनैर्नित्यं प्रसादिता मदनुयायिनोऽद्यान्यमहीभृतां वृत्तिं कुर्वन्ति। अतिदुःखेन संचितः कोशस्तेषामसद्व्ययैः क्षयं गमिष्यतीति॥

ज्ञेया वसन्ततिलका तभजा जगौ गः।

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजं च।
इत्येव चिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उन्मुमूल॥

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥

एको हि दोषो गुणसंनिपाते
निमज्जतीन्दोरिति यो बभाषे।
नूनं न दृष्टं कविनापि तेन
दारिद्र्यदोषो गुणराशिनाशी॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा—
न्यन्यानि संयाति नवानि देही॥

As the father looks to the welfare of his children, so should a king have the good of his subjects at heart.

The strong wind, the like of which was never heard of before, has uprooted all the trees in the garden.

There was a terrible fight between the Pâṇḍavas and the Kauravas for eighteen days. In the end, the Kauravas were defeated.

Once Dushyanta went to a forest to hunt. There he entered the hermitage of the sage Kaṇva. In a garden of the hermitage he saw Śakuntalâ with her two friends watering trees. Mutual love was formed between him and Śakuntalâ and he married her by the Gândharva form of marriage.

Nouns

अभ्यास-श (अभ्यासः-शः) *m.*-1. Neighbourhood; 2. The reduplicative syllable.

असद्व्यय (असद्व्ययः) *m.* (कर्म०, असत् bad+व्यय *m.* expense)-Improper expense.

कोश (कोशः) *m.*-1. A treasure; 2. A closed bud.

क्षितिमण्डल *n.* (क्षिति *f.*-The earth)-The circle of the earth; the earth.

गो *f.*-The earth.

चेतन (चेतनः) *m.*-The mind.

दारिद्र्यदोष (दारिद्र्यदोषः) *m.* (कर्म०, दारिद्र्य *n.* poverty+दोष *m.*)-The fault, *viz.*, poverty.

देहिन् *m.*-The soul.

धनुस् *n.* A bow.

नलिनी *f.* A lotus-plant.

भास्वत् *m.*-The sun.

मघवन् *m.*-Indra.

ममत्व (ममत्वम्) *n.*-Egoism.

महीभृत् *m.*-A king.

मृगयाव्याज *m.* (मृगया *f.*+व्याज *m.* pretext)-Pretext of hunting.

वसन्ततिलका-क *f.*, *n.*-Name of a metre.

वासस् *n.*-A cloth.

विप्र (विप्रः) *m.*-A Brâhmin.

वृत्ति *f.*-Livelihood.

षट्पद (षट्पदः) *m.*-A bee.

संनिपात (संनिपातः) *m.*-A collection.

सस्य (सस्यम्) *n.*-Corn.

सुरथ (सुरथः) *m.*-Name of a king.

स्वाम्य (स्वाम्यम्) *n.*-Mastership.

Adjectives

अतिप्रबल–Very strong.

अनुयायिन्–Following; going.

असद्वृत्त (बहु०)–Of bad conduct.

आकृष्ट (*p. p.* of आ+कृष् 1*st* *Par.*)–Drawn.

आक्रान्त (*p. p.* of आ+क्रम् 1*st* *Âtm.*)–Attacked.

उपविष्ट (*p. p.* of उप+विश् 6*th* *Par.*)–Sitting.

ऊन–Weak; feeble.

औरस (from उरस् *n.* the breast)–Legitimate; one's own.

कल–Sweet but indistinct (अस्पष्ट-मधुर).

गहन–Deep.

गुणराशिनाशिन्–Destroying a collection of merits.

गोप्तृ–Protector.

जीर्ण (*p. p.* of जॄ 4*th* *Par.* जीर्यति)–Worn out.

तुमुल–Fierce.

द्विजवर्य–Best among the twice-born.

निज–One's own.

न्यून–Wanting in strength; weak.

प्रसादित (*p. p.* of the *Cau.* of प्र+सद् [सीद्] 1*st*, 6*th* *Par.*)–Pleased; propitiated.

संचित (*p. p.* of सम्+चि 5*th* *Ubh.*)–Collected.

सत्कृत–Welcomed.

समस्त–All.

सुचारु (प्रादिस०, सुष्ठु चारु)–Very beautiful.

हीन (*p. p.* of हा–to abandon 3*rd* *Par.*)–Destitute of.

Roots

अप+हृ (अपहरति) (1*st* *Par.*)–To take away.

उद्+मूल् (उन्मूलति–उन्मूलयति) (1*st* *Par.*, 10*th* *Par.*)–To root out.

गद् (गदति) (1*st* *Par.*)–To speak.

गाह् (गाहते) (1*st* *Âtm.*)–To enter.

गुञ्ज् (गुञ्जति) (1*st* *Par.*)–To hum.

नि+मस्ज् [मज्ज्] (निमज्जति) (6*th* *Par.*)–To be plunged.

परि+नी [णी] (परिणयति) (1*st* *Par.*)–To marry.

पालय (*Cau.* of पा 2*nd* *Par.*–To protect)–To protect.

बाध् (बाधते) (1*st* *Âtm.*)–To afflict.

सम्+या (संयाति) (2*nd* *Par.*)–To enter.

हस् (हसति) (1*st* *Par.*)–To smile.

Indeclinables

किल—Verily; so they say.
नामयित्वा (*Ind. p.* of the *Cau.* of नम्)–Having bent.
नूनम्–Certainly.
पुरा–Formerly.
पूर्वम्–Formerly.

LESSON XXXVII

The Perfect Tense (continued)

जनको हि वैदेहो बहुदक्षिणेन यज्ञेन ईजे (यज्ञेनेजे)—Verily, Janaka, king of the Videhas, performed a sacrifice in which much *dakshiṇâ* was given.

ते कपीन्द्रा मन्युं रोद्धुं न शेकुः—Those excellent monkeys were not able to restrain anger.

तयोस्तुमुलं युद्धं समापेदे—Between them (two) a fierce fight occurred.

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच—Having heard the speech of the servant of God (Śiva), the lord of men said again.

विश्वामित्रमागतं प्रेक्ष्य वसिष्ठः स्वागतं व्याजहार—Having seen Viśvâmitra coming, Vasishṭha addressed him a welcome.

Perfect

	पच् *Par.*			शक् *Par.*		
1*st pers.*	पपच-पाच	पेचिव	पेचिम	शशक-शाक	शेकिव	शेकिम
2*nd* ,,	पेचिथ-पपक्थ	पेचथुः	पेच	शेकिथ-शशक्थ	शेकथुः	शेक
3*rd* ,,	पपाच	पेचतुः	पेचुः	शशाक	शेकतुः	शेकुः

तॄ *Par.* — 3*rd pers.* ततार तेरतुः तेरुः
भ्रम् *Par.* — 3*rd pers.* बभ्राम बभ्रमतुः-भ्रेमतुः बभ्रमुः-भ्रेमुः

भज् *Par.* — 3*rd pers.* बभाज भेजतुः भेजुः
राज् *Par.* — रराज रराजतुः-रेजतुः रराजुः-रेजुः

१. अत एकहल्मध्येऽनादेशादेर्लिटि।६।४।१२०, थलि च सेटि।।६।४।१२१,
२. तॄफलभजत्रपश्च।६।४।१२२

	त्रप् *Âtm.*			वम् *Par.*		
2nd *pers.*	त्रेपिषे-त्रेप्से	त्रेपाथे	त्रेपिध्वे-त्रेब्ध्वे	ववाम	ववमतुः	ववमुः

	भञ्ज् *Par.*		
3rd *pers.*	बभञ्ज	बभञ्जतुः	बभञ्जुः

The rules:— १

1. **पेचतुः, जज्वलुः, जँगदुः, पेचिथ**—If a root has **अ** between two single consonants and if its initial consonant undergoes no change in reduplication, its reduplicative syllable is dropped and **अ** changed to **ए** before weak terminations and before **थ** when it takes **इ**.

पच्—It has **अ** between two single consonants and **प्** is not changed in the reduplicative syllable, therefore **पेचतुः**.

चक्ष्—Though **च्** is not changed in the red. syl., still the rule does not apply; because **अ** is between **च्** and **क्ष्**, not two single consonants; therefore **चचक्षे**.

ज्वल्–जज्वलतुः; **अ** is between **ज्व्** and **ल्** and **ज्व्** is not a single consonant.

स्यन्द्–सस्यन्दे; **अ** is between **स्य्** and **न्द्**, not single consonants.

गद्–जगदतुः; **ग्** is changed in the red. syl. २

2. **तेरतुः, भेजथुः, फेलिव, त्रेपे, बभ्रमिव–भ्रेमिव**—This change—**एत्व** and **अभ्यासलोप**—takes place necessarily in **तॄ, फल्, भज्, त्रप्** (1*st Âtm.* to feel shame), &c. and optionally in **भ्रम्, त्रस्, राज्** (1*st Ubh.* to shine), **भ्राज्** (1*st Âtm.*, to shine), &c. ३

3. **ववमतुः**—This change does not take place in roots beginning with **व्**.

	स्मृ *Par.*			ऋ *Par.*			कृ *Par.*		
तृ०	सस्मार	सस्मरतुः	सस्मरुः	द्वि० आरिथ	आरथुः	आर	तृ० चकार	चकरतुः	चकरुः

४ 4. **सस्मरतुः, चकरतुः, आरतुः, जजागरतुः**—Roots ending in **ऋ**, preceded by a conjunct consonant, roots ending in **ॠ**, and the roots **ऋ** and **जागृ** take *guṇa* substitute even before weak terminations of the Perfect.

३. न शसददवादिगुणानाम्।६।४।१२६।४. ऋतश्च संयोगादेर्गुणः।७।४।१०।

	यज् *Par.*			वह् *Par.*		
1st pers.	इयज-याज	ईजिव	ईजिम	उवह-वाह	ऊहिव	ऊहिम
2nd ,,	इयजिथ-इयष्ठ	ईजथुः	ईज	उवहिथ-उवोढ	ऊहथुः	ऊह
3rd ,,	इयाज	ईजतुः	ईजुः	उवाह	ऊहतुः	ऊहुः

यज्+थ-(य् of the अभ्यास being changed to इ) इअयज्+थ-इयज्+थ-इयष्+थ (Les. 28 [अ])-इयष्+ठ=इयष्ठ. यज्+अथुः-(य् of the root being first changed to इ)-इज्+अथुः-(इज् being now reduplicated) इइज्+अथुः=ईजथुः.

	ग्रह् *Par.*			वस् *Par.*		
3rd pers.	जग्राह	जगृहतुः	जगृहुः	उवास	ऊषतुः	ऊषुः

	वच् *Par.*			वच् Passive		
3rd pers.	उवाच	ऊचतुः	ऊचुः	ऊचे	ऊचाते	ऊचिरे

5. यज्, वह्, वप् (1*st Par.*, to sow), वद्, व्यध् ([विध्] 4*th Par.*, to pierce) वच्, वस्, (when of the 1st *Conj.*), ग्रह्, स्वप्, and certain other roots take *samprasâraṇa* in the reduplicative syllable in the Perfect. Before weak terminations the *samprasâraṇa* change takes place before the roots are reduplicated.

	इष् *Par.*			इ *Par.*		
2nd pers.	इयेषिथ	ईषथुः	ईष	इययिथ-इयेथ	ईयथुः	ईय
3rd ,,	इयेष	ईषतुः	ईषुः	इयाय	ईयतुः	ईयुः

	स्वप् *Par.*			स्मि *Âtm.*		
3rd pers.	सुष्वाप	सुषुपतुः	सुषुपुः	सिष्मिये	सिष्मियाते	सिष्मियिरे

(a) इष्+इथ=इइष्+इथ=इएष्+इथ=इय् एष् इथ=इयेषिथ; उख् (1*st par.*. to move)-उउख्+अ=उ ओख्+अ=उवोख्+अ=उवोख; इ इ+अ= इ ऐ+अ=इ आय्+अ=इय्+आय्+अ=इयाय;

(b) इ इ+अतुः=इ य्+अतुः=ई य्+अतुः=ईयतुः;

(c) स्वप्+अ=सुअ स्वप्+अ=सुस्वाप्+अ=सुस्वाप्+अ=सुष्वाप्+अ=सुष्वाप; स्मि+ए=सिस्मि+ए=सिष्मि+ए=सिष्मिय्+ए=सिष्मिये—

6. (a) इयेष, उवोख, इयाय—The इ or उ of the reduplicative syllable is changed to इय् or उव् before dissimilar vowels.

(b) ईयतुः—Before weak terminations the vowel of the root इ

is changed to य् and the इ of the reduplicative syllable is lengthened.

(c) सुष्वाप, सिष्मिये—स्वप् and स्मि change their स् to ष्.

श्वि (1*st Par.*, to grow, to swell) has शिश्वय-श्वाय; शुशव-शाव; शिश्वयिथ-शुशविथ (the root being *Seṭ*); ह्वे-हु-जुहु-जुहव-हाव-जुहुवतुः-जुहुवुः-

7. श्वि forms its Perfect optionally from शु and ह्वे from हु necessarily.

	अर्ह् *Par.*			अर्च् *Par.*	
3rd pers. आनर्ह	आनर्हतुः	आनर्हुः	आनर्च	आनर्चतुः	आनर्चुः

अश् 5*th Âtm.*—2*nd pers.* आनशिषे-आनक्षे आनशाथे आनशिध्वे-आनड्ढ्वे—

The rule:—

8. If a root begins with अ and has a conjunct consonant, the अ of the reduplicative syllable is changed to आ and the augment न् is added after it. The rule holds in the case of अश् (5*th Âtm.*, to pervade) which is *Veṭ*.

(*a*) ईश्-तृ० ए० व०—ईशांचक्रे-ईशांबभूव-ईशामास; उन्द् (उनत्ति, 7*th Par.*, to wet)-उन्दांचकार-बभूव-आस;

(*b*) दय् (दयते, 1*st Âtm.* to feel pity for)-दयांचक्रे-बभूव-आस; अय् (अयते, 1*st Âtm.*, to go)-अयांचक्रे-बभूव-आस; आस्-आसांचक्रे; कास् (कासते, 1*st Âtm.* to shine)-कासांचक्रे; विद्-विवेद-विदांचकार; जागृ-जजागार-जागरांचकार; दरिद्रा-ददरिद्रौ-दरिद्रांचकार; भी-बिभाय-बिभयांचकार; भृ-बभार-बिभरांचकार; ह्री-जिह्राय-जिह्रयांचकार; हु-जुहाव-जुहवांचकार;

(*c*) चकास्-चकासांचकार-बभूव-आस—चुर्-चोरयांचकार-बभूव-आस; कृ *Cau.*-कारयांचकार-बभूव-आस—

The rule:—

9. (*a*) ईशांचक्रे &c., उन्दांचकार, &c.—If a root begins with any vowel except अ or आ, which is itself long, or being short, is followed by a conjunct consonant, its Perfect is formed by adding आम् to it and using the Perfect forms of कृ, भू, or अस् after it. This is called Periphrastic Perfect.

(*b*) दय्, अय्, आस्, and कास् also take the Periphrastic Perfect;

1. Striving for progress. 2. Studying.

विद् 2nd *Par.*, जागृ, and दरिद्रा take it optionally. भी, ह्री, भृ, and हु also take it optionally; and when they take it, they are reduplicated as in conjugational tenses. आम् is a strong termination; इ of विद् 2nd *Par.* is not guṇated before it.

(*c*) Roots of the 10th conj., causals, and other derivative roots and roots having more than one vowel like चकास् form their Perfect this way.

(*d*) If a root is *Âtm.*, it takes the *Âtm.* forms of कृ, but भू and अस् have their *Par.* forms used.

जजागरिथ (जागृ is *Seṭ*, being अनेकाच्)–जागरांचकर्थ &c.

10. *Passive or Impersonal Forms*--तत्यजे, बभूवे--The passive or impersonal forms of roots are formed by adding *Âtm.* terminations.

समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्तेऽपरे न तत्र किमस्माभिः कर्तुं शक्यम् । स्वाभाविकमेतत् ।

यो वै ब्राह्मणानामनूचानतम : स एषां वीर्यवत्तमः ।

अलमलं वहु विकत्थ्य । राज्ञः समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति ।

एकदा पुत्रेषु फलाहारार्थं वनं गतेषु नियतव्रता जमदग्नेः स्त्री रेणुका स्नातुं जगाम । आगच्छन्ती यदृच्छया चित्ररथं नाम नृपमृद्धिमन्तं सभार्यं ददर्श । दृष्ट्वा च तत्सुखमधिगन्तुमियेष । एतस्माद्दुष्टविचारात् सा नियमाच्चुच्युव आश्रमं च त्रस्ता प्रविवेश । जमदग्निस्तां ब्राह्म्या लक्ष्म्या विवर्जितां धैर्याच्च्युतां दृष्टवान् धिक्शब्देन च तां जगर्हे । ततः स आनुपूर्व्याच्चतुरः पुत्रान् मातरं हन्तुमादिदेश । ते तु मातृस्नेहवशाद्विचेतसो न किंचिद् बभाषिरे । तस्मात् क्रोधान्मुनिस्तान् शशाप पञ्चमं पुत्रं परशुरामं च मातृवधं कर्तुं शशास । मातर्यतीव स्निग्धोऽपि परशुरामः पितुराज्ञां शिरसि कृत्वास्याः शिरः परशुना चिच्छेद । ततो जमदग्निः प्रससादेत्थमुवाच च ।

ममेदं वचनात् तात कृतं ते कर्म दुष्करम् ।
वृणीष्व कामान् धमज्ञ यावतो वाञ्छसे* हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिं च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिं तथा ॥
अप्रतिद्वन्द्वितां युद्धे दीर्घमायुश्च भारत ।
ददौ च सर्वान् कामांस्तान् जमदग्निर्महातपाः ॥

हा राम हा रमण हा जगदेकवीर
हा नाथ हा रघुपते किमुपेक्षसे माम् ।
इत्थं विदेहतनयां मुहुरालपन्ती-
मादाय राक्षसपतिर्नभसा जगाम ॥

मातुलगृहादागतस्य भरतस्य कैकेय्याश्च संवादोऽयम् ।—

मातस्तातः क यातः, सुरपतिभवनं, हा कुतः, पुत्रशोकात्,
कोऽसौ पुत्रश्चतुर्णां, त्वमवरजतया यस्य जातः, किमस्य ।
प्राप्तोऽसौ काननान्तं, किमिति, नृपगिरा, किं तथासौ बभाषे,
मद्वाग्बद्धः, फलं ते किमिह, तव धराधीशता, हा हतोऽस्मि ॥

यस्योदयेनेह जगत् प्रबुध्यते प्रवर्तते चाखिलकर्मसिद्धये ।
ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मङ्गलं रविः ॥

Four Vedas, six Vedâṅgas, Mîmâṃsâ, Nyâya, Purâṇa, and Dharmaśâstra are fourteen branches of knowledge.

A Brâhmin should be invesed with thread in the eighth year after conception, a Kshatriya in the eleventh, and a Vaiśya in the twelfth.

Arjuna asked the Gandharva why enmity arose between Vasishṭha and Viśvâmitra.

---

* आत्मनेपदमार्षम्.

There was a great king, son of Kuśika, by name Gâdhi. He had a powerful son, named Viśvâmitra. Once upon a time Viśvâmitra went a hunting to a forest and there entered the hermitage of Vasishṭha, being oppressed with thirst. Vasishṭha welcomed him. Viśvâmitra asked Vasishṭha to give him the cow Kâmadughâ; but he did not give the cow to him.

Enough of your boasting. Let us fight so that people might see clearly who is the stronger of us two.

Nouns

अधरोत्तरव्यक्ति *f.*-Clearness of one's being inferior or superrior to another.

अप्रतिद्वन्द्विता *f.* (अ+प्रतिद्वन्द्विन् *m.*-a competitor+ता)-The state of having no competitor.

अवरजता (अवर *pro.* succeeding, अवरज *m.*-A younger brother)-The state of being a younger brother.

अस्पर्श (अस्पर्शः) *m.*-Freedom from touch.

अस्मृति *f.*-Non-remembrance.

आनुपूर्व्य (आनुपूर्व्यम्) *n.*-Order of succession.

उत्थान (उत्थानम्) *n.*-Getting up; revival.

कानन (काननम्) *n.*-A forest.

चित्ररथ (चित्ररथः) *m.*-Name of a king.

जमदग्नि *m.*-Name of a sage.

तात (तातः) *m.*-A pet word, used for children, pupils, &c.

धराधीशता *f.*-The state of being a lord of the earth.

परशु *m.*-An axe.

परशुराम (परशुरामः) *m.*-Son of Jamadagni, who rendered the earth destitute of the Kshatriyas 21 times.

भारत (भारतः) *m.*-A descendant of Bharata, Arjuna.

मन्यु *m.*-1. Anger; 2. Grief.

मातुल (मातुलः) *m.*-A maternal uncle.

मानस (मानसम्) *n.*-The mind.

रेणुका *f.*-The wife of Jamadagni.

वैदेह *m.*-King of the Videhas; Janaka.

सुरपति *m.*-The lord of gods; Indra.

स्वागत (स्वागतम्) *n.* (प्रादि०, सुष्ठु आगतम्)-Welcome.

हृद् *n.*-The heart.

Adjectives

अखिल–The whole, entire.

अधीयान (*pres. p.* of अधि+इ 2nd *Âtm.*)–Studying.

अनूचानतम–The best reciter and teacher or explainer of the Vedâs (from the root अनु +वच्).

ईहमान (*pres. p.* of ईह् 1st *Âtm.*)–Moving; striving for progress.

ऋद्धिमत्–Prosperous.

एक–Unrivalled.

एवंविध (बहु०, एवं विधा यस्य स एवंविधः, एवम्+विधा *f.* manner)–Of this manner or kind.

च्युत (*p. p.* of च्यु 1st *Âtm., f.* च्युता)–Dropped, fallen.

तावत्–So much.

त्रस्त (*p. p.* of त्रस् 1st *Par.*. 4th *Par., f.* त्रस्ता)–Terrified.

धर्मज्ञ–Knowing one's duty.

नियतव्रत (बहु०, नियत *p. p.* of नि +यम् [यच्छ्] 1st *Par.* +व्रत *m.*; *f.* नियतव्रता)–(One) whose devotion is regular.

ब्राह्म (*f.* ब्राह्मी)–Holy; pertaining to Brahman.

भविष्य–Future.

महातपस्–(One) whose austerity is great.

यावत्–As much.

रमण–Sporting; causing pleasure by sport.

विचेतस् (बहु०)–Dejected.

विवर्जित (*p. p.* of वि+वृज् 10th *Ubh., f.* विवर्जिता)–Destitute of; devoid of.

Roots

अभि+प्र+ईक्ष् (अभिप्रेक्षते) (1st *Âtm.*)–To see.

आ+दिश् (आदिशति) (6th *Par.*)–To order.

उप+ईक्ष् (उपेक्षते) (1st *Âtm.*)–To be indifferent to; to disregard.

उप+जन् (उपजायते) (4th *Âtm.*)–To be produced.

उप+आ+सृप् (उपासर्पति) (1st *Par.*)–To approach.

गर्ह् (गर्हते) (1st *Âtm.*, 10th *Ubh.*)–To censure.

च्यु (च्यवते) (1st *Âtm.*)–To fall.

नि+शम् (निशाम्यति) (4th *Par.*)–To hear.

प्र+बुध् (प्रबोधति) (1st *Par.*)–To be awake.

वाञ्छ् (वाञ्छति) (1st *Par.*)–To wish.

वि+कत्थ् (विकत्थते) (1st *Âtm.*)–To swagger; To boast.

वि+आ+हृ (व्याहरति) (1st *Par.*)–To address; To say.

शप् (शपति-ते) (1st *Ubh.*)–To curse. (It governs the *Dat.* in the sense of swearing–शपे ते मनुजाधिप.)

Indeclinables

अग्रतः-In front.
फलाहारार्थम्-(चतु॰तत्पु॰, फल *n.*+ आहार *m.*)-To eat fruits.
भृशम्-Greatly.
यदृच्छया (*Inst. Sing.* of यदृच्छा *f.* पृषोदरादि, या इच्छा यदृच्छा)-Accidentally; by chance.
वै-Expletive; it is used to adorn a sentence.
समक्षम्-In one's presence (अव्य॰, अक्ष्णः योग्यम् or समीपम्).
सुखम्-Happily.

LESSON XXXVIII

Some Irregular Forms

समारूढो मध्यमह्नः सविता—The Sun has ascended the middle of the day=It is noon (For forms of अहन् *n.*, *Vide* Les. XXXV).

न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायतां यान्ति=To one proceeding on the path of justice, even beasts become helpers.

सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम्—She was not able to express through shyness the bond of her affection towards that young man.

यस्यार्थाः स पुमान् लोके (पुमाँल्लोके)—He who has money is (considered) a man on earth.

परितः सर्वतः (संसारं) त्यक्त्वा व्रजतीति परिव्राट्—He who goes, having abandoned the world परितः, *i. e.*, on all sides or completely, is a recluse.

आचार्यः—आशिषः प्रतिगृह्यन्ताम्—The teacher—"Let blessings be accepted."

यजमानः—प्रतिगृह्णामि—The sacrificer—"I accept them."

मालाकाराः पुष्पाणां स्रजो ग्रथ्नन्ति—Gardeners weave garlands of flowers.

1. जराया जरसन्यतरस्याम् ।७।२।१०१।।

भेका वर्षासु भवन्तीति **वर्षाभ्वः** कथ्यन्ते—Frogs are produced in the rains and are therefore called वर्षाभू (produced in the rains).

सा खलु **स्वयंभुवो**ऽद्वितीया सृष्टिः—She is verily an unequalled creation of the Self-existent.

जरसा द्विगुणीभूतमस्य शरीरम्—His body is doubled (as it were) by old age.

हे **मघवन्** ! अमुं तुरगं प्रतिमोक्तुमर्हसीति रघुस्तमवदत्—Raghu said to him, "Oh ! Indra ! it becomes you to release (you should release) this horse." (For the forms of मघवन् *Vide* Les. XXXVI).

In this lesson ar given a few irregular forms.

जरा *Fem.*

प्र०	जरा	जरे-जरसौ	जराः-जरसः
ष०	। जरायाः-जरसः	जरयोः-जरसोः	जराणाम्-जरसाम्

Similarly, निर्जर has निर्जरौ-निजरसौ, निर्जरस्य-निर्जरसः, &c.

1. ।. Before vowel terminations जरा and निर्जर are optionally changed to जरस् and निर्जरस्.

सेनानी *Mas.* and *Fem.*

प्र०	सेनानीः	सेनान्यौ	सेनान्यः	ष० सेनान्यः	सेनान्योः	सेनान्याम्
द्वि०	सेनान्यम्	,,	,,	स० सेनान्याम्	,,	सेनानीषु

सुधी *Mas.* — स्वयंभू *Mas.*

प्र०	सुधीः	सुधियौ	सुधियः	स्वयंभूः	स्वयंभुवौ	स्वयंभुवः

वर्षाभू *Mas.* — पुनर्भू *Fem.*

प्र०	वर्षाभूः	वर्षाभ्वौ	वर्षाभ्वः	पुनर्भूः	पुनर्भ्वौ	पुनर्भ्वः

2. Rules for changing the ending ई and ऊ of root-nouns before vowel terminations to य् and व् or इय् and उव् are hard. The following points should be noted.

(अ) नियः, भुवः, नियाम, भुवि—If a root-noun is not preceded by any word, the ending ई or ऊ is changed to इय् or उव्.

(आ) प्रध्यः; उन्न्यः (here, in उन्नी, there is a conjunct consonant but it is not of the root; उद्+नी); यवक्रियः; दुध्यः (दुष्टं ध्यायन्तीति); दुर्धियः (दुष्टा धीर्येषां ते)—If the ending ई or ऊ of a root-noun is not preceded by a conjunct consonant of the root and if the compound is तत्पु०, the ending ई or ऊ is changed to य् or व्.

Exception.—(इ) भुवः, सुधियः—The ending ऊ and ई of भू and सुधी are changed to उव् and इय् respectively.

Counter-exception-(ई) वर्षाभ्वा, पुनर्भ्वौ—But the ऊ of वर्षाभू and पुनर्भू is changed to व्.

(उ) नियाम्, सेनान्याम्, ग्रामण्याम्—The *Loc. Sing.* of नी and nouns ending in नी like सेनानी and ग्रामणी is formed by आम्.

(ऊ) प्रध्यः स्त्रियाः; सुधियः-याः स्त्रियाः—The feminine forms of nouns ending in ई and ऊ are like those of लक्ष्मी and वधू when the ending ई and ऊ are changed to य् and व् and are like those of धी and भू when the ending ई and ऊ are changed to इय् and उव्.

(ए) ग्रामण्याः, सेनान्याः (*Fem. Abl.* and *Gen. Sing.*)—The feminine forms of ग्रामणी, सेनानी, &c., which primarily signify an occupation of a male are like those of the masculine.

पुंस् *Mas.*

प्र० पुमान्	पुमांसौ	पुमांसः	तृ० पुंसा	पुम्भ्याम्	पुम्भिः
द्वि० पुमांसम्	,,	पुंसः	स० पुमन्	पुमांसौ	पुमांसः

3. Mark the forms of पुंस् before सर्वनामस्थान. In the पद base पुंस् drops its स्.

स्रज् *Fem.* — अप् *Fem.*

प्र० स्रक्	स्रजौ	स्रजः	आपः-अपः-अद्भिः-अद्भ्यः-अपाम्-अप्सु
स० स्रजि	स्रजोः	स्रक्षु	(It is declined in the *Plu.* only).

4. स्रज् changes its final to क् before consonantal terminations.

5. अप्, प्राण, असु, सिकता, वर्षा, and समा are generally declined

in the *Plu.* only. The last three are some times used in the *Sing.* also. दार *m.* (wife) is used in the *Plu.* only.

आपः सुमनसो वर्षा अप्सराः सिकताः समाः ।
एते स्त्रियां (in the *Fem.*) बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥

उशनस् *Mas.*

प्र० उशना उशनसौ उशनसः सं० ए० व० उशन-उशनः-उशनन्

6. Mark the *Nom. Sing.* and the *Voc. Sing.* of the word. Other forms are regular, being like those of चन्द्रमस् *m.*

प्राच् *Mas.* — प्रत्यच् *Mas.*

प्र०	प्राङ्	प्राञ्चौ	प्राञ्चः	प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः
द्वि०	प्राञ्चम्	,,	प्राचः	प्रत्यञ्चम्	,,	प्रतीचः
स०	प्राचि	प्राचोः	प्राक्षु	प्रतीचि	प्रतीचोः	प्रत्यक्षु

तिर्यच् *Mas.* — उदच् *Neu.*

प्र०	तिर्यङ्	तिर्यञ्चौ	तिर्यञ्चः	उदक्	उदीची	उदञ्चि
द्वि०	तिर्यञ्चम्	,,	तिरश्चः	,,	,,	,,
च०	तिरश्चे	तिर्यग्भ्याम्	तिर्यग्भ्यः	उदीचे	उदग्भ्याम्	उदग्भ्यः

7. प्राच्, प्रत्यच्, उदच्, अन्वच्, तिर्यच्, &c., *i. e.*, nouns formed from the root अच् 'to go,' have a nasal inserted before the final letter in सर्वनामस्थान. In the भ base अ of अच् is dropped and the preceding vowel lengthened, *i. e.*, the bases are प्राच्, प्रतीच्, अनूच्, and समीच्. The भ base of तिर्यच् is तिरश्च् and उदच्, उदीच्.

युवन् *Mas.* — श्वन् *Mas.*

प्र०	युवा	युवानौ	युवानः	श्वा	श्वानौ	श्वानः
द्वि०	युवानम्	,,	यूनः	श्वानम्	,,	शुनः
स०	यूनि	यूनोः	युवसु	शुनि	शुनोः	श्वसु

8. The भ base of युवन् is यून् and of श्वन्, शुन्.

परिव्राज् *Mas.* — सम्राज् *Mas.*

प्र०	परिव्राट्-ड्	परिव्राजौ	परिव्राजः	सम्राट्-ड्	सम्राजौ	सम्राजः
तृ०	परिव्राजा	परिव्राड्भ्याम्	परिव्राड्भिः	सम्राजा	सम्राड्भ्याम्	सम्राड्भिः
सं०	परिव्राजि	परिव्राजोः	परिव्राट्सु-ट्त्सु	सम्राजि	सम्राजोः	सम्राट्सु-ट्त्सु

१. परौ व्रजेः षः पदान्ते। २ व्रश्चभ्रस्जसृजमृजयजराज भ्राजच्छशां षः॥ ८।२।३६॥

9. परिव्राज् changes its ज् to ट् or ड् before consonantal terminations. For the change of the ज् of सम्राज् to ट् or ड् *vide* Les. XXVIII (अ) (सम्यक् राजते इति सम्राट्).

तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते।
दुर्धियो वृश्चिकभिय एते।
आशीर्नमस्क्रिया वस्तुनिर्देशो वा महाकाव्यस्य मुखम्।
भो भो राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।
भोः! प्रत्यासन्नेन चन्द्रोदयेन भवितव्यं यतस्तिमिररिच्यमानं प्राचीमुखमालोकसुभगं दृश्यते।
सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे विस्मृतं खल्वेतत्।
चित्रं चित्रमिदम्। कथमेतद् विस्मृतोऽसि।
आरूढो वानरो वृक्षम्। वानरेणारूढो वृक्षः।
देवदत्तो ग्रामं गतः। गतो देवदत्तेन ग्रामः।
वासन्ती—देव अतिक्रान्ते धैर्यमवलम्ब्यताम्।
रामः—सखि किमुच्यते धैर्यमिति।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रनष्टमिव नामापि न च रामो न जीवति॥

विश्रान्तास्मि भद्रे। संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।
इतः पञ्चवटीमनुप्रविश्य गम्यतां गोदावरीतीरेण।

हे प्राणाः स गतो रामस्तदनु व्रजत द्रुतम्।
जरसा जर्जरैरङ्गैः शक्तिर्दशरथस्य का॥
कामं वनेषु हरिणास्तृणेन जीवन्त्ययत्नसुलभेन।
धनिषु न दैन्यं विदधति ते खलु पशवो वयं सुधियः॥
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
*सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥

---

* सेनानीनाम् is an आर्ष प्रयोग. The form according to Pânini is सेनान्याम्.

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥
एकोऽहमस्मीति च मन्यसे त्वं न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्मणः पापकस्य तस्यान्तिके त्वं वृजिनं करोषि ॥
मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥
आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मोऽपि जानाति नरस्य वृत्तम् ॥
लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ॥
पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे ।
मोहादवाचीमबुधाः प्रतीचीं प्राचीमुदीचीमपि पर्यटन्ति ।
सच्चिन्मये मानस एव तीर्थे स्वच्छे सुखं स्नातुमपारयन्तः ॥

Indra is the deity of the east, Varuṇa, of the west, Kubera, of the north, and Yama, of the south.

The universal monarch became ready to serve the cow in accordance with the command of the sage.

What is hard for a man of good intelligence ?

Frogs jump in lakes in the rainy season.

Śukra was the preceptor of demons. Kacha learnt the science of the *mantras* from him.

The enemy must be (भवितव्यम् with the *Inst.*) near. His arrows strike us forcibly.

You have done well in reminding me of it. I had forgotten it altogether.

Friend, the thing is past. You have no other course but to cheer up.

Nouns

अगस्त्य (अगस्त्यः)*m*. Name of a sage.
अनल (अनलः)*m*.–Fire.
अनिल (अनिलः)*m*.–The wind.
अप् *f*.–Water.
अभिलाषबन्ध (अभिलाष *m*.–Affection, बन्ध *m*.–A tie)–Bond of affection.
अवाची (*f*.of अवाच्)–The south.
अहन् *n*.–A day.
आलोक(आलोकः)*m*.–Light.
आशिस् *f*.–Blessing.
उशनस् *m*.–Śukra.
उदीची (*f*. of उदच्)–The north.
कलाप (कलापः) *m*.–A collection.
कवि *m*.–A wise man.
केशपाश *m*. (केश *m*.+पाश *m*. A collection)–A collection of hair.
गोदावरी *f*.–The Godâvarî.
चमरी *f*.–A doe.
चित्र (चित्रम्) *n*.–Wonder.
जरा *f*.–Old age.
तिमिर (तिमिरम्) *n*.–Darkness.
तिर्यच् *m*.–A lower animal.
तुरग (तुरगः) *m*.–A horse.
दुर्धी *f*. (कर्म०)–Bad intellect (दुष्टा धीः).
दैन्य (दैन्यम्) *n*.–Meanness.
धनंजय (धनंजयः) *m*.–Name of Arjuna.
नमस्क्रिया *f*.–Salutation.
पञ्चवटी *f*.–A portion of दण्डकारण्य near नाशक.
परिवत्सर (परिवत्सरः)*m*.–A year.
परिव्राज् *m*.–A recluse.
पर्वतराजपुत्री *f*. (पर्वतराज *m*.–The Himâlayas)–The daughter of हिमालय; Pârvatî.
पापक (पापकम्)*n*.–A sin.
पुनर्भू *f*.–A widow remarried.
पुंस् *m*.–A man.
पुरोधस्*m*.–A priest.
पूरुष(पूरुषः)*m*.–(1) The soul, the universal soul; (2) A man.
प्रतीची (*f*. of प्रत्यच्)–The west.
प्राची (*f*. of प्राच्)–The east.
*बृहस्पति *m*. (तत्पु०, बृहत् *f*.–Speech+पति)–Bṛihaspati.
भी *f*.–Fear.
भेक (भेकः)*m*.–A frog.
मघवन् *m*.–Indra.
मालाकार (मालाकारः)*m*.–A gardener.

---

* The word comes under the पारस्कर class in which the first member of the compound has the augment स् added to it. बृहत् drops its त् before स्. पारस्कर, name of a country, वनस्पति, प्रायश्चित्त, बृहस्पति, &c. are such words.

युवन् *m.*-A young man.

वर्षाभू *m.*-A frog.

वस्तुनिर्देश *m.* (वस्तु+*n.*-The plot of a book+निर्देश *m.*-Mention)-The mention of the plot.

वालप्रियत्व *n.* (वालप्रिय, बहु॰+त्व)-The state of having hair dear.

वृजिन (वृजिनम्) *n.*-Sin.

वृष्णि *m.*-A Yâdava.

शालीनता *f.*-Shyness.

स्कन्द (स्कन्दः) *m.*-Kârtikeya.

सहाय (सहायः) *m.*-A helper.

सुधी *f.* (कर्म॰)-Good intellect (सुष्ठु धीः).

सेनानी *m.*-A commander.

स्रज् *f.*-A garland.

स्वयंभू *m.*-Brahmâ, the Self-existent.

हरिण (हरिणः) *m.*-A deer.

Adjectives

अतिक्रान्त (*p. p.* of अति+क्रम् 1*st*, 4*th Par.*)-What is past.

अद्वितीय (बहु॰)—Having no second, peerless.

अनुबोधित (*p. p.* of अनु+बुध् 4*th Âtm.—Cau.*)-Reminded.

अपारयत् (अ+पारयत् *pres. p.* of पार् 10*th Ubh.*)-Not being able.

आन्तर-Internal.

जर्जर-Old.

द्विगुणीभूत-Doubled.

दुर्धी (बहु॰)-Of bad intellect.

धनिन्-Wealthy.

पर (*Pro.*)-Succeeding.

पापक-Sinful.

पुराण-Ancient.

प्रत्यासन्न (*p. p.* of प्रति+आ+सद् [सीद्] 1*st*, 6*th Par.*)-Near.

विश्रान्त (*p. p.* of (वि+श्रम् 4*th Par.*)-(One) whose fatigue is removed; (one) who has had rest.

विस्मृत (*p. p.* of वि+स्मृ 1*st Par.*, used both actively and passively).-1. Forgotten; 2. (One) who has forgotten.

वृश्चिकभी (बहु॰)-(One) who fears a scorpion.

शिथिल-Loose.

शून्य-Vacant; empty.

सुधी (बहु॰)-Of good intellect.

सुभग (वहु॰, भग *m.*-beauty) Handsome; beautiful.

सच्चिन्मय (सत्-Entity + चित्-Knowledge + मय-A suffix meaning 'full of')-Consisting of the Supreme Spirit who is made up of the principle of entity (सत्स्वरूप) and knowledge (चैतन्यस्वरूप).

हृच्छय (उपपदस॰, हृदि शेते इति हृच्छयः)-Lying in the heart.

Roots

अनु+प्र+विश् (अनुप्रविशति) (*6th Par.*)–To enter.

अनु+रुध् (अनुरुध्यते) (*4th Âtm.*)–To obey; to act up to; to conform to.

अव+लम्ब् (अवलम्बते) (*1st Âtm.*)–To depend upon.

प्रति+ग्रह् (प्रतिगृह्णाति-ह्णीते) (*9th Ubh.*)–To accept.

Indeclinables

द्रुतम्–Quickly.

सम्प्रति–Now.

LESSON XXXVI

TADDHITAS AND KṚITS

भीमार्जुनौ राधेयेनैवंविधेनान्येन वा न शक्येते निवारयितुम्—Bhîma and Arjuna cannot be stopped by Karṇa, son of Râdhâ, or any other such person.

वैनतेय इव विनतानन्दजननो राजासौ—This king is **विनतानन्दजनन** (**विनत+आनन्दजनन**), *i. e.*, the joy to those who bow to him completely, like Garuḍa, son of Vinatâ. (**विनता+आनन्द०**).

This is an instance of **उपमा** based upon **श्लेष**. **विनता°** has two senses, one applying to the king, the object of description (**प्रस्तुत** or **प्रकृत**), and the other to Garuḍa, other than the object of description (**अप्रस्तुत** or **अप्रकृत**). Such a figure is called **श्लेष**. **श्लेष**= Embrace (Two senses are pressed in the same words).

द्रौणायने ! अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम्—Oh! son of Droṇa! (Aśvatthâman !) enough of throwing (do not throw) yourself excessively into the fire of grief.

अलम् in the sense of 'enough' governs the *Inst.* and is also used with the *Ind. p. p.* and the *Inf.*

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते—To a Kshatriya there is nothing else beneficent than just fighting.

गतो वनं श्वो भवितेति रामः शोकेन देहे जनतातिमात्रम्—A collection of (*i. e.*, all) the subjects burnt excessively through grief at the thought that Râma would go to a forest the next day.

अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला—Enough of crying. Verily, Śakuntalâ should be made calm by you two only.

उपपन्नमेतदस्मिन्नृषिकल्पे राजनि—This is proper to a king who is like a sage.

उर्वशी चित्रलेखाद्वितीया केशिना दानवेन बन्दिग्राहं गृहीता—Urvaśî, having Chitralekhâ as her second (accompanied by Chitralekhâ), was taken prisoner by the demon Keśin.

This lesson illustrates *Taddhita* and *Kṛit* affixes.

Primary affixes or those added to Nouns, Pronouns, and Adjectives are called *Taddhita*.

There are many *Taddhita* affixes, of which a few are given below:—

१. **अपत्यवाचकः** (signifying an offspring)

अपत्य=Offsprings, whether sons or daughters, or later generations of a family.

१. अ—**रावणः** (रवणस्यापत्यम्—Son of Ravaṇa); **राघवः** (रघोरपत्यम्–Son of the family of Raghu); **पार्वती** (पर्वतस्यापत्यं स्त्री—Daughter of Parvata); **जानकी** (जनकस्यापत्यं स्त्री).

Before these affixes the final vowel is generally dropped and

the initial vowel takes *vṛiddhi*. In रघु, the final vowel is guṇated. Similarly, changes in the following words can be easily seen.

२. इ—**दाशरथिः** (दशरथस्यापत्यम्); **सौमित्रिः** (सुमित्राया अपत्यम्).

३. एय—**गाङ्गेयः** (Son of the Ganges, Bhîshma); **वैनतेयः** (son of Vinatâ; Garuḍa); **राधेयः** (son of राधा; Karṇa).

४. य, ईय, व्य—**श्वसुर्यः** (श्वसुरस्यापत्यम्); **स्वस्रीयः** (स्वसुरपत्यम्); **भ्रात्रीयः भ्रातृव्यो** वा (भ्रातुरपत्यम्).

२. **समूहवाचकः** (signifying a collection)

१. ता—**ग्रामता** (ग्रामाणां समूहः); **जनता; बन्धुता.**

३. **तदधीते तद्वेदेत्यर्थकः** (signifying 'studying it or knowing it')

(तत् signifies the base [प्रकृति] to which affixes are added.)

१. अ—**वैयाकरणः** (व्याकरणमधीते वेद वा).

२. इक—**नैयायिकः** (from न्याय); **तार्किकः** (from तर्क); **ऐतिहासिकः** (from इतिहास); **पौराणिकः** (from पुराण).

३. अक—**मीमांसकः** (from मीमांसा).

४. **तत्र भवः** (signifying 'produced from it')

१. य—**दन्त्यः** (दन्तेषु भवः)—Produced from teeth, dental; **ओष्ठ्यः** (from ओष्ठ); **कण्ठ्यः** (from कण्ठ); **तालव्यः** (from (तालु); **मूर्धन्यः** (from मूर्धन्); **प्राच्यः** (from प्राच्); **उदीच्यः** (from उदच्); **प्रतीच्यः** (from प्रत्यच्).

२. त्य—**दाक्षिणात्यः** (from दक्षिणा); **पाश्चात्यः** (from पश्चात्); **पौरस्त्यः** (from पुरस्).

३. इक—**मानसिक** (from मनस्); **शारीरिक** (from शरीर).

इक converts nouns into adjectives in different

senses:—

भाव—भाविक	प्रमाण—प्रामाणिक
धर्म—धार्मिक	निसर्ग (nature)—नैसर्गिक
दिन—दैनिक	स्वभाव—स्वाभाविक

५. तस्येदम् (signifying 'belonging or pertaining to it')

१. अ—शैवं (शिवस्येदम्) धनुः.

२. ईय—तदीय; मदीय; भवदीय; त्वदीय; अस्मदीय; युष्मदीय; अन्यदीय.

६. विकारवाचकः (signifying 'change of form')

१. मय—गोमयम् (गोर्विकारः)–Cow-dung; वाङ्मयम् (Consisting of speech)–Literature.

२. य—गव्यम्; पयस्यम्.

७. तत्र साधुः (signifying 'kind to it')

१. य–शरण्यः (शरणे साधुः—Good in affording protection).

२. एय—आतिथेयः (अतिथिषु साधुः)

८. तस्मादनपेतम् (Not fallen from it)

१. य—धर्म्यम् (धर्मादनपेतम्—not removed from duty); न्याय्यम्.

९. भाववाचकः

(तस्य भावः—signifying an abstract notion)

१. त्व, ता—गोत्वम्; गोता (cowness).

२. इमन्—प्रथिमन् (from पृथु); गरिमन् (from गुरु); लघिमन् (from लघु); म्रदिमन् (from मृदु); तनिमन् (from तनु).

३. अ—**गौरव** (from गुरु); **लाघव** (from लघु); **मार्दव** (from मृदु); **तानव** (from तनु); **कौमार** (from कुमार); **यौवन** (from युवन्); **शैशव** (from शिशु).

४. य—**पाण्डित्य** (from पण्डित); **लालित्य** (from ललित); **शौर्य** (from शूर); **स्थैर्य** (from स्थिर); **धैर्य** (from धीर). Similarly, माधुर्य; आलस्य; नैपुण्य; कौशल्य; मौर्ख्य; &c.

इमन्, अ, and य convert adjectives into abstract nouns.

१०. **उत्कर्षवाचकः** (signifying 'excellence')

१. तर, तम—लघुतर; लघुतम; उत्तर; उत्तम; पाचकतरः पाचकतम; &c. (*Vide* Les. XXII).

२. तराम्, तमाम्—नीचैस्तराम्; पचतितमाम्.

३. ईयस्, इष्ठ—लघीयस्; लघिष्ठ; &c.

११. **स्वामित्ववाचकः** (signifying 'possession')

१. मत्—मतिमत्; बुद्धिमत्; भूमिमत्; यवमत्; भगवत्; भास्वत् (*Vide* Les. XIII).

There are many other possessive affixes as under:—

वल-कृषीवल (कृषि *f.*-Agriculture; इ is lengthened); ऊर्जस्वल (ऊर्जस् *n.* Strength; lustre).

ल-पांसुल; मांसल; वातुल-वातूल (from वात).

व-केशव; अर्णव (from अर्णस् 'water' with स् dropped).

अच्(अ)-अर्शस (अर्शस् *n.* piles)-पीत (पीतं पानमस्यास्तीति) one who has drunk.

ग्मिन्—वाग्मिन् (eloquent).

यु—अहंयु (proud); शुभंयु (auspicious, blessed).

२. इन्—धनिन्; शशिन्; केसरिन्; बर्हिन्; केकिन्; दण्डिन्.

३. विन्—मायाविन्; मेधाविन्; यशस्विन्; तेजस्विन्.

४. आलु—दयालु; मायालु; कृपालु.

१२. अभूततद्भाववाचकः (signifying 'the being or doing like that denoted by the base')

१. च्वि (इ)—कृष्णीकरोति (अकृष्णः कृष्णः संपद्यते यथा तथा करोति–makes what is not black, black); लघूभवति; &c.

१३. ईषन्न्यूनतावाचकः (signifying 'a little short of')

१. कल्प—विद्वत्कल्पः (ईषदूनो विद्वान्—Like a learned man; a little short of him); द्वीपकल्पः (A little short of an island, having water on three sides).

२. देश्य—अष्टादशवर्षदेश्यः
३. देशीय—अष्टादशवर्षदेशीयः } About eighteen years.

४. बहु—बहुपटुः (ईषदूनः पटुः)–Almost clever. Mark this–The affix बहु is placed before the word.

१४. तदस्य संजातम् (signifying 'some thing formed in the base')

१. इत—तारकितं नभः (तारका अस्य संजाताः—Having stars formed in it); पुलकितं शरीरम् (Having hair on end).

१५. प्रमाणवाचकः (signifying 'measure')

१. मात्र—तावन्मात्रम् (That much).
२. दघ्न—जानुदघ्नं जलम् (Reaching up to the knee).

१६. तेन तुल्यं क्रिया चेदित्यर्थकः (signifying 'action like it')

१. वत्—ब्राह्मणवदधीते—Studies like a Brâhmin. वत् is added in the sense of 'like.' The words to which it is affixed are connected with verbs.

१७. स्वार्थिकः or स्वार्थवाचकः (conveying the sense of self)

१. धेय, य—नाम एव नामधेयम्; भाग एव भागधेयम्; चत्वारो वर्णाश्चातुर्वर्ण्यम्;

उपमा एव औपम्यम्; संनिधिरेव सांनिध्यम्; माला एव माल्यम्; इदंपरमेवैदंपर्यम्- 'इदं त्वैदंपर्यम्' (मालतीमाधव)-It comes to this; सुखमेव सौख्यम्.

२. क, ता, अ—बाल एव बालकः; मृदेव मृत्तिका: देव एव देवता; प्रज्ञ एव प्राज्ञः; पुत्र एव पुत्रकः; बन्धुरेव बान्धवः.

१८. प्रशंसावाचक: (signifying 'praise')

१. रूप-प्रशस्तः पटुः पटुरूपः-Very clever; युक्तरूपमिदं त्वयि (अतिशयेन युक्तम्).

१९. निन्दावाचक: (signifying 'censure')

१. पाश—कुत्सितो भिषक् भिषक्पाशः.

20. Various Senses of क

१ कुत्सा-निन्दा—	अश्वकः	(कुत्सितोऽश्वः)
२ अनुकम्पा	पुत्रकः	(अनुकम्पितः पुत्रः)
३ लघुता—	मठिका	(अल्पो मठः)
४ वात्सल्य—	पुत्रकः	(प्रियः पुत्रः)
५ स्वार्थ—	अविकः	(अविरेव) (अवि *m.*, *f.*-a sheep)

21. चर, तिथ

चर-आढ्यचरः (Formerly rich); ज्ञातचरमेतत्.

तिथ—बहुतिथः (much) कालो गतः.

KṚIT AFFIXES

Primary affixes which are added to roots are called *Kṛit* affixes. Words ending in *Kṛit* affixes are called *Kṛidanta* (Participles).

१. Present, Past, Indeclinable Past, and Potential Participles, and Infinitives have already been treated.

२. भविष्यकृदन्त (Future Par.)—भू—भविष्यत् (*f.* भविष्यती-न्ती); कृ *Ātm.*—करिष्यमाण (*f.* करिष्यमाणा).

३. परोक्षभूतकृदन्त (Perfect Par.)—सद्-सेदिवस्; श्रु- शुश्रुवस्; कृ-चकृवस् (*Par.*); चक्राण (*Ātm.*); उप+इ-उपेयिवस्; अधि+वस्-अध्यूषिवस्.

४. अम् (णमुल्)—अम् is added to roots in the sense of repetition of the action denoted by them.

स्मारं स्मारं नमति शिवम्-Bows to Śiva, constantly remembering him.

पा—पायं पायम्; श्रु—श्रावं श्रावम्.

समूलघातं हन्ति—Destroys completely. जीवग्राहं गृह्णाति—Seizes alive. बन्दिग्राहं गृह्णाति—Takes captive.

८. कर्तृवाचक कृदन्त (signifying an agent)—तृ and अक are added to roots in this sense.

कृ-कर्तृ, कारक; पठ्-पठितृ, पाठक; नी-नेतृ, नायक.

९. भाववाचक प्रत्यय—Affixes forming verbal or abstract nouns.

(*a*) ति-बुद्धि, मति, गति, स्थिति, नीति, ग्लानि, म्लानि, इष्टि, उक्ति (all *fem.*).

The changes before this affix are in general similar to those before the त of the Past Par.

(*b*) अन—वाचन, करण, भजन, कीर्तन, मनन, दर्शन, श्रवण, &c. (all *neu.*)

(*c*) अ—जय, भय, काम, पाक, योग (all *mas.*).

वार्धके दृष्टिर्लुप्यति बधिरता वर्धते दन्तावलिश्च भ्रष्टा भवति।

सखे! प्रतीक्षस्व माम्। अहमपि भवन्तमनुयामि। न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी। कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपद उत्सृज्य प्रयासि। कुतस्तवेयमतिनिष्ठुरता। कथय त्वदृते क गच्छामि। शून्या मे दिशो जाताः। तदुत्तिष्ठ। देहि मे विलपतः प्रतिवचनम्।

न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते न च मृगाः सन्तीति यवा नोप्यन्ते।

कश्चित् कंचित् तन्तुवायमाह। अस्य सूत्रस्य शाटकं वय इति। स पश्यति। यदि शाटको, न वातव्यः। अथ वातव्यो, न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धम्। भाविनी खल्वस्य संज्ञाभिप्रेता। स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवति।

सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहङ्गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादतलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुम्।

जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड् विकाराः।

एह्येहि वत्स रघुनन्दन रामभद्र
चुम्बामि मूर्धनि चिराय परिष्वजे त्वाम् ॥

स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित् ।
वीक्षमाणो मृगं रामश्चित्रवृत्तिं विसिष्मिये ॥
नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ।
दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥
सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।
किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदयः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासंचयः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
सुखदुःखावृते लोके नास्ति सौख्यमनन्तकम् ॥
तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥
इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥

Satyavrata had a son, by name Triśaṅku. He obtained the state of a Chaṇḍâla through the curse of Vasishṭha. He, however, went to Heaven, alive, through the might of Viśvâmitra. But when he went there, gods hurled him down. He was, however, stopped in the middle by Viśvâmitra by his power of penance.

Not that corn is not grown because there are creatures who eat it away.

You are very cruel indeed, you have left me all of a sudden.

Your statement that the water is at once hot and cold is contradictory.

Nouns

अतिनिष्ठुरता *f.*–Great severity.

अन्तर्दाह (अन्तर्दाहः) *m.*–Inward burning.

अवबोध (अवबोधः) *m.*–Knowledge.

अश्व (अश्वः) *m.*–A horse; it signifies the number seven (the sun's horses being seven).

आवलि *f.*—A row; a collection.

इन्दिरा *f.*–Lakshmî.

इन्दीवर (इन्दीवरम्) *n.*–A blue lotus.

इन्दु *m.*–The moon; it signifies the number one.

कन्दल (कन्दलः-लम्); *m.*, *n.*–1. A bud; 2. A collection.

केशिन् *m.*–Name of a demon.

गति *f.*–Knowledge.

गेह (गेहम्) *n.*–A house.

ग्रह (ग्रहः) *m.*–A planet; it signifies the number nine.

तनू *f.*–The body.

तन्तुवाय (तन्तुवायः) *m.*–A weaver.

दल (दलम्) *n.*–A leaf.

दुर्वासना *f.*–Evil propensity.

दृश् *f.*–Sight.

द्वैतान्धकारोदय *m.*–(द्वैत *n.* Duality +अन्धकार *m.* Darkness, ignorance +उदय *m.*–Rise)–Rise of the darkness caused by duality.

पादपद्म (पादपद्मम्) *n.* (कर्म०, पाद *m.*+पद्म *n.*)–A lotus-like foot.

बन्दिन् *m.*–A prisoner.

भजन (भजनम्) *n.*–Worship.

भाजन (भाजनम्) *n.*–A receptacle.

मन्दार (मन्दारः) *m.*–One of the five कल्पवृक्ष's.

मुनि *m.*–A sage; it signifies the number seven.

यदुनन्दन *m.* (यदूनां नन्दनः)–Joy of the Yâdavas or descendants of Yadu; Śrîkṛishṇa.

यव (यवः) *m.*–A barley-grain.

विहङ्गम (विहङ्गमः) *m.*–A bird.

वेद (वेदः) *m.*–It signifies the number four.

शाटक (शाटकः-कम्) *m.*, *n.*–A cloth.

शार्दूलविक्रीडित (शार्दूलविक्रीडितम्) *n.*–Name of a metre.

संचय (संचयः) *m.*–A collection.

सूर्य (सूर्यः) *m.*–The sun; it signifies the number twelve.

स्थाली *f.*–A cooking pot.

हय (हयः) *m.*–A horse; it signifies the number seven.

हरि *m.*–Vishṇu.

हरिणी *f.*–Name of a metre.

Adjectives

अच्छ–Pure.

अदृष्टपूर्व–Not seen before.

अपरिचित (अ+परि+चित *p. p.* of चि *5th Ubh.*)–Not known.

अभिप्रेत (*p. p.* of अभि+प्र+इ *2nd par.*, *f.* °प्रेता)–Wished.

आश्चर्यभूत–What causes surprise.

ईश्वर–Powerful; able.

कठोर–Hard.

गाढोद्वेग (बहु°, गाढ *Adj.*–Deep+ उद्वेग *m.*–Grief)–(That) which has deep grief.

चित्रवृत्ति (बहु°, चित्र *Adj.*–Strange +वृत्ति *f.*–Conduct)–Of strange conduct.

निखिल–All; the whole.

भाविन् (*f.* भाविनी)–What is to happen.

भ्रष्ट (*p. p.* of भ्रंश् *1st Âtm.*, *4th Par.*)–Fallen.

मर्मच्छेदिन् (मर्मन् *n.*–The vitals+ छेदिन्–Cutting)–Cutting the vitals.

लोकोत्तर–The best in the world; extraordinary; uncommon.

वन्दारु–Accustomed to bow; humble; (one) that salutes the venerable.

विकल–Under control, subjected, subdued.

विप्रतिषिद्ध (*p. p.* of वि+प्रति+ सिध् *4th Par.*)–Contradictory.

विलपत् (*Pres. p.* of वि+लप् *1st Par.*)–Bewailing.

विवृत (*p. p.* of वि+वृ *1st*, *5th*, *9th Ubh.*)–Opened.

श्याम–Black.

शून्य–Void.

सतत–Everlasting.

Roots

अधि+श्रि (अधिश्रयति-ते) (*1st Ubh.*)–To cook.

अनु+या (अनुयाति) (*2nd Par.*) To go after.

अप+क्षि (अपक्षयति) (*1st Par.*)– To waste away.

कृत् [कृन्त्] (कृन्तति) (*6th Par.*)– To cut.

ज्वल् (ज्वलति) (1st *Par.*)-To burn.

दल् (दलति) (1st *Par.*)-To burst; to be torn.

प्रति+ईक्ष् (प्रतीक्षते) (1st *Âtm.*)-To await.

लुप् (लुप्यति, लुम्पति-ते) 4th *Par.*, 6th *Ubh.*)-To drop.

वप् (वपति-ते) (1st *Ubh.*)-To sow.

वि+परि+नम् (विपरिणमति-ते) (1st *Ubh.*)-To be changed or turned into something new.

वि+स्मि (विस्मयते) (1st *Âtm.*)-To be astonished.

वे (वयति-ते) (1st *Ubh.*)-To weave.

Indeclinables

अवस्थातुम् (*Inf.* of अव+स्था)-To stay.

इति कृत्वा-Having thought so.

एकपदे-At once; suddenly.

भस्मसात् (भस्मन् *n.* ashes+सात्-a Taddhita affix signifying 'dependent')-Reduced to ashes.

स्तनसंबाधम् (स्तनौ संबाध्य, णमुल्)-Having beaten breasts.

LESSON XL

The Aorist

सुरथो नाम राजाभूत् समस्ते क्षितिमण्डले—In the whole circle of the earth, there was a king called Suratha.

बाल ! मृत्योर्मा भैषीः—Oh ! child ! do not fear death.

With मा the Aorist has the sense of the Imperative. The augment अ or आ is not used in this case.

भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः—Though offended by your lord, do not go against him (oppose him) through anger.

When मा स्म is used with an Aorist form, it has the sense of the Imperative and does not take the augment अ or आ.

व्यजेष्ट षड्वर्गमरंस्त नीतौ—He conquered the collection of six internal enemies (काम-passion, क्रोध-anger,

लोभ–avarice, मोह–infatuation, मद–pride, and मत्सर–jealousy) and sported in good morals.

This lesson illustrates the Aorist. It originally signified immediate past. It is अद्यतनभूतकाल.

भू—अभूत् अद्यतनभू॰ तृ॰ ए॰ व॰—To-day's or near past time.
अभवत् अनद्यतनभू॰ ,,—Not to-day's or a little remote past time.
बभूव परोक्षभू॰ ,, —Remote past time.

As in the Imperfect, so in the Aorist also, roots take the augment अ or आ. The forms can thus be easy to recognise. It has seven varieties, of which the fourth and the fifth are general.

4*th* and 5*th* Varieties

1. *Aniṭ* roots take the fourth variety, *Seṭ* roots, the fifth, and *Veṭ* roots, both varieties.

	4*th* Variety			5*th* Variety		
	जि *Par.*			वद् *Par.*		
1*st pers.*	अजैषम्	अजैष्व	अजैष्म	अवादिषम्	अवादिष्व	अवादिष्म
2*nd* ,,	अजैषीः	अजैष्टम्	अजैष्ट	अवादीः	अवादिष्टम्	अवादिष्ट
3*rd* ,,	अजैषीत्	अजैष्टाम्	अजैषुः	अवादीत्	अवादिष्टाम्	अवादिषुः
	विजि *Âtm.*			शी *Âtm.*		
1*st*	व्यजेषि	व्यजेष्वहि	व्यजेष्महि	अशयिषि	अशयिष्वहि	अशयिष्महि
2*nd*	व्यजेष्ठाः	व्यजेषाथाम्	व्यजेढ्वम्	अशयिष्ठाः	अशयिषाथाम्	अशयिध्वम्-ढ्वम्
3*rd*	व्यजेष्ट	व्यजेषाताम्	व्यजेषत	अशयिष्ट	अशयिषाताम्	अशयिषत

From this the terminations will be found to be as under:—

4*th* Variety

	Par.			*Âtm.*		
1*st pers.*	सम्	स्व	स्म	सि	स्वहि	स्महि
2*nd* ,,	सीः	स्तम्	स्त	स्थाः	साथाम्	ध्वम्
3*rd* ,,	सीत्	स्ताम्	सुः	स्त	साताम्	सत

5*th* Variety

	Par.			*Âtm.*		
1*st pers.*	इषम्	इष्व	इष्म	इषि	इष्वहि	इष्महि
2*nd* ,,	ईः	इष्टम्	इष्ट	इष्ठाः	इषाथाम्	इध्वम्
3*rd* ,,	ईत्	इष्टाम्	इषुः	इष्ट	इषाताम्	इषत

कृ (पर०)—अकार्षीत् अकार्ष्टाम् अकार्षुः; (आत्म०)—अकृत

पच्—अपाक्षीत्	अपाक्ताम्	अपाक्षुः
यज्—अयाक्षीत्	अयाष्टाम्	अयाक्षुः
चर्—अचारीत्	अचारिष्टाम्	अचारिषुः
चल्—अचालीत्	अचालिष्टाम्	अचालिषुः
व्रज्—अव्राजीत्	अव्राजिष्टाम्	अव्राजिषुः
गद्—अगदीत्-गादीत्	अगदिष्टाम्-गादिष्टाम्	अगदिषुः-गादिषुः
तॄ—अतारीत्	अतारिष्टाम्	अतारिषुः

जागृ—अजागरीत्; हस्—अहसीत्; मुद्—अमोदिष्ट

हन्—अवधीत्-अवधिष्टाम्-अवधिषुः

Rules of *Guṇa* and *Vṛiddhi*

1. नी-अनैषीत्, रुध्-अरौत्सीत्—In the 4*th* Variety *Par.* the vowel of a root takes *vṛiddhi.*

2. व्यजेष्ट; अकृत—In the 4*th* Variety *Âtm.* the ending इ and उ take *guṇa* and the other vowels remain unchanged.

3. अतारीत्, अचारीत्, अचालीत्, अवादीत्, अव्राजीत्—In the 5*th* Variety *Par.* the ending vowel and the penultimate अ of roots ending in र् and ल् and of वद् and व्रज् take *vṛiddhi*.

4. नद्-अनदीत्-नादीत्—In the 5*th* Variety *Par.* the penultimate अ of roots ending in any consonant except र् and ल् takes *vṛiddhi* optionally.

5. अजागरीत्, अहसीत्, अश्वयीत्, अश्वसीत्—जागृ, हस्, श्वि, श्वस्, and some other roots do not take *vṛiddhi*.

6. अशयिष्ट; मुद्-अमोदिष्ट—In the 5*th* Variety *Âtm.* the ending vowel and the penultimate short vowel take *guṇa*.

रुध् (पर०)—*3rd pers.*	अरौत्सीत्	अरौद्धाम्	अरौत्सुः
कृ (आत्म०)—*3rd pers.*	अकृत	अकृषाताम्	अकृषत
2nd pers.	अकृथाः	अकृषाथाम्	अकृढ्वम्

Rules of *Sandhi*

1. अरुध्+स्तम्+अरौध्+स्तम्=अरौध्+तम्=अरौध्+धम्=अरौद्+धम्—अरौद्धम्—स्तम्, स्त, and स्ताम् preceded by consonants other than nasals and semi-vowels drop स्.

2. अकृथाः, अकृत—स्थाः and स्त drop स्, when preceded by ऋ.

3. The rules for the change of ध्वम् to ढ्वम् necessarily and optionally are the same as those for the change of ध्वे to ढ्वे in the Perfect.

पद्-अपादि अपत्साताम् अपत्सत; जन्-अजनि-अजनिष्ट अजनिषाताम् अजनिषत; दीप्-अदीपि-अदीपिष्ट अदीपिषाताम् अदीपिषत; बुध्-अबोधि—अबुद्ध अभुत्साताम् अभुत्सत—

4. इ is the *3rd pers. sing.* termination in the case of पद् and the form is अपादि. It is optionally added in the case of दीप्, जन्, and बुध्.

6*th* Variety

नम् *Par.*

1*st pers.*	अनंसिषम्	अनंसिष्व	अनंसिष्म
2*nd* ,,	अनंसीः	अनंसिष्टम्	अनंसिष्ट
3*rd* ,,	अनंसीत्	अनंसिष्टाम्	अनंसिषुः

यम्—अयंसीत्; विरम्—व्यरंसीत्; but रम् *Âtm.*—अरंस्त, अरंसाताम्, अरंसत; अरंस्थाः, अरंसाथाम्, अरन्ध्वम्

पा (To protect)—अपासीत्; ज्ञा—अज्ञासीत्.

1. This variety applies to *Par.* roots only.

2. यम्, रम्, नम्, and roots ending in आ take this variety.

1*st* Variety

	दा *Par.* (1*st* Variety)			दा *Âtm.* (4*th* Variety)		
1*st pers.*	अदाम्	अदाव	अदाम	अदिषि	अदिष्वहि	अदिष्महि
2*nd* ,,	अदाः	अदातम्	अदात	अदिथाः	अदिषाथाम्	अदिढ्वम्
3*rd* ,,	अदात्	अदाताम्	अदुः	अदित	अदिषाताम्	अदिषत

पा 'to drink'—अपात्; स्था—अस्थात्.

इ 'to go'—*3rd p.* अगात् अगाताम् अगुः; *2nd p.* अगाः अगातम् अगात.
भू—*3rd p.* अभूत् अभूताम् अभूवन्; *1st p.* अभूवम् अभूव अभूम.

1. दा, धा, roots assuming the forms दा and धा (*Vide* Les. 36, r. 18), स्था, गै (substitute for इ 'to go'), पा 'to drink,' and भू take this variety. This variety is, like the sixth, exclusively *Par.*

2. अदित, अस्थित—दा, धा, and स्था when *Âtm.*, take the fourth variety since they are *Aniṭ*. They change their आ to इ.

7th Variety

विष् *Par.*

1st pers.	अविक्षम्	अविक्षाव	अविक्षाम
2nd ,,	अविक्षः	अविक्षतम्	अविक्षत
3rd ,,	अविक्षत्	अविक्षताम्	अविक्षन्

द्विष् *Âtm.*

1st pers.	अद्विक्षि	अद्विक्षावहि	अद्विक्षामहि
2nd ,,	अद्विक्षथाः	अद्विक्षाथाम्	अद्विक्षध्वम्
3rd ,,	अद्विक्षत	अद्विक्षाताम्	अद्विक्षन्त

अविश्+सम्=अविष्+सम् (Les. 28, r. [अ])=अविक्+सम् (Les. 28, r. [ए])=अविक्+षम्=अविक्षम्. अगुह्+सम्=अगुढ्+सम्=अघुढ्+सम्=अघुक्+सम्=अघुक्+षम्=अघुक्षम्; कृष्-अकृक्षम्.

लिह् *1st p.* अलिक्षि-अलिक्षावहि or अलिह्वहि-अलिक्षामहि; *2nd p.* अलिक्षथाः or अलीढाः-अलिक्षाथाम्-अलिक्षध्वम् or अलीढ्वम्; *3rd p.* अलिक्षत or अलीढ; the forms of दिह्, दुह्, and गुह् are similar.

The rule:—

1. लिह्-अलिक्षत्, दुह्-अधुक्षत्, कृष्-अकृक्षत्—*Aniṭ* roots, ending in श्, ष्, स्, or ह् and having इ, उ, ऋ, or ऌ for their penultimate, take this variety.

2. अलीढ-अलिक्षत—लिह्, गुह्, दिह्, and दुह् have optional forms in *Âtm. 3rd pers. Sing., 2nd pers. sing.* and *plu.*, and *1st pers. dual*. They are made up by adding त, थास्, ध्वम्, and वहि.

2nd Variety

This variety has three kinds of roots:—

(1) Those that take it necessarily; (2) Those that take it optionally; (3) Certain *Âtm.* roots belong to this variety optionally and take *Par.* terminations when they take it. The terminations are the same as those of the Imperfect.

A few important roots of each class are as under:—

(१) गम्, शक्, *शम्, तम्, दम्, श्रम्, भ्रम्, क्षम्, मद्, पत्, (पप्त्), वच् (वोच्), ख्या (ख्य्), अस् (अस्थ्), नश्, आप्, द्रुह्, मुह्, स्नुह्, स्निह्, मुच्, लुप्, सिच्, शास् (शिष्), शिष्, ह्वे (ह्व्).

(२) रुध्, भिद्, रिच्, छिद्, युज्, रुद्, दृश् (दर्श्), तृप्, दृप्.

(३) वृत्, वृध्, कृप्, स्यन्द्, रुच्, द्युत्.

गम्

1st pers.	अगमम्	अगमाव	अगमाव
2nd ,,	अगमः	अगमतम्	अगमत
3rd ,,	अगमत्	अगमताम्	अगमन्

वच्—अवोचत्; पत्—अपप्तत्; दृश्—अदर्शत्–अद्राक्षीत्; छिद्—अच्छिदत्—अच्छैत्सीत्; वृत्—अवृतत्–अवर्तिष्ट.

3rd Variety

1. Roots of the tenth conjugation, causals, and other derived roots take this variety.

The terminations are the same as those of the Imperfect.

चुर्—*3rd pers.* अचूचुरत् अचूचुरताम् अचूचुरन्

चोरय—चोर्–चुर्–चुचुर्–चूचुर्–अचूचुरत्

कारय—कार्–कर्–चकर्–चिकर्–चीकर्–अचीकरत्

2. (a) The base drops अय; (b) The vowel is shortened; (c) The root is then reduplicated; (d) the अ of the reduplicative syllable is changed to इ if the following syllable is short; (e) The vowel of the reduplicative syllable, if short, is generally lengthened.

---

* शमादि roots (शम्, तम्, दम्, श्रम्, भ्रम्, क्षम्, and मद्).

3. The following are some of the irregular forms of this variety:—

अट्—आटिटत्; अर्ह्—आर्जिहत्; ऋ—आर्पिपत्; अर्द्—आर्दिदत्; कथ्—अचकथत्; स्मृ—असस्मरत्; पीड्—अपीपिडत्—अपिपीडत्; स्था—अतिष्ठिपत्; पा—अपीप्यत्; लभ्—अललम्भत्; वृत्—अववर्तत्—अवीवृतत्.

मया अभाणि—It was said by me.

4. Passive or Impersonal Forms—These forms are made up by applying *Âtm.* terminations.

भण्—अभाणि	अभाणिषाताम्	अभाणिषत
दा—अदायि	अदायिषाताम्	अदायिषत
छिद्—अच्छेदि	अच्छित्साताम्	अच्छित्सत

5. इ is the termination of the 3*rd pers. sing.* Before it, the ending vowel and the penultimate अ take *vṛiddhi* and roots ending in आ take the augment य्. Any other penultimate short vowel takes *guṇa*.

अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषम् ।

शुकनासोऽपि महान्तं कालं तं राज्यभारमनायासेनैव प्रज्ञाबलेनाभार्षीत् । यथैव राजा सर्वकार्याण्यकार्षीत्तद्वदसावपि द्विगुणितप्रज्ञानुरागश्चकार ।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा क्वाहमगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन् क्षणे किमतिकठिनतयास्य मूढहृदयस्य किमनेकदुःखसहस्रसहिष्णुतया हतशरीरस्य किं विहिततया शोकस्य किं भाजनतयास्य जन्मान्तरोपात्तस्य दुष्कृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य केन हेतुना नोद्गच्छन्ति स्म तदपि नावेदिषम् ।

*न तथा बाधते शीतं यथा बाधति बाधते ।

मुक्त्वा निःश्रीकमप्यब्जं मराली न गतान्यतः ।
भ्रमराली त्वगाद्वेगादिदं सदसदन्तरम् ॥
निर्विषेणापि सर्पेण कर्तव्या महती फटा ।
विषं भवतु मा भूद्वा फटाटोपो भयंकरः ॥
नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥
सूर्याचन्द्रमसोर्मार्गं नक्षत्राणां गतिं तथा ।
शैलराजो वृणोत्येष विन्ध्यः क्रोधवशानुगः ॥
तं निवारयितुं शक्तो नान्यः कश्चिद् द्विजोत्तम ।
ऋते त्वां हि महाभाग तस्मादेनं निवारय ॥
चिन्ता शशाम सकलापि सरोरुहाणा-
मिन्दोश्च बिम्बमसमां सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधि त्वमितो गतासि ॥
मा निषाद प्रतिष्ठां †त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥
यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥
मा भैष्ट‡ विद्वंस्तव नास्त्यपायः

---

* The root बाध् is *Âtm*. "Cold does not afflict me so much," says a man, "as your use of the wrong form बाधति for the correct form बाधते." बाधति means बाधति इति प्रयोगः.

† Here the augment is used. The form is therefore आर्ष.

‡ There is no scope for fear in the Vedântic idea of oneness. The thought of duality or plurality is connected with fear; and so the *plu.* is used.

संसारसिन्धोस्तरणेऽस्त्युपायः ।
येनैव याता यतयोऽस्य पारं
तमेव मार्गं तव निर्दिशामि ॥
अस्त्युपायो महान् कश्चित् संसारभयनाशनः ।
तेन तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यसि ॥
वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम् ।
तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु ॥
शब्दजालं महारण्यं चित्तविभ्रमकारणम् ।
अतः प्रयत्नाज् ज्ञातव्यं तत्त्वज्ञात्तत्त्वमात्मनः ॥

Night itself ceased (passed away) of Râma and Sîtâ talking of love.

All his objects bore fruit.

I asked him, "When did you return from Bombay ?"

The king told his minister, "I verily see my life fruitless."

He gave much *Dakshiṇâ* to Brâhmins.

Oh ! Lord ! if heat is possible in the moon or cold in the sun, then is fault possible in the prince.

Then, as days rolled on, the cat took the young ones of that bird out of the hollow of the tree and ate them up.

Whoever is attentive to his duty and works harder and harder every day succeeds in life.

Nouns

अतिकठिनता *f.*–Great severity.
अनुराग (अनुरागः) *m.*–Love.
अन्तर (अन्तरम्) *n.*–Distance.
अपाय (अपायः) *m.*–Destruction.
अब्ज (अब्जम्) *n.*–A lotus.
असु *m.*–Life (Used in the *Plu.* like **प्राण**).
आली *f.*–A row, a line.
कलकल (कलकलः) *m.*–Uproar; noise.
क्रौञ्चमिथुन (क्रौञ्चमिथुनम्) *n.* **क्रौञ्च** *m.* Name of a bird+**मिथुन** *n.*

a pair) A pair of Krauñcha birds.

तरण (तरणम्) *n.*–The act of swimming.

दग्धदैव (दग्धदैवम्) *n.*–(दग्ध *p. p.* of दह् 1*st Par.*–accursed+ दैव *n.* fate)–Accursed fate.

दुष्कृत (दुष्कृतम्) *n.*–An evil act; sin.

निषाद (निषादः) *m.*–A barbarous tribe.

प्रतिष्ठा *f.*–Respect.

फटा *f.*–Hood.

फटाटोप (फटाटोपः) *m.* फटा *f.*+ आटोप *m.*–Expansion, pomp, show)–Pompous expansion of the hood of a serpent.

बिम्ब (बिम्बम्) *n.*–Disc.

भवाम्भोधि *m.* (भव *m.*–The world +अम्भोधि *m.*–An ocean)– The ocean of the world.

भाजनता *f.*–The state of being a receptacle.

भ्रमराली *f.*–(भ्रमर *m.*–a bee+आली *f.* a row)–A row of bees.

मराली *f.*–A female swan.

मूर्च्छा *f.*–Swoon; an unconscious state.

राज्यभार (राज्यभारः) *m.*–The burden of the kingdom.

विभ्रम (विभ्रमः) *m.*–Wandering; delusion.

विहितता *f.*–The state of being destined.

शकल (शकलः) *m.*–A piece.

शकृत् *n.*–Dung.

शब्दजाल (शब्दजालम्) *n.* (शब्द *m.* +जाल *n.* A collection)–A collection of words.

शीत (शीतम्) *n.*–Cold.

शुकनास (शुकनासः) *m.*–Name of a minister.

श्वजन (श्वन् *m.*–A dog+जन *m.*– It signifies a collection)– Dogs.

संसारसिन्धु *m.*–The ocean of the world.

समा *f.* (Used in the *Plu.*)– A year.

सहिष्णुता *f.*–Forberance.

सरोरुह (सरोरुहम्, सरस् *n.*–A lake +रुह् 1*st Par.* To grow) *n.*– That which grows in a lake; a lotus.

सुषमा *f*–Beauty.

स्वजन (स्वजनः) *m.*–Relations.

हतशरीरम् (हतशरीरम्) *n.* (हत *p. p.* of हन्, 2*nd Par.*–Accursed+शरीर *n.*)–The accursed body.

Adjectives

अनुग-Following.

अन्यत्रमनस् (बहु०)-(One) whose mind is elsewhere.

अभ्युद्गत (*p. p.* of अभि+उद्+गम् 1*st Par.*)-Produced.

आत्यन्तिक-Complete. [duced.

उद्भूत (*p. p.* of उद्+भू)-Pro-

उपात्त (*p. p.* of उप+आ+दा 3*rd Ubh.*)-Done; performed.

गुणग्रहीतृ (गुण *m.* 1. Merit, 2. A rope)-1. Appreciating merits; 2. Holding a rope.

द्विगुणित-Twofold.

नाशन-Destroyer.

निपुण-Clever.

निर्विष (बहु०)-(That) from which poison is gone; without poison.

निःश्रीक (बहु०)-(That) from which splendour is gone; without splendour.

नीच-1. Deep; 2. Base; low.

महाभाग-Of great fortune; fortunate.

मोहित (*p. p.* of मुह् 4*th Par. Cau.*)-Infatuated.

रोषण-Angry.

विप्रकृत (*p. p.* of वि+प्र+कृ 8*th Ubh.*)-Despised; insulted.

शाश्वत (*f.* शाश्वती)-Eternal.

सकल-(बहु०, कलाभिरवयवैः सहितः सकलः)-All.

सरस (बहु०)-1. Full of water; 2. Possessed of taste or appreciating faculty.

Roots

निर्+दिश् (निर्दिशति) (6*th Par.*)-To show.

नि+वृ (निवारयति *Cau.* वृ 1*st*, 5*th*, 9*th*, 10*th Ubh.*)-To prevent.

वि+लप् (विलपति) (1*st Par.*)-To bewail.

वृ (वृणोति-ते) (5*th Ubh.*)-To cover.

Indeclinables

अनायासेन (*Inst. Sing.* of अनायास *m.*)-Without difficulty.

अनु-Afterwards.

इतः-Hence.

नितराम्-Exceedingly.

मा-Not (Used with the Aorist in the sense of the Imperative).

प्रतीपम्-Adverse; to a contrary way.

यदवधि-From which time.

सकृत्-Once.

स्म-1. It is used with the Present and gives it the sense of the Past; 2. It is used along with मा with the Aorist in the sense of the Imperative.

LESSON XLI

The Benedictive, the Desiderative, the Frequentative, and Nominal Verbs

कुशलं ते भूयात्—May thy welfare be—may thou be happy!

केशवो वः शिवं दद्यात्—May Keśava give you welfare!

शिवो वः श्रियं पुष्यात्–May Śiva nourish your prosperity!

राजन् दुधुक्षसि यदि क्षितिधेनुमेतां तेनाद्य वत्समिव लोकममुं पुषाण—Oh! king! if thou wishest to milk this cow of the earth, do thou nourish now these calf-like people.

क्षितिधेनुम् is a कर्मधारय compound and may be dissolved in two ways:—1. क्षितिरिव धेनुः क्षितिधेनुस्ताम् or 2. क्षितिर्धेनुरिव क्षितिधेनुस्ताम्. In the first विग्रह or dissolution, धेनु is the principal word and the figure of speech is रूपक or metaphor; in the 2nd विग्रह, क्षिति is the principal word and the figure is उपमा or simile. We have वत्समिव लोकम् and not लोकमेव वत्सम्. The figure is therefore उपमा and the compound is to be dissolved as क्षितिर्धेनुरिव क्षितिधेनुस्ताम्.

दिशि मन्दायते तेजो दक्षिणस्यां* रवेरपि—In the southern direction the lustre of even the sun becomes weak.

तेजोभी रविरिव जाज्वल्यमानोऽयं नृपः—By his manifold lustre this king shines exceedingly like the sun.

General rules for the formation of Causal forms (प्रेरक or णिजन्त) are given before. A few irregular forms are given below.

दा—दापयति-ते; स्था-स्थापयति-ते; म्लै-म्लापयति-ते; क्षै-क्षपयति-ते
ऋ—अर्पयति-ते; ह्री-ह्रेपयति-ते; जि-जापयति-ते; क्री-क्रापयति-ते;
अधि+इ-अध्यापयति-ते.
पा (To drink)-पाययति-ते; पा (To protect)-पालयति-ते.
रुह्—रोहयति-ते, रोपयति-ते; हन्-घातयति-ते.
लभ्—लम्भयति-ते; रभ्-रम्भयति-ते.

---

* For the forms of दक्षिण *Vide p.* 210, foot-note.

नम्—नमयति-ते; नामयति-ते; स्ना-स्नापयति-ते; स्नपयति-ते. उन्नम्-उन्नमयति-ते.

This lesson treats of the Benedictive, the Desiderative (सन्नन्त),* the Frequentative (यङन्त), and Nominal Verbs (नामधातु).

The Benedictive

	भू *Par.*			कृ *Âtm.*		
1st *pers.*	भूयासम्	भूयास्व	भूयास्म	कृषीय	कृषीवहि	कृषीमहि
2nd ,,	भूयाः	भूयास्तम्	भूयास्त	कृषीष्ठाः	कृषीयास्थाम्	कृषीढ्वम्
3rd ,,	भूयात्	भूयास्ताम्	भूयासुः	कृषीष्ट	कृषीयास्ताम्	कृषीरन्

जि-जीयात्-जेषीष्ट; स्तु-स्तूयात्-स्तोषीष्ट; यज्-इज्यात्-यक्षीष्ट; वच्-उच्यात्; दा-देयात्-दासीष्ट; पा-पेयात्, स्था-स्थेयात्.

The Benedictive expresses a blessing or a good wish.

Rules:—

1. *Par.* terminations यासम्, यास्व, यास्म, &c. are weak. The changes before them are in general the same as before the य of the Passive or the Impersonal (क्रियात्, शस्यात्, अर्यात्, स्मर्यात्).

2. जेषीष्ट, स्तोषीष्ट, कृषीष्ट—The *Âtm.* terminations are strong. The Rules of the *guṇa* and of the change of षीध्वम् to षीढ्वम् are the same as in the Aorist 4*th* Variety, *Âtm.*

सन्नन्त (The Desiderative)

भू—बुभूषति (भवितुमिच्छति)	कृ—चिकीर्षति
पा—पिपासति (पातुमिच्छति)	ग्रह्—जिघृक्षति
जि—जिगीषति	दा—दित्सति
हन्—जिघांसति	धा—धित्सति
चि-चिचीषति-चिकीषति	आप्—ईप्सति
ज्ञा—जिज्ञासते } Take *Âtm.* terminations.	रभ्—रिप्सते
श्रु—शुश्रूषते } Take *Âtm.* terminations.	मृ—मुमूर्षति (*Par.*)
दृश्—दिदृक्षते } Take *Âtm.* terminations.	तॄ—तितीर्षति, तितरिषति, तितरीषति
स्मृ—सुस्मूर्षते } Take *Âtm.* terminations.	लभ्—लिप्सते
मुच्—मुमुक्षति	
स्वप्—सुषुप्सति	पत्—पित्सति-पिपतिषति

* सन् (स) and यङ् (य, ङ् indicative of *Âtm.*) are given as terminations of the *Desi.* and the *Freq.* by Pâṇini.

पिपासुः—Desirous of drinking; पिपासा–Desire of drinking.

The rule:—

3. (a) The Desiderative base is formed by adding स to roots. Roots are reduplicated before this स and अ of the reduplicative syllable is generally changed to इ. स takes the augment इ in some cases and does not take it in others.

(b) पिपासु–पिपासा—उ is added to the *Desi.* base to form adjectives and आ to form abstract nouns.

4. The Desiderative expresses desire or an action about to be done and is a derived-base. All the tenses and moods are therefore formed from it as from the Causal.

कृ—कारय (*Cau.*)–कारयति, कारयतु, अकारयत्, कारयेत्, कारयांचकार-बभूव-आस, कारयिता, कारयिष्यति, अकारयिष्यत्, अचीकरत्, कार्यात्.

कृ—चिकीर्ष (*Des.*)–चिकीर्षति, चिकीर्षतु, अचिकीर्षत्, चिकीर्षेत्, चिकीर्षांचकार-बभूव-आस, चिकीर्षिता, चिकीर्षिष्यति, अचिकीर्षिष्यत्, अचिकीर्षीत्, चिकीर्ष्यात्.

यङन्त (The Frequentative)

भू—बोभूयते (पौनःपुन्येन भृशं वा भवति)–It signifies that the action is frequent or in great force.

दीप्—देदीप्यते; ज्वल्—जाज्वल्यते; नृत्—नरीनृत्यते; वृत्—वरीवृत्यते; अट्—अटाट्यते.

The rule:—

5. The Frequentative is formed by adding य to roots. *Âtm.* terminations are applied. Roots are reduplicated before य and the reduplicative syllable is guṇated. Forms of ज्वल्, नृत्, and अट्, given above, are irregular.

यङ्लुगन्त (The Frequentative with य dropped)

भू—बोभवीति; रट्—रारटीति.

These forms drop य.

नामधातु (Denominatives)

गगनायते—गगनमिवाचरति (आचारार्थे क्यङ् [य]); तरुणायते.
तपस्यति—तप आचरति; नमस्यति—नमस्कारं करोति.

यङन्त, **यङ्लुगन्त**, and **नामधातु** are derived bases and take all the tenses and moods.

सर्वमिदं सुखमनुभवन्नपि न प्रत्येमि। यद्वा प्रकृतिरियमभ्युदयानाम्।

द्वारकां रेवतीजानिर्हातुं नेयेष।

न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।

तमेतमौपनिषदं पुरुषं वेदानुवचनेन ब्राह्मणा विविदिषन्ति।

तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्।

एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते।

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।

रामरावणयोर्युद्धं रामरावणयोरिव।—अनुपममित्यर्थः। अनन्वयालंकारोऽयम्।

बन्धनानि खलु सन्ति बहूनि प्रेमबन्धनसमं न हि किंचित्।

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

एक एव खगमणिश्चिरं जीवतु चातकः।
पिपासया वा म्रियते याचते वा पुरन्दरम्॥

सविषोऽप्यमृतायते भवान् शवमुण्डाभरणोऽपि पावनः।
भव एव भवान्तकः सतां समदृष्टिर्विषमेक्षणोऽपि सन्॥

विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा ।
किमु रोदिमि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो ॥
रसै रुद्रैश्छिन्ना यमनसभला गः **शिखरिणी** ।

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदम् ।
यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥

सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम् ॥

विना सीतादेव्या किमिव न हि दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्येवं पृच्छस्यनधिगतरामायण इव ॥

—इति कुशस्योक्तिर्लवं प्रति ।

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

Great indeed is the gulf between my limited powers, and the vast work undertaken by me. I am desirous of crossing an ocean by means of a small boat.

Happiness comes after misery and misery after happiness in this world of living beings. None is invariably happy or miserable.

Even a single word, thorougly understood, goes to fulfil our desires. Such is the power of learning.

Those who bow to Govinda have no fear.

Oh! Sañjaya! tell me what the Pâṇḍavas did to my sons, desirous of fighting with them.

He who wishes to make a rogue a good man wishes to cross the ocean with his hands.

Why do you trouble him? He is about to die (Use the *Desi.*).

Fie upon an old man! even his sons act like his enemies.

Nouns

अनन्वय (अनन्वयः) *m.*–Name of a figure of speech in which the object described (उपमेय) and that with which it is compared (उपमान) are the same.

अनुवचन (अनुवचनम्) *n.*–The act of reciting.

अम्बुधि *m.*–1. An ocean; 2. It signifies the number four, oceans being four in four directions.

अवधि *m.*–Limit.

अवनि *f.*–The earth.

काम (कामः) *m.*–Love.

खगमणि *m.* (तत्पु०, खग *m.* moving in the sky, a bird + मणि *m.* a jewel)–The best of birds.

गरल (गरलम्) *n.*–Poison.

चातक (चातकः) *m.*–Name of a bird.

जीमूत (जीमूतः) *m.*–A cloud.

तरुणेन्दुशेखर *m.* बहु०, तरुण *adj.* small+इन्दु *m.* the moon+ शेखर *m.* crest)–Having the young moon in his crest; Śiva.

दैवत (दैवतम्) *n.*–A deity.

नग (नगः) *m.*–It signifies the number seven.

नेमि *m.*–The circumference of a wheel.

पुरन्दर (पुरन्दरः) *m.*–Indra.

पुरुष (पुरुषः) *m.*–The soul.

भव (भवः) *m.*–1. One who is born; 2. Śiva.

मन्दाक्रान्ता *f.*–Name of a metre.

मुण्ड (मुण्डः) *m.*–The head.

मैत्रेयी *f.*–Wife of the saga Yâjñavalkya.

रस (रसः) *m.*–1. A taste; 2. It signifies the number six, because there are 6 tastes.

रुद्र (रुद्रः) *m.*–1. Śiva; 2. It signifies the number eleven, there being 11 Rudras.

शरण (शरणम्) *n.*–A place of refuge or shelter.

शव (शवः) *m.*–A dead body.

शिखरिणी *f.*–Name of a metre.

Adjectives

अनुपम (बहु०, अन्+उपमा *f.*–Similarity)–Having no equal; unequalled.

अर्थिन्–Desirous.

उपरत (*p. p.* of उप+रम् 1*st Ubh.*)–(One) who has renounced ceremonial acts.

औपनिषद–(That) of which, knowledge can be obtained from the Upanishads.

कामदुह्–Fulfilling all desires.

खड्गचर्मधर–Having a sword and animal skin.

छिन्न (*p.p.* of छिद् 7*th Ubh.*)–Cut off; having cæsura or a pause.

तितिक्षु (*Des.* from तिज् 1*st Âtm.* to bear)–Unaffected by heat and cold, happiness and misery.

दान्त (*p. p.* of दम् 4*th Par.*)–(One) who has restrained his external senses.

दुःसहतर–Very unbearable.

निदिध्यासितव्य (*Pot.p.* of the *Des.* of नि+ध्यै 1*st Par.*)–Fit to be meditated upon with concentrated mind.

पावन–Pure.

भवान्तक–Destroyer of worldly existence.

मन्तव्य (*Pot. p.* of मन् 4*th Âtm.*)–Fit to be meditated upon.

रेवतीजानि (बहु०, रेवती जाया यस्य सः)–One whose wife is Revatî, Balarâma.

लवण–Salt.

विषमेक्षण (बहु०, विषम 1. Uneven; 2. Unequal, partial+ईक्षण *n.* Sight)–(one) who has uneven or three eyes; 2. (one) who looks with partiality.

शान्त (*p. p.* of शम् 4*th Par.*)–Self-controlled; (one) who has drawn away his senses from their object.

श्रोतव्य (*Pot. p.* of श्रु 5*th Par.*)–Fit to be listened to.

समाहित (*p. p.* of सम्+आ+धा 3*rd Ubh.*)–(one) who has renounced sleep, laziness, &c. and concentrated his mind upon divine meditation.

सुप्रयुक्त (सु+प्रयुक्त, *p. p.* of प्र+युज् 7*th Ubh.*)–Well used.

Roots

उद्+नी (उन्नयति–ते) 1*st Ubh.*)–to raise high.

प्रति+इ (प्रत्येति) (2*nd Par.*)–To confide in; to be confident.

वि+लुठ् (विलुठति) (6*th Par.*)–To wallow; to roll on the ground.

रट् (रटति) (1*st Par.*)–To talk to a person.

Indeclinables

अत्यन्तम्-Greatly.
अधः-Below.
एकान्ततः-Invariably; always.
नीचैः-Below; low.
यद्वा-Or (It signifies another alternative).

LESSON XLII

Feminine Forms and Specimens of Letter-Writing

स्त्रीप्रत्यय's or terminations of the feminine gender have been treated in their proper places in the preceding lessons. Here they are dealt with more fully.

आ—अजा (A she-goat), कोकिला, चटका (A she-sparrow), अश्वा, मूषिका (from मूषक-a mouse), बाला, वत्सा, शूद्रा, (जातौ, *i. e.*, to signify a class), ज्येष्ठा, कनिष्ठा, मध्यमा, वृद्धा, स्थविरा.

ई—गौरी, नर्तकी, हरिणी, मानुषी (from मनुष्य), मत्सी (from मत्स्य); वयसि—(to signify age)—कुमारी, किशोरी (but (वृद्धा, स्थविरा).

पुंयोगे—(wife of)—शूद्रस्य स्त्री शूद्री, गणकी.

The rule:—

1. अकारान्ताः—Words ending in अ form their *Fem.* forms either by the affix आ or ई.

Exceptions:—

(*a*) इन्द्रस्य स्त्री इन्द्राणी; similarly, वरुण-वरुणानी, भव-भवानी, रुद्र-रुद्राणी; शर्व-शर्वाणी; मृड (शिव)-मृडानी; सूर्यस्य स्त्री सूर्या; मनोः स्त्री मनावी मनायी मनुर्वा; मातुल-मातुलानी-मातुली.

(*b*) In some cases the meanings are changed.

महद्धिमं हिमानी; महदरण्यमरण्यानी; दुष्टो यवो यवानी; यवनानां लिपिर्यवनानी.

(*c*) Some words have two forms in different senses.

उपाध्याय-उपाध्यायस्य स्त्री उपाध्यायानी उपाध्यायी वा-Wife of a teacher.
-स्त्रयमेवाध्यापिका-उपाध्यायी-उपाध्याया-A lady teacher.

आचार्य—आचार्यस्य स्त्री आचार्यानी (Mark—न is not changed to ण); स्वयं व्याख्यात्री आचार्या.

क्षत्रिय—क्षत्रियस्य स्त्री क्षत्रियी (पुंयोगे).
क्षत्रियाणी क्षत्रीया वा—A woman of the क्षत्रिय caste.
स्थल—स्थली (अकृत्रिमा चेत्, if not artificial)-A natural plot of ground; स्थला (कृत्रिमा)-An artificial ground.

(*d*) Both by आ and ई—

चन्द्रमुखी-खा; सुकेशी-शा; तुङ्गनासिकी-का (तुङ्ग=Tall); कृशोदरी-रा (कृश=Thin); बिम्बोष्ठी-ष्ठा (बिम्ब *n*.=The fruit of a tree which is red when ripe); स्वङ्गी-ङ्गा; सुगात्री-त्रा; कम्बुकण्ठी-ण्ठा (कम्बु *m*., *n*.=A conch).

(*e*) कृता; कर्तव्या; करणीया; कार्या; कृतवती; गतवती; लघुतरा; लघुतमा; लघिष्ठा. Past and Potential participles and words ending in तर, तम, and इष्ठ form their *Fem*. by आ; but *active* past participles take ई to form their *Fem*.

2. इकारान्ताः—(*a*) कृतिः, मतिः, ततिः, बुद्धिः, नीतिः, &c.

(*b*) रजनिः-रजनी; रात्रिः-रात्री; अवनिः-अवनी; कोटिः-कोटी; भूमिः-भूमी; श्रेणिः-श्रेणी (A series).

(*a*) Words ending in ति like कृति, मति, तति (A line), &c. are feminine.

(*b*) Other words ending in any other कृत् suffix इ have an optional *Fem*. form ending in ई.

पद्धति, though ending in ति, has two forms-पद्धति-ती.

पति has पत्नी; समानः पतिर्यस्याः सा सपत्नी (A co-wife).

3. उकारान्ताः—पटु-पटु or पट्वी; लघु-लघु or लघ्वी; but पाण्डु (pale) has पाण्डु only, and पङ्गु (lame), पङ्गू or पङ्ग्वी.

Adjectives ending in उ form their *Fem*. optionally by ई.

वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः, similarly, रम्भोरूः (रम्भा *f*. A plantain tree); करभोरूः (करभः-The back of the fore arm or the trunk of an elephant).

ऊरु at the end of a बहु॰ is changed to ऊरू in the *Fem*.

4. ऋकारान्ताः नकारान्ताश्च—कर्तृ-कर्त्री; द्रष्टृ-द्रष्ट्री; छत्रिन्-छत्रिणी; राजन्-राज्ञी—

Words ending in ऋ and न् form their *Fem.* by ई.
Exception:—

(*a*) Numerals ending in न्—पञ्चन्, सप्तन्, &c. and तिसृ and चतसृ (substitutes for त्रि and चतुर्);

(*b*) स्वसृ, ननान्दृ, दुहितृ, यातृ (A husband's brother's wife), मातृ;

(*e*) Words ending in मन्–दामन् (A garland), सीमन्.

(*a*) मतुप् (मत्) बुद्धिमत्–बुद्धिमती; भगवत्–भगवती;

(*b*) क्तवतु (वत्–*Active p. p.* affix)–कृतवत्–कृतवती;

(*c*) क्वसु (वस्–*Perfect p.* affix)–विद्वस्–विदुषी; जग्मिवस्–जग्मुषी; तस्थिवस्–तस्थुषी (The affix ई is to be added to the भ base);

(*d*) ईयसुन् (The comparative affix ईयस्)–लघीयस्–लघीयसी;

(*e*) वतुप् (वत्=परिमाणवाचक)–तावत्–तावती; यावत्–यावती; एतावत्–एतावती; इयत्–इयती; कियत्–कियती;

(*f*) शतृ (अत्–*Par. Pres. p.* suffix)—गच्छन्ती, पुष्यन्ती, चोरयन्ती, कारयन्ती; तुदती–न्ती, याती–न्ती, करिष्यती–न्ती, चिकीर्षती–न्ती; but द्विषती, ददती, चिन्वती, रुन्धती, कुर्वती, क्रीणती. Here न् is inserted necessarily in the 1*st*, 4*th*, and 10*th* conjugations, and Causals, and optionally in the 6*th* conj. and roots ending in आ of the 2*nd* conj., *Par.* Future, and *Par.* Desideratives—

5. उगिदन्ताः—Words ending in affixes of which उवर्ण and ऋवर्ण are dropped form their *Fem.* by ई. The above (मतुप्, क्तवतु, &c. mentioned above) are such terminations.

महती, भवती–महत् and भवत् (Pro.) also take the affix ई to form their *Fem.*

तय (Consisting of)—पञ्चतयी, द्वितयी.

द्वयस—उरुद्वयसी	द्वयस, दघ्न, and मात्र signify परिमाण.
दघ्न—जानुदघ्नी	जानुदघ्नं पयः—Water up to or as deep as
मात्र—उरुमात्री	the knee.

इक—वार्षिकी, मासिकी, प्रामाणिकी

दृश—तादृशी, मादृशी, &c.

6. Words ending in तय, द्वयस, दघ्न, मात्र, इक, and words like तादृश take ई.

The following letter is found in the Mâlavikâgnimitra of Kâlidâsa:—

स्वस्ति। यज्ञशरणात् सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात् परिष्वज्य अनुदर्शयति। विदितमस्तु। योऽसौ राजसूययज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः। तत उभयोः सेनयोर्महानासीत् संमर्दः।

ततः परान् पराजित्य वसुमित्रेण धन्विना।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः॥

सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये। तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति॥

(अनुदर्शयति—Shows; informs as follows. विज्ञापयति is used by an inferior to a superior or by a man to his equal through courtsey. It means 'requests,' 'begs,' 'says respectfully.' and आज्ञापयति is used by a superior to an inferior. अनुदर्शयति=निवेदयति. राजसूययज्ञ is performed by a universal monarch at the time of his coronation. दीक्षित=Initiated. संवत्स०=Which is to be brought back after a year. निरर्गलः-निर्गता अर्गला यस्मात् सः=Free. रोधस् *n.*-Coast. अनीक *n.*-An army; अश्वानीक *n.*-Cavalry. प्रार्थितः-Opposed; attacked. वाजिराजः-The best of horses. अकालहीनम्-Without losing time.

श्रीः।

स्वस्ति। श्रीमद्रमारमणचरणकमलनिरन्तरपरिचरणप्राप्तनिखिलपुरुषार्थान् राजश्रिया विराजितान् राजमान्यान् देवदत्तशर्मण आशीर्भिः समभिनन्द्य (or अमुकशर्मणो नमस्कारततीः कृत्वा) विज्ञापनमिदं यद् भवल्लिखितं पुस्तकं समुपलभ्य प्रेषयामि। स्नेहः संरक्ष्यः संवर्ध्यश्चेति विज्ञापयति

संवत् १९७४ वैशाखकृष्णनवम्याम् यज्ञदत्तशर्मा॥

श्रीः

सूर्यपुरम्, १-६-१८

श्रीमन् प्रियसुहृत्तम,

गतमासस्य पञ्चविंशतितमेऽह्नि भवल्लिखितं पत्रं प्राप्तं यथाकालं जातश्च सुमहानानन्दसंदोहः। भवदीप्सितं पुस्तकं संपादयितुमितस्ततः कृता मम समीहा नाद्यापि फलं दर्शयतीति भृशं विषीदामि तद् भूयोऽप्यन्यतोऽन्वेषयामि निवेदयिष्यामि च तद्वार्तां यदि तल्लभेय। शमत्र। तद्भवतां जिज्ञासे पौनःपुनिकाद्भवल्लेखादाशासे च मुहुर्महेशानात्।

भवदीयः

नारायणशास्त्री ॥

The above two specimens are sufficient to give the student an idea of the method adopted in writing letters in Sanskrit.

एवमुपाख्यायते–सत्यकामो जाबालो मृतपितृको जाबालां स्वमातरमुवाच आचार्यकुले ब्रह्मचर्येण स्थातुमिच्छामि किं गोत्रं ममेति। सोवाच। बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे नाहमेतद्वेद यद्गोत्रस्त्वमिति सत्यकामो नाम त्वमसि जाबाला तु नामाहमस्मि। अतः सत्यकामो जाबाल इत्येव त्वयाचार्यपृष्टेन वक्तव्यमिति। स गौतमं प्रत्येत्य ब्रह्मचर्यं भगवति वत्स्यामीति भगवन्तमुक्त्वा गौतमेन किंगोत्रस्त्वमिति पृष्टो मात्रा यथोक्तं तथैव सर्वमुक्तवान्। तदनन्तरं गौतमस्य वचनं—नैतदब्राह्मणो विवक्तुमर्हति। समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानां गवां चतुःशतसंख्यानां रक्षणाय नियोजयामास। स ता आदाय यावत् सहस्रसंख्या न भविष्यन्ति तावन्न निवर्त इति प्रतिज्ञायारण्यं तृणजलसमृद्धं प्रापयामास। यदा ताः सहस्रं संपन्ना अथ तमाचार्यकुलं प्रापयितुमृषभ उवाच—प्राप्ताः सोम्य सहस्रं स्म इति प्रापय न आचार्यकुलम्। इत्युक्त्वा स ऋषभस्तस्मै सत्यकामाय षोडशकलस्य चतुष्पदो ब्रह्मण एकं पादमुक्तवान्। ततोऽवशिष्टांस्त्रीन् पादानग्नि-

हंससमद्गव ऊचुः। तथा भूत आचार्यकुलं प्राप्तमाचार्य उवाच-सत्यकाम ब्रह्मविदिव भासि कस्त्वामनुशशास। अन्यो मनुष्येभ्य इति सत्यकाम उवाच। परं तु न तावता मम संतोषः। यत आचार्याद्धैव विद्या विदिता साधुतमत्वं प्रापदिति भगवत्सदृशेभ्यः श्रुतमस्ति। अतस्त्वत्त एव श्रोतुमिच्छामीति। तमाचार्य ऋषभादिभिर्यदुक्तं ब्रह्म तदेव पुनरप्युक्तवानिति ॥

भरतलक्ष्मणसहितो रघुपतिर्बुधबृहस्पतियोगेन दर्शनीयश्चन्द्रोऽभ्रवृन्दमिव विमानमध्यास्त ॥

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः।
किं जातमधुना मित्र यूयं यूयं वयं वयम् ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम्।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥

न धनं न च राज्यसंपदं न हि विद्यामिदमेकमर्थये।
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गितां दृशम् ॥

मुँनिरसँग्रँहेन्दुमिते विक्रमसंवत्सरे (सप्तषष्ट्यधिकैकोनविंशतिशततम इति यावदङ्कानां वामतो गतित्वात्) पुस्तकस्यास्य प्रथमावृत्तिर्विरचिता।

Scarcely had the general finished his speech (अनवसितवचन एव सेनापतौ) inspiring his soldiers with valour, when they girded up their loins and became ready to fight.

Granted (कामम्) that duty must be done, I cannot communicate such news to the king.

The more you think of your misery, the more will be your grief (यथा यथा-तथा तथा).

"That (Use इति) Indra's friends conquer his enemies is but due to his valour," said the king to Mâtali.

It is better to resort to a forest than to serve a proud person (Use वरम्-न तु).

No sooner is a disease born (जातमात्रं रोगम्) than one should try to root it out.

Stop the chariot till (यावत्) I get down.

It is strange that notwithstanding my constant advice (Use अनादरषष्ठी or अनादरसप्तमी) you have strayed from the right path.

Nouns

अङ्क (अङ्कः) *m.*–A number.
अभ्र (अभ्रम्) *n.*–A cloud.
इन्दु *m.*–1. The moon; 2. It signifies the number one.
उर्वी *f.*–The earth.
ऋषभ (ऋषभः) *m.*–A bull; the deity Vâyu who had entered the body of a bull.
किंप्रभुः *m.* (कुत्सितश्चासौ प्रभुश्च)–A bad king.
गति *f.*–Sense.
गौतम *m.*–Name of a sage.
ग्रह (ग्रहः) *m.*–1. A planet; 2. It signifies the number nine.
जाबाल *m.*–Name of a sage.
जाबाला *f.*–Name of a lady.
दृश् *f.*–Sight.
ब्रह्मविद् *m.*–One who knows Brahman or the Supreme Being.
भङ्गि *f.*–A wave.
मुनि *m.*–1. A sage; 2. It signifies the number seven.
मौन (मौनम्) *n.*–Silence.
विश्लेष (विश्लेषः) *m.*–Separation.
वृन्द (वृन्दः) *m.*–A collection.
व्याघ्री *f.*–A tigress.
सत्यकाम (सत्यकामः) *m.*–Name of a sage.
हंस (हंसः) *m.*–God Âditya.

Adjectives

अवशिष्ट (*p. p.* of (अव+शिष् 7*th* *Par.*)–Remaining.

कृश–Lean.

चतुष्पाद् (चतुर्+पाद*m*.–A quarter. चत्वारः पादा यस्य स चतुष्पाद्)–Having four quarters (पाद= चतुर्थांश the four directions form one पाद and 4 कला's of ब्रह्मन्)

तरङ्गित (*f.* तरङ्गिता)–(That) Which has waves formed in it.

तावत्–That much.

परिचारिन्–One who waits upon another.

मित–(*p. p.* of मा 3*rd* *Âtm.*)–Measured.

षोडशकल–Having sixteen parts (the four directions, पृथिवी, अन्तरिक्ष, दिव्, समुद्र, अग्नि, सूर्य, चन्द्र, विद्युत्, प्राण, चक्षुः, श्रोत्र, and मनः are the sixteen parts of ब्रह्मन्).

समद्गु (मद्गु *m.*–An aquatic bird. उदकचरः पक्षी; here it means प्राण)–Accompanied by प्राण.

समृद्ध (*p. p.* of (सम्+ऋध् 4*th*, 5*th Par.*)–Full of.

संपन्न (*p. p.* of (सम्+पद्) 4*th* *Âtm.*) Become.

Verbs

अनु+शास् (अनुशास्ति) (2*nd* *Par.*)–To teach. [To beg.

अर्थ् (अर्थयति-ते) (10*th Ubh.*)–

उप+आ+ख्या (उपाख्याति) (2*nd* *Par.*)–To narrate a short tale. [*Cau.*)–To appoint.

नि+युज् (7*th* *Par.*, नियोजयति

परि+तर्ज् (परितर्जति-र्जयति-ते) (1*st* *Par.*, 10*th Ubh.*) To threaten.

परि+स्रु (परिस्रवति)–(1*st Par.*)–To flow out.

वि+वच् (विवक्ति) (2*nd Par.*)–To speak particularly; to speak in a straightforward and upright way). [hear from.

सं+श्रु (संशृणुते) (5*th Âtm.*)–To

Indeclinables

इति यावत्–In other words.

चित्रम्–Strange.

तदनन्तरम्–After it.

मनाक्–A little.

वामतः–In a reverse order.

---

१. चटकदम्पत्योः ।

अस्ति कस्मिंश्चिद्वनोद्देशे चटकदम्पती तमालतरुकृतनिलयौ प्रतिवसतः स्म । अथ तयोर्गच्छता कालेन संततिरभवत् । अन्यस्मिन्नहनि प्रमत्तो वनगजः कश्चित्तं तमालवृक्षं घर्मार्तश्छायार्थी समाश्रितः । ततो मदोत्कर्षात्तां तस्य शाखां चटकाश्रितां पुष्कराग्रेणाकृष्य बभञ्ज । तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि । आयुःशेषतया च चटकौ कथमपि प्राणैर्न वियुक्तौ । अथ चटका स्वाण्डभङ्गाभिभूता प्रलापान् कुर्वाणा न किंचित्सुखमाससाद । अत्रान्तरे तस्यास्तान् प्रलापाञ् श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत्तद्दुःखदुःखितोऽभ्येत्य तामुवाच । भगवति ! किं वृथा प्रलापेन । उक्तं च ।

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥

तथा च ।

अशोच्यानीह भूतानि यो मूढस्तानि शोचति ।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते ॥

अन्यच्च

श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
तस्मान्न रोदितव्यं हि क्रियाः कार्याश्च शक्तितः ॥

चटका प्राह । अस्त्वेतत् । परं दुष्टगजेन मदान्मम संतानक्षयः कृतः । तद्यदि मम त्वं सुहृत्सत्यस्तदस्य गजापसदस्य कोऽपि वधोपायश्चिन्त्यतां यस्यानुष्ठानेन मे संततिनाशदुःखमपसरति । उक्तं च ।

आपदि येनापकृतं येन च हसितं दशासु विषमासु ।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥

काष्ठकूट आह । भगवति ! सत्यमभिहितं भवत्या । उक्तं च ।

स सुहृद् व्यसने यः स्यादन्यजात्युद्भवोऽपि सन् ।
वृद्धौ सर्वोऽपि मित्रं स्यात् सर्वेषामेव देहिनाम् ॥

स सुहृद् व्यसने यः स्यात् स पुत्रो यस्तु भक्तिमान् ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥

तत् पश्य मे बुद्धिप्रभावम् । परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति । तत्तामाहूयागच्छामि येन स दुरात्मा दुष्टगजो वध्यते । अथासौ चटकया सह मक्षिकामासाद्य प्रोवाच । भद्रे ! ममेष्टेयं चटका केनचिद् दुष्टगजेन पराभूताण्डस्फोटनेन । तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि । मक्षिकाप्याह । भद्रे ! किमुच्यतेऽत्र विषये । उक्तं च ।

पुनः प्रत्युपकाराय मित्राणां क्रियते प्रियम् ।
यत् पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतम् ॥

सत्यमेतत् । परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति । तमप्याहूय यथोचितं कुर्मः । उक्तं च ।

हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः ।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥

अथ ते त्रयोऽपि गत्वा मेघनादस्याग्रे समस्तमपि वृत्तान्तं निवेद्य तस्थुः । अथ स प्रोवाच । कियन्मात्रोऽसौ वराको गजो महाजनस्य कुपितस्याग्रे । तन्मदीयो मन्त्रः कर्तव्यः । मक्षिके ! त्वं गत्वा मध्याह्नसमये तस्य मदोद्धतस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु येन श्रवणसुखलालसो निमीलितनयनो भवति । ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनोऽन्धीभूतस्तृषार्तो मम गर्ततटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वा समभ्येति । ततो गर्तमासाद्य पतिष्यति पञ्चत्वं यास्यति चेति । एवं समवायः कर्तव्यो यथा वैरसाधनं भवति । अथ तथानुष्ठिते स मत्तगजो मक्षिकागेयसुखान्निमीलितनेत्रः काष्ठकूटहृतचक्षुर्मध्याह्नसमये भ्राम्यन् मण्डूकशब्दानुसारी गच्छन् महतीं गर्तामासाद्य पतितो मृतश्च । अतोऽहं ब्रवीमि—

चटकाकाष्ठकूटेन मक्षिकादर्दुरैस्तथा ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥

२. वामदेवशिष्यकथिता कुमारवार्ता ।

कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत । देव ! रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि । स्थविरे ! का त्वम् । एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसीति । वृद्धयाप्यभाषि । मुनिवर ! कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद् द्वीपादागतो मगधनाथमन्त्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो व्यवहार्युपयेमे । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सोदरविलोकनकुतूहलेन रत्नोद्भवस्तया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यानायीति । तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम् । निपतितं बालकमाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् । स चोन्नततरु-

शाखासमासीनेन वानरेण केनचित् पक्कफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत्। सोऽपि मर्कटः क्वचिदगात्। केसरिणा करिणं निहत्य कुत्रचिदगामि। लतागृहान्निर्गतोऽहमपि बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निर्देशेन भवन्निकटमानीतवानस्मीति।

---

३. सिंहशशकयोः।

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म। अथासौ वीर्यातिरेकान्नित्यमेवानेकान् मृगशशकादीन् व्यापादयन्नोपरराम। अथान्येद्युस्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः। स्वामिन्! किमनेन सकलमृगवधेन नित्यमेव यतस्तवैकेनापि मृगेण तृप्तिर्भवति। तत् क्रियतामस्माभिः सह समयधर्मः। अद्यप्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेष्यति। एवं कृते तव तावत् प्राणयात्रा क्लेशं विनापि भविष्यत्यस्माकं पुनः सर्वोच्छेदनं न स्यात्। तदेष राजधर्मोऽनुष्ठीयताम्। उक्तं च।

शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाबलम्।
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत्॥

अथ तेषां तद्वचनमाकर्ण्य भासुरक आह। अहो सत्यमभिहितं भवद्भिः। परं यदि ममोपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि। अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजस्तत्रैव वने निर्भयाः पर्यटन्ति। एकश्च प्रतिदिनं तेषां मध्यात् तस्य भोजनार्थं मध्याह्नसमये क्रमेणोपतिष्ठते। अथ कदाचिज्जातिक्रमाच्छशकस्यावसरः समायातः। स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः

संदृष्टः। यावत् कूपोपरि याति तावत्कूपमध्य आत्मनः प्रतिबिम्बं ददर्श। दृष्ट्वा च तेन हृदये चिन्तितं यल्लब्ध उपायोऽस्ति। अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि। अथासौ दिनशेषे भासुरकसमीपं प्राप्तः। सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्किणी परिलेलिह्यमानो व्यचिन्तयत्। अहो प्रातराहाराय निःसत्त्वं वनं मया कर्तव्यम्। एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः। अथ तं प्रज्वलितात्मा भासुरको भर्त्सयन्नाह। रे शशकाधम! एकतस्तावत् त्वं लघुः प्राप्तोऽपरतो वेलातिक्रमेण तदस्मादपराधात् त्वां निपात्य प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि। अथ शशकः सविनयं प्रोवाच। स्वामिन्! नापराधो मम न च सत्त्वानां तच्छ्रूयतां कारणम्। सिंह आह। सत्वरं निवेदय यावन्मम दंष्ट्रान्तर्गतो न भविष्यसीति। शशक आह। समस्तमृगैरद्य जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय पञ्चभिः शशकैः सहाहं प्रेषितः। ततश्चाहमागच्छन्नन्तराले महता केनचिदपरेण सिंहेन विवरान्निर्गत्याभिहितः। रे क्व प्रस्थिता यूयम्। अभीष्टदेवतां स्मरत। ततो मयाभिहितम्। वयं स्वामिनो भासुरकसिंहस्य सकाश आहारार्थं समयधर्मेण गच्छामः। ततस्तेनाभिहितम्। यद्येवं तर्हि मदीयमेतद्वनं मया सह समयधर्मेण समस्तैरपि श्वापदैर्वर्तितव्यम्। चौररूपी स भासुरकः। अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ येन यः कश्चिदावयोर्मध्यात् पराक्रमेण राजा भविष्यति स सर्वानेतान् भक्षयिष्यतीति। ततोऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः। एतद्वेलाव्यतिक्रमकारणम्। तदत्र स्वामी प्रमाणम्। तच्छ्रुत्वा भासुरक आह। यद्येवं तत् सत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि। शशक आह। यद्येवं तर्ह्यागच्छतु स्वामी। एवमुक्त्वाग्रे व्यवस्थितः। ततश्च तेनागच्छता यः कूपो दृष्टोऽभूत्तमेव कूपमासाद्य भासुरकमाह। स्वामिन्!

कस्ते प्रतापं सोढुं समर्थः । त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः प्रविष्टः स्वं दुर्गं तदागच्छ येन दर्शयामीति । भासुरक आह । दर्शय मे दुर्गम् । तदनु दर्शितस्तेन कूपः । सोऽपि मूर्खः सिंहः कूपमध्य आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्याद् द्विगुणतरो नादः समुत्थितः । अथ तेन तं शत्रुं मत्वात्मानं तस्योपरि प्रक्षिप्य प्राणाः परित्यक्ताः । शशकोऽपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म । अतोऽहं ब्रवीमि—

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥

---

४. सर्पमण्डूकयोः ।

कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म । स कदाचिद्दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निष्क्रान्तः । अथ तेन चिन्तितं दायादानां मया प्रत्यपकारः कर्तव्य इति । एवं चिन्तयन् बिले प्रविशन्तं कृष्णसर्पमपश्यत् । तं दृष्ट्वा भूयोऽप्यचिन्तयद्यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि । उक्तं च ।

शत्रुमुन्मूलयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥

एवं विभाव्य बिलद्वारं गत्वा तमाहूतवान् । एहि एहि प्रियदर्शन ! एहि । तच्छ्रुत्वा सर्पश्चिन्तयामास । य एष मामाह्वयति स स्वजातीयो न भवति यतो नैषा सर्पवाणी । तदत्रैव दुर्गे स्थितस्तावद्वेद्मि कोऽयं भविष्यतीति । आह च । भोः को भवान् । स आह । अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्र्यर्थमागतः । तच्छ्रुत्वा सर्प आह । भो ! अश्रद्धेयमेतद्यत्तृणानां वह्निना सह संगमः । गङ्गदत्त आह । सत्यमेतत् स्वभाववैरी त्वमस्माकम् । परं परपरिभवात् प्राप्तोऽहं

ते सकाशम्। सर्प आह। कथय कस्मात्ते परिभवः। स आह। दायादेभ्यः। सोऽप्याह। क्व ते आश्रयो वाप्यां कूपे तडागे ह्रदे वा। तत् कथय स्वाश्रयम्। तेनोक्तं पाषाणचयनिबद्धे कूपे। सर्प आह। अहो अपदा वयं तन्नास्ति तत्र मे प्रवेशः प्रविष्टस्य च स्थानं नास्ति यत्र स्थितस्तव दायादान् व्यापादयामि तद्गम्यताम्। गङ्गदत्त आह। भोः समागच्छ त्वम्। अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि। तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति तत्र स्थितस्त्वं लीलया दायादान् व्यापादयिष्यसि। तच्छ्रुत्वा सर्पो व्यचिन्तयत्। अहं तावत् परिणतवयाः कदाचित् कथंचिन्मूषकमेकं प्राप्नोमि। तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः। तद्गत्वा तान् मण्डूकान् भक्षयामीति। एवं विचिन्त्य तमाह। भो गङ्गदत्त! यद्येवं तदग्रे भव येन तत्र गच्छावः। गङ्गदत्त आह। भोः प्रियदर्शन! अहं त्वां सुखोपायेन तत्र नेष्यामि स्थानं च दर्शयामि। परं त्वयास्मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि त एव भक्षणीया इति। सर्प आह। साम्प्रतं त्वं मे मित्रं जातम्। तन्न भेतव्यम्। तव वचनेन भक्षणीयास्ते दायादाः। एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः। अथ कूपमासाद्यारघट्टघटिकामार्गेण सर्पस्तेन स्वालयं नीतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः। ते च तेन शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितम्। भद्र! निःशेषितास्ते रिपवस्तत् प्रयच्छान्यन्मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः। गङ्गदत्त आह। भद्र कृतं त्वया मित्रकृत्यं तत् साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यतामिति। सर्प आह। भो गङ्गदत्त! न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि। मदीयबिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामीति। तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना नित्यमेकैकं तस्यादिशति। सोऽपि तं भक्षयित्वा तस्य

परोक्षेऽन्यानपि भक्षयति । अथान्येद्युस्तेनापरान् मण्डूकान् भक्षयित्वा गङ्गदत्तसुतो यमुनादत्तो भक्षितः । तं भक्षितं मत्वा गङ्गदत्तस्तारस्वरेण धिग्धिक्प्रलापपरः कथंचिदपि न विरराम । ततः स्वपत्न्याभिहितः—

किं क्रन्दसि दुराक्रन्द स्वपक्षक्षयकारक ।
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति ।।

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणमस्य वधोपायश्च । अथ गच्छता कालेन सकलमपि कवलितं मण्डूककुलम् । केवलमेको गङ्गदत्तस्तिष्ठति । ततः प्रियदर्शनेन भणितम् । भो गङ्गदत्त ! बुभुक्षितोऽहं निःशेषिताः सर्वे मण्डूकाः । तद्दीयतां मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः । स आह । भो मित्र ! न त्वयात्र विषये मयावस्थितेन कापि चिन्ता कार्या । तद्यदि मां प्रेषयिष्यसि ततोऽन्यकूपस्थानपि मण्डूकान् विश्वास्यात्रानयामि । स आह । मम तावत्त्वमभक्ष्यो भ्रातृस्थाने । तद्यद्येवं करोषि तत् साम्प्रतं पितृस्थाने भवसि तदेवं क्रियतामिति । सोऽपि तदाकर्ण्यारघट्टघटिकामाश्रित्य तस्मात् कूपान्निष्क्रान्तः । प्रियदर्शनोऽपि तदाकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति । अथ चिरादनागते गङ्गदत्ते प्रियदर्शनोऽन्यकोटरनिवासिनीं गोधामुवाच । भद्रे । क्रियतां स्तोकं साहाय्यं यतश्चिरपरिचितस्ते गङ्गदत्तः । तद्गत्वा तत्सकाशं कुत्रचिज्जलाशयेऽन्विष्य मम संदेशं कथय । यदागम्यतामेकाकिनापि भवता । त्वया विना नात्र वस्तुं शक्नोमि । यदि तव विरुद्धमाचरामि तत् सुकृतमन्तरे मया विधृतमिति । गोधापि तद्वचनाद्गङ्गदत्तं द्रुततरमन्विष्य प्रियदर्शनसंदेशं कथयामास । तदाकर्ण्य गङ्गदत्त आह—

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।

आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ॥

९. मान्धातृवृत्तान्तः।

पुरा किलेक्ष्वाकुवंशप्रभवो युवनाश्वो नाम महीपतिर्बभूव। धर्मभृतां वरः स पृथिवीपालो बहुभिर्भूरिदक्षिणैः क्रतुभिरीजे। अनपत्यत्वात् स राजर्षिर्मन्त्रिषु स्वराज्यमाधाय वननित्यो बभूव। ततः शास्त्रदृष्टेन विधिनात्मानं संयोज्य कदाचिदुपवासेन दुःखितः पिपासाशुष्कहृदयो भृगोराश्रमं प्रविवेश। तामेव रात्रिं महात्मा भृगुनन्दनो युवनाश्वस्य पुत्रकारणादिष्टिं चकार। मन्त्रपूतेन वारिणा महान् कलशस्तत्र पूर्वमेव समाहितोऽतिष्ठद्यत् प्राश्य तस्य पत्नी शक्रसमं सुतं प्रसुवीत। यस्मिन् कलशे तत् सुसंस्कृतं वारि निहितमासीत् तं कलशं वेद्यां न्यस्य महर्षयः सुषुपुः। रात्रिजागरणाच्छ्रान्तांस्तानृषीन् समतीत्य शुष्ककठः पिपासार्तः पानीयार्थी तमाश्रमं प्रविश्य स राजा भृशं पानीयमभ्ययाचत। किं तु श्रान्तस्य शुष्केन कण्ठेन क्रोशतस्तस्य याचनां न कोऽपि शुश्राव। ततः स पार्थिवस्तं कलशं जलपूर्णं दृष्ट्वा वेगेनाभ्यद्रवदम्भः पीत्वा व्यवासृजत्। शीतलं तोयं पीत्वा पिपासार्तः स नृपः सुसुखी बभूव। ततस्ते मुनयो निस्तोयं कलशं दृष्ट्वा कस्येदं कर्मेति पर्यपृच्छन्। तदाकर्ण्य युवनाश्वो ममेदं कर्मेति सत्यं प्रत्यवदत्। न युक्तं कृतं त्वयेति भगवान् भार्गवस्तमाह। मया ह्यत्र दारुणं तप आस्थाय तव पुत्रार्थं ब्रह्माहितं ततस्त्वया यदब्भक्षणं कृतं तन्न युक्तं किन्त्वेतद्दैवकृतमन्यथाकर्तुं न शक्यम्। यतो मत्तपोवीर्यसंभृता आपस्त्वया पीता अतस्त्वमात्मना शक्रसमं पुत्रं जनयिष्यसि। वयं परमाद्भुतामिष्टिं त्वत्कृते विधास्यामो येन गर्भधारणजं खेदं न समवाप्स्यसि। ततो वर्षशते पूर्णे तस्य राज्ञो वामपार्श्वं विनिर्भिद्य महातेजाः सुतो निश्च-

क्राम न च युवनाश्वं नरपतिं मृत्युराविशत् । तं पुत्रं दिदृक्षुः शक्रस्तत्रोपागमत्तं देवा अपृच्छन् किं धास्यत्ययं पुत्र इति। ततः शक्रस्तस्यास्ये प्रदेशिनीं समभिसंदधे मामयं धास्यतीत्युक्तवांश्च ।

मामयं धास्यतीत्येवं भाषिते चैव वज्रिणा ।
मान्धातेति च नामास्य चक्रुः सेन्द्रा दिवौकसः ॥

सोऽयं मान्धातातितेजस्वी नृपोऽप्रतिहतचक्रं राज्यं बुभुजे ॥

---

६. कुमारं चन्द्रापीडं प्रति महाराजाज्ञा ।

कुमार ! महाराजः समाज्ञापयति । पूर्णा नो मनोरथाः । अधीतानि शास्त्राणि । शिक्षिताः सकलाः कलाः । गतः सर्वास्वायुधविद्यासु परां प्रतिष्ठाम् । अनुमतोऽसि विनिर्गमाय विद्यागृहात् सर्वाचार्यैः । उपगृहीतशिक्षं गन्धगजकुमारकमिव वारिबन्धाद्विनिर्गतमवगतसकलकलाकलापं पौर्णमासीशशिनमिव नवोद्गतं पश्यतु त्वां जनः । व्रजन्तु सफलतामतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि । दर्शनं प्रति ते समुत्सुकान्यतीव सर्वाण्यन्तःपुराणि । अयमेव भवतो दशमः संवत्सरो विद्यागृहमधिवसतः । प्रविष्टोऽसि षष्ठमनुभवन् वर्षम् । एवं संपिण्डितेनामुना षोडशेन प्रवर्धसे । तदद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्त्वा दर्शनमखिलमातृभ्योऽभिवाद्य च गुरूनपगतनियन्त्रणो यथासुखमनुभव राज्यसुखानि नवयौवनललितानि च । संमानय राजलोकम् । पूजय द्विजातीन् । परिपालय प्रजाः । आनन्दय बन्धुवर्गम् । अयं च त्रिभुवनैकरत्नमनिलगरुडसमजव इन्द्रायुधनामा तुरङ्गमः प्रेषितो महाराजेन द्वारि तिष्ठति । एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्यमिति कृत्वा “ जलधितलादुत्थितमयोनिजमिदमश्वरत्नमासादितं मया महाराजाधिरोहणयोग्यम्” इति संदिश्य प्रहितः । दृष्ट्वा च निवेदितं लक्षणविद्भिः । “ देव ! यान्युच्चैःश्रवसः श्रूयन्ते लक्षणानि तैरयमुपेतः ।

नैवंविधो भूतो भावी वा तुरङ्गमः" इति । तदयमनुगृह्यतामधिरोहणेन । इदं च मूर्धाभिषिक्तपार्थिवकुलप्रसूतानां विनयोपपन्नानां शूराणामभिरूपाणां कलावतां च कुलक्रमागतानां राजपुत्राणां सहस्रं परिचारार्थमनुप्रेषितं तुरङ्गमारूढं द्वारि प्रणामलालसं प्रतिपालयति । इत्यभिधाय विरतवचसि वलाहके चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा नवजलधरध्वानगम्भीरया गिरा "प्रवेश्यतामिन्द्रायुधः" इति निर्जिगमिषुरादिदेश ॥

७. चन्द्रापीडं प्रति शुकनासोपदेशः ।

समुपस्थितयौवराज्याभिषेकं चन्द्रापीडं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छञ्शुकनासोऽमात्यः सविस्तरमुवाच । तात चन्द्रापीड ! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः । विषमो विषयविषास्वादमोहः । नित्यमस्नानशौचवध्यो रागमलावलेपः । घोरा च राज्यसुखनिद्रा भवतीति विस्तरेणाभिधीयसे । गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा सर्वा । अविनयानामेकैकमप्येषामायतनं किमुत समवायः । यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः । अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य । गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम् । विशेषेण राज्ञाम् । विरला हि तेषामुपदेष्टारः । आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् । इयं हि लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागमिन्दुशकलादेकान्तवक्रतामुच्चैःश्रवसश्चञ्चलतां

कालकूटान्मोहनशक्तिं मदिराया मदं कौस्तुभमणेर्नैष्ठुर्यमित्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता । इयमनार्या लब्धापि खलु दुःखेन परिपाल्यते । परिपालितापि प्रपलायते । न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पालयति । तदस्मिन् महामोहकारिणि यौवने कुमार तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वद्भिः । कामं भवान् प्रकृत्यैव धीरः पित्रा च समारोपितसंस्कारः । तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान् । इदमेव च पुनः पुनरभिधीयसे विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम् । अवनमय द्विषतां शिरांसि । उन्नमय स्वबन्धुवर्गम् । अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम् । अयं च ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति । इत्येतावदभिधायोपशशाम ॥

---

८. ब्रह्मज्ञानविषयको गुरुशिष्यसंवादः ।

श्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत्—कस्त्वमसि सोम्य ! इति ।

स यदि ब्रूयात्—ब्राह्मणपुत्रोऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वा । इदानीमस्मि परमहंसपरिव्राट् संसारसागराज्जन्ममृत्युमहाग्राहादुत्तितीर्षुरिति ।

आचार्यो ब्रूयात्–इहैव तव सोम्य ! मृतस्य शरीरं वयोभिरद्यते मृद्भावं वापद्यते । तत्र कथं संसारादुद्धर्तुमिच्छसीति । न हि नद्या अवरे कूले भस्मीभूते नद्याः पारं तरिष्यसीति ।

स यदि ब्रूयात्—अन्योऽहं शरीरात । शरीरं तु जायते म्रियते वयोभिरद्यते मृद्भावमापद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याध्यादिभिश्च प्रयुज्यते । तस्मिन्नहं स्वकृतधर्मवशात् पक्षी नीडमिव प्रविष्टः पुनः पुनः शरीरविनाशे धर्माधर्मवशात् शरीरान्तरं यास्यामि पूर्वनीड–विनाशे पक्षीव नीडान्तरम् । तस्मान्नित्य एवाहं शरीरादन्यः । शरीराण्यागच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति ।

आचार्यो ब्रूयात्—साध्ववादीः । सम्यक् पश्यसि कथं मृषावादीर्ब्राह्मणपुत्रोऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वा इदानीमस्मि परमहंसपरिव्राडिति ।

स यदि ब्रूयात्–भगवन् ! कथमहं मृषावादिषमिति ।

तं प्रति ब्रूयादाचार्यः—यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयवर्जितस्यात्मनः प्रत्यभ्यज्ञासीर्ब्राह्मणपुत्रोऽदोन्वय इत्यादिना वाक्येनेति ।

स यदि पृच्छेत्—कथं भिन्नजात्यन्वयसंस्कारं शरीरं कथं वाहं जात्यन्वयसंस्कारवर्जित इति ।

आचार्यो ब्रूयात्—शृणु सोम्य ! यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जित इत्युक्त्वा तं स्मारयेत् परमात्मलक्षणं श्रुतिस्मृत्युक्तमिति ॥

---

९. नीतिः ।

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ १ ॥

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ २ ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रमिवाचरेत् ॥ ३ ॥
लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्मात् पुत्रं च शिष्यं च ताडयेन्न तु लालयेत् ॥ ४ ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ ५ ॥
एकेनापि कुवृक्षेण कोटरस्थेन वह्निना ।
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥ ६ ॥
उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ७ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ ८ ॥
दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥ ९ ॥
दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ १० ॥
सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।
मन्त्रौषधिवशः सर्पः खलः केन निवार्यते ॥ ११ ॥
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ १२ ॥
यस्मिन् देशे न सन्मानं न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥ १३ ॥
मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ।

अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥ १४ ॥
ऋणशेषोऽग्निशेषश्च व्याधिशेषस्तथैव च ।
पुनश्च वर्धते यस्मात् तस्माच्छेषं न कारयेत् ॥ १५ ॥
यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव तु ॥ १६ ॥
एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ १७ ॥
आपदां कथितः पन्था इन्द्रियाणामसंयमः ।
तज्जयः संपदां मार्गो येनेष्टं तेन गम्यताम् ॥ १८ ॥
पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥ १९ ॥
अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ २० ॥
किं तस्य मानुषत्वेन बुद्धिर्यस्य न निर्मला ।
बुद्ध्यापि किं फलं तस्य येन विद्या न संचिता ॥ २१ ॥
यदि नित्यमनित्येन निर्मलं मलवाहिना ।
यशः कायेन लभ्येत किं नु लभ्यमतः परम् ॥ २२ ॥
दधि मधुरं मधु मधुरं द्राक्षा मधुरा सितापि मधुरैव ।
तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् ॥ २३ ॥

---

१०. राजभक्तिः ।

सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥ १ ॥
इन्द्रात् प्रभुत्वं तपनात् प्रतापं क्रोधं हराद्वैश्रवणाच्च वित्तम् ।
आह्लादकत्वं च निशाधिनाथादादाय राज्ञः क्रियते शरीरम् ॥२॥

सर्वदेवमयो राजा मनुना संप्रकीर्तितः ।
तस्मात्तं देववत् पश्येन्न व्यलीकेन कर्हिचित् ॥ ३ ॥
सर्वदेवमयस्यापि विशेषो नृपतेरयम् ।
शुभाशुभफलं सद्यो नृपाद्देवाद्भवान्तरे ॥ ४ ॥
अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
देवानां च विनश्येत स द्रुतं सुमहानपि ॥ ५ ॥
अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः ॥ ६ ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ७ ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥ ८ ॥

---

११. अराजकं राष्ट्रम् ।

(रामायण-अयोध्याकाण्ड-सर्ग ६७)

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात् ॥ १ ॥
नाराजके जनपदे बीजमुष्टिः प्रकीर्यते ।
नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ॥ २ ॥
अराजके धनं नास्ति नास्ति भार्याप्यराजके ।
इदमत्याहितं चान्यत् कुतः सत्यमराजके ॥ ३ ॥
नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ ४ ॥
नाराजके जनपदे बद्धघण्टा विषाणिनः ।
अटन्ति राजमार्गेषु कुञ्जराः षष्टिहायनाः ॥ ५ ॥
नाराजके जनपदे वणिजो दूरगामिनः ।

गच्छन्ति क्षेममध्वानं बहुपण्यसमाचिताः ॥ ६ ॥
यथा ह्यनुदका नद्यो यथा वाप्यतृणं वनम् ।
अगोपाला यथा गावस्तथा राष्ट्रमराजकम् ॥ ७ ॥
नाराजके जनपदे स्वकं भवति कस्यचित् ।
मत्स्या इव जना नित्यं भक्षयन्ति परस्परम् ॥ ८ ॥
राजा सत्यं च धर्मश्च राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥ ९ ॥
यमो वैश्रवणः शक्रो वरुणश्च महाबलः ।
विशिष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ॥ १० ॥
अहो तम इवेदं स्यान्न प्रज्ञायेत किंचन ।
राजा चेन्न भवेल्लोके विभजन् साध्वसाधुनी ॥ ११ ॥

---

१२. पञ्चवटी ।

(रामायण-अरण्यकाण्ड-सर्ग १५)

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ।
उवाच लक्ष्मणं रामो भ्रातरं दीप्ततेजसम् ॥ १ ॥
आगताः स्म यथोद्दिष्टं यं देशं मुनिरब्रवीत् ।
अयं पञ्चवटीदेशः सौम्य पुष्पितकाननः ॥ २ ॥
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ।
आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३ ॥
रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ।
तादृशो दृश्यतां देशः संनिकृष्टजलाशयः ॥ ४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः ।
सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ५ ॥
परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ६ ॥

सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः ।
विमृशन् रोचयामास देशं सर्वगुणान्वितम् ॥ ७ ॥
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ।
हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ८ ॥
अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः ।
इहाश्रमपदं रम्यं यथावत् कर्तुमर्हसि ॥ ९ ॥
इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः ।
अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥ १० ॥
यथाख्यातमगस्त्येन मुनिना भावितात्मना ।
इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥ ११ ॥
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ।
नातिदूरे न चासन्ने मृगयूथनिपीडिता ॥ १२ ॥
मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ।
दृश्यन्ते गिरयः सौम्याः फुल्लैस्तरुभिरावृताः ॥ १३ ॥
इदं पुण्यमिदं रम्यमिदं बहुमृगद्विजम् ।
इह वत्स्यामः सौमित्रे सार्धमेतेन पक्षिणा ॥ १४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ १५ ॥

---

१३. श्रीनिवासस्थानानि ।

(महाभारत–अनुशासनपर्व–३२ अध्याय)

युधिष्ठिर उवाच ।

कीदृशे पुरुषे तात स्त्रीषु वा भरतर्षभ ।
श्रीः पद्मा वसते नित्यं तन्मे ब्रूहि पितामह ॥ १ ॥

भीष्म उवाच ।

अत्र ते वर्णयिष्यामि यथावृत्तं यथाश्रुतम् ।

रुक्मिणी देवकीपुत्रसन्निधौ पर्यपृच्छत ॥ २ ॥
नारायणस्याङ्कगतां ज्वलन्तीं दृष्ट्वा श्रियं पद्मसमानवक्त्राम् ।
कौतुहलाद्विस्मितचारुनेत्रा पप्रच्छ माता मकरध्वजस्य ॥ ३ ॥
कानीह भूतान्युपसेवसे त्वं संतिष्ठसे कानि च सेवसे त्वम् ।
तानि त्रिलोकेश्वरभूतकान्ते तत्त्वेन मे ब्रूहि महर्षिकन्ये ॥ ४ ॥
एवं तदा श्रीरभिभाष्यमाणा देव्या समक्षं गरुडध्वजस्य ।
उवाच वाक्यं मधुराभिधानं मनोहरं चन्द्रमुखी प्रसन्ना ॥ ५ ॥

श्रीरुवाच ।

वसामि नित्यं सुभगे प्रगल्भे दक्षे नरे कर्मणि वर्तमाने ।
अक्रोधने देवपरे कृतज्ञे जितेन्द्रिये नित्यमुदीर्णसत्त्वे ॥ ६ ॥
नाकर्मशीले पुरुषे वसामि न नास्तिके साङ्करिके कृतघ्ने ।
न भिन्नवृत्ते न नृशंसवृत्ते न चाविनीते न गुरुष्वसूयके ॥ ७ ॥
ये चाल्पतेजोबलसत्त्वमानाः क्लिश्यन्ति कुप्यन्ति च यत्र तत्र ।
न चैव तिष्ठामि तथाविधेषु नरेषु संगुप्तमनोरथेषु ॥ ८ ॥
स्वधर्मशीलेषु च धर्मवित्सु वृद्धोपसेवानिरते च दान्ते ।
कृपात्मनि क्षान्तिपरे समर्थे क्षान्तासु दान्तासु तथाबलासु ॥ ९ ॥
स्वाध्यायनित्येषु सदा द्विजेषु क्षत्रे च धर्माभिरते सदैव ।
वैश्ये च कृष्याभिरते वसामि शूद्रे च शुश्रूषणनित्ययुक्ते ॥ १० ॥

१४. दम्पतीस्नेहः ।

(महाभारत-शान्तिपर्व-अध्याय १४४)

भीष्म उवाच ।

अथ वृक्षस्य शाखायां विहङ्गः ससुहृज्जनः ।
दीर्घकालोषितो राजंस्तत्र चित्रतनूरुहः ॥ १ ॥
तस्य कल्यगता भार्या चरितुं नाभ्यवर्तत ।
प्राप्तां च रजनीं दृष्ट्वा स पक्षी पर्यतप्यत ॥ २ ॥

वातवर्षं महच्चासीन्न चागच्छति मे प्रिया ।
किं नु तत्कारणं येन साद्यापि न निवर्तते ॥ ३ ॥
अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने ।
तया विरहितं हीदं शून्यमद्य गृहं मम ॥ ४ ॥
पुत्रपौत्रवधूभृत्यैराकीर्णमपि सर्वतः ।
भार्याहीनं गृहस्थस्य शून्यमेव गृहं भवेत् ॥ ५ ॥
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनमरण्यसदृशं मतम् ॥ ६ ॥
यदि सा रक्तनेत्रान्ता चित्राङ्गी मधुरस्वरा ।
अद्य नायाति मे कान्ता न कार्यं जीवितेन मे ॥ ७ ॥
न भुङ्क्ते मय्यभुक्ते या नास्नाते स्नाति सुव्रता ।
नातिष्ठत्युपतिष्ठेत शेते च शयिते मयि ॥ ८ ॥
हृष्टे भवति सा हृष्टा दुःखिते मयि दुःखिता ।
प्रोषिते दीनवदना क्रुद्धे च प्रियवादिनी ॥ ९ ॥
पतिव्रता पतिगतिः पतिप्रियहिते रता ।
यस्य स्यात्तादृशी भार्या धन्यः स पुरुषो भुवि ॥ १० ॥
सा हि श्रान्तं क्षुधार्तं च जानीते मां तपस्विनी ।
अनुरक्ता स्थिरा चैव भक्ता स्निग्धा यशस्विनी ॥ ११ ॥
वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद् गृहम् ।
प्रासादोऽपि तया हीनः कान्तार इति निश्चितम् ॥ १२ ॥
धर्मार्थकामकालेषु भार्या पुंसः सहायिनी ।
विदेशगमने चास्य सैव विश्वासकारिका ॥ १३ ॥
भार्या हि परमो ह्यर्थः पुरुषस्येह पठ्यते ।
असहायस्य लोकेऽस्मिँल्लोकयात्रासहायिनी ॥ १४ ॥
तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ।
नास्ति भार्यासमं किंचिन्नरस्यार्तस्य भेषजम् ॥ १५ ॥

नागं पाशं च घण्टां डमरुकसहितं चाङ्कुशं वामभागे
नानालंकारदीप्तं स्फटिकमणिनिभं पार्वतीशं भजामि ॥४॥
रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ ५ ॥
असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥ ६ ॥
महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि ।
तयोर्न भेदप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दुशेखरे ॥७॥
यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥८॥
रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥९॥
इतो न किंचित् परतो न किंचिद्
यतो यतो यामि ततो न किंचित् ।
विचार्य पश्यामि जगन्न किंचित्
स्वात्मावबोधादधिकं न किंचित् ॥ १० ॥

EXERCISE (short sentences) I

दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय कौण्डिन्योऽपि ब्राह्मण इत्ययं तक्रकौण्डिन्यन्यायः सामान्यविशेषन्यायः ।

विजये! निवेद्यतां निवेद्यतां महाराजाय लङ्केश्वराय भग्नप्रायाशोकवनिकेति ।

जयतु महाराजः ! महाबलः खलु स वानरः । तेन खलु मृणालवदुत्पाटिताः सालवृक्षाः । मुष्टिना भग्नो दारुपर्वतकः । पाणितलाभ्यामभिमृदितानि लतागृहाणि । नादेनैव विसंज्ञीकृताः प्रमदवनपालाः । तस्य ग्रहणसमर्थं बलमाज्ञापयितुमर्हति महाराजः ।

विवाहा नाम बहुशः परीक्ष्य कर्तव्या भवन्ति । कुतः

जामातृसंपत्तिमचिन्तयित्वा पित्रा तु दत्ता स्वमनोभिलाषात् ।
कुलद्वयं हन्ति मदेन नारी कूलद्वयं क्षुब्धजला नदीव ॥

वयस्य ! अस्तमितो भगवान् दिवाकरः । संप्रति हि

पूर्वा तु काष्ठा तिमिरानुलिप्ता संध्यारुणा भाति च पश्चिमाशा ।
द्विधा विभक्तान्तरमन्तरिक्षं यात्यर्धनारीश्वररूपशोभाम् ॥

सुखं हि दुःखान्यनुभूय शोभते ।

यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् ।

न खलु वयस्तेजसो हेतुः ।

तेजसां हि न वयः समीक्ष्यते ।

कं बलवन्तं न बाधते शीतम् । कम्बलवन्तं न बाधते शीतम् ।

शयाना वर्धते दूर्वा आसीनं वर्धते बिसम् ।

शिखा ते वर्धते बाल गुडूचीं श्रद्धया पिब ।

चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः ।

उपनयो विद्यार्थस्य श्रुतितः संस्कारः ।

तमसो वा एष तमः प्रविशति यमविद्वानुपनयते ।

आचार्य उपनीतमन्तेवासिनं ब्रवीति—
मम हृदये हृदयं ते अस्तु । मम चित्तं चित्तेनान्वेहि ।
मामेवानु संरभस्व मयि चित्तानि सन्तु ते ।
मयि सामीच्यमस्तु ते मह्यं वाचं नियच्छतात् ।

हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति । मम व्रते हृदयं ते दधामि । मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकव्रतो जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ।

न तथा रत्नमासाद्य सुजनः परितुष्यति ।
यथा तत् तद्गताकाङ्क्षे पात्रे दत्त्वा प्रहृष्यति ॥
विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः ।
बोध्यन्ते यत्र शास्त्रेण तद्वै व्याकरणं विदुः ॥
तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः ।
सर्वमेकपदे नष्टं विना तेन महात्मना ॥
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ।

न जातु कामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ॥

काकस्य गात्रं यदि काञ्चनस्य
माणिक्यरत्नं यदि चञ्चुदेशे ।
एकैकपक्षे ग्रथनं मणीनां
तथापि काको न तु राजहंसः ॥

आपूर्णश्च कलाभिरिन्दुरमलो जातश्च राहोर्मुखं
संजातश्च घनाघनो जलधरः शीर्णश्च वायोर्जवात् ।
निर्वृत्तश्च फलैग्रहिर्द्रुमवरो दग्धश्च दावाग्निना
त्वं चूडामणितां गतश्च जगतः प्राप्तश्च मृत्योर्वशम् ॥

वरमद्य कपोतो न श्वो मयूरः ।
वरं तत्कालोपनता तित्तिरी न पुनर्दिवसान्तरिता मयूरी ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ।

अन्यत्र यूयं कुसुमावचायं
कुरुध्वमत्रास्मि करोमि सख्यः ॥ (अस्मि=अहम्)

स्वस्त्यस्तु ते धार्मिक मत्प्रसादात् ।
स्वस्ति तेऽस्तु लतया सह वृक्ष ।
स्वस्त्यस्तु ते सौम्य चिराय जीव ।
गौडो भवान् ! अथेति ब्रूमः ।

ग्रामश्च गन्तव्यः शीतं च । च हेत्वर्थे । शीतात् कथं गम्यत् इत्यर्थः ।

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥
कायेन वाचा मनसेन्द्रियैश्च बुद्ध्यात्मना वा प्रकृतिप्रमादात् ।
करोमि यद्यत् सकलं परस्मै नारायणायैव समर्पयामि ॥

EXERCISE (English into Sanskrit) II

1. Scarcely had he gone far, when a tiger faced me (नातिदूरं गते तस्मिन्).
2. As soon as the king entered the hermitage, our ceremonies became free from obstacles (आश्रमं प्रविष्टमात्रे तस्मिन् राज्ञि).
3. No sooner did the hunter discharge an arrow, than a piteous cry was heard from that quarter.
4. Desirous of becoming well versed (पारगामी भविष्यन्), in grammar, he went to Kâśî.
5. Before setting out on a journey (प्रयाणं करिष्यन्), he prostrated himself before the feet of his parents and asked their blessing.
6. As long as a man is not attacked by adversity, so long will he have friends (यावत् तावत्).
7. Even supposing that duty is not to be neglected by the king, still I cannot inform the king just now of the arrival of a sage (कामं धर्मकार्यमनतिपात्यं नृपस्य तथापि.........नोत्सहे).
8. True, he does not remember to have married this lady, still his mind becomes eager for her (use कामम्).
9. Pray, do not misunderstand me (अलं मामन्यथा गृहीत्वा). Verily, I have not done this.
10. The less you think of your relation's death, the less will be your sorrow for him (यथा यथा......न चिन्तयसि तथा तथा).
11. The more do we think of God, the less do we know Him.
12. You should any how (यथा कथंचित्) surmount these difficulties; for unless you remove them (यावन्न......), you will not conquer him.

13. What burns me is this that guests leave our house, thinking it to be destitute of wealth (एतत्तु मां दहति यत्……).
14. I perfer requesting a noble-minded person for this even though my request may be fruitless to requesting a mean-minded person, even though the request may be likely to bear fruit (Use वरम्).
15. I congratulate you on the accomplishment of all your desired objects (दिष्ट्या).
16. Having accepted (शिरसि कृत्वा) his command, he followed the way leading to that town (तन्नगरगामिनं मार्गम्).
17. Do place your son as a hostage (विश्वासस्थाने धृ) to con vince me (मां प्रत्याययितुम्) that you would carry out our agreement (समयधर्मं पालयिष्यति)
18. That there can be friendship between us is as incredible (अश्रद्धेय) as between grass and fire.
19. You should not be anxious on this account as long as I am alive (मयावस्थितेन or मयि ध्रियति).
20. That you are born in the purple (त्वद्गर्भेश्वरत्वम् or गर्भेश्वरोऽसीति) should not make you lazy.
21. I congratulate you on your having reached the 80th year (दिष्ट्या-प्रवर्धसे with the *Inst.*).
22. It is undoubtedly true that the more a man devotes his mind to good (कल्याणे कुरुते मनः), the more are all his objects fulfilled.
23. Many diseases are hereditary (कुलक्रमागत); they cannot be remedied (अप्रतिविधेय).

EXERCISE III

Formerly, there was a competition between gods and demons for supremacy of power. Gods chose the Aṅgirasa, while the demons, Uśanasa as their priest. Now Śukra restored to life, by resorting to the might of his learning, those demons who

were killed in fight by the gods and so they got up from the battle-field and fought again with gods; while Bṛihaspati was not able to revive those gods who were killed on the battle-field; because he did not possess the learning which Śukra had. Gods consequently became very sorry. Being greatly frightened by Śukra, gods went to Kacha, the eldest son of Bṛihaspati and requested him to render them help and bring that art which Śukra possessed. They said to him, "You will find Śukra near the demon Vṛishâparvan. You will be able to propitiate him and his daughter Devayânî and when she is satisfied, you will secure the art from him." Kacha, accepting the work, went to Śukra and said to him, "I am son of Bṛihaspati by name Kacha., Accept me as your pupil. I shall wait upon you. Permit me oh revered sage! to do so."

EXERCISE IV

Once the lord of gods was sitting on a throne in Amarâvatî. Eighty-eight thousand Ṛishis and thirty-three krors of gods waited upon him. There the divine sage Nârada praised to the skies the liberality and patience of king Vikramârka on the occasion of relating a narrative. While gods were surprised to hear it, Indra requested Kâmadughâ to go to the world of mortals and test the merits of Vikramârka. Then Surabhi assumed the form of a very feeble cow and having herself fallen into mud raised a piteous cry while the king was passing by the way. Having seen her in that state, the king who felt pity for her, strove hard to relieve her. While he was trying to extricate her, the sun set. When darkness thickened, the king stood there alone, bent upon protecting the cow from a tiger until the sun rose. Having observed mercy and other great virtues of the king, the cow was much pleased and asked him to choose a desired boon. Whereupon, a Brâhmin happened to come

there and requested the king to relieve him from poverty. The king then requested the cow to favour him, saying, "If your ladyship is pleased with me, let the Brâhmin gain his object." "Well done, great man, well done," said the cow. "Rare indeed are persons of your type in this selfish world. I am much pleased with you for your virtues; so let it be as you said."

EXERCISE V

In Vârâṇasî there lived a Brâhmin named Bhârgava. Though pressed by his father, he did not acquire knowledge in his youth. Then, being censured by all, full of repentance, he went to the bank of the Ganges to observe penance to acquire learning. With the intention of preventing him from performing severe austerities, Indra approached him in the disguise of a Brâhmin. Sitting on the bank of the Ganges near the Brâhmin, he frequently took up sand from the bank and threw it into water full of waves. Having seen him doing this, Bhârgava gave up his vow of silence and asked him through curiosity as to what he was doing. Being pressed exceedingly, Indra replied, "I am building a bridge on the Ganges for people to cross it." Then Bhârgava said, "Oh! what a great folly this is! Can a bridge be ever built by sand which can be carried away?" Indra replied, "Knowing this as you do, why are you bent upon acquiring knowledge by vows and fasting without learning and studying?" Thus addressed, the Brâhmin, thinking, ceased from austerities.

EXERCISE VI

In order to rise early, I would earnestly recommend an early hour for retiring. One hour of sleep before midnight is worth more than two hours after that time. Let it be a rule with you and scrupulously adhered to, that your light shall be extinguished

by ten o'clock in the evening. You may then rise at five and have seven hours to rest, which is about what nature requires.

If you ever hope to do anything in this world, the habit *must* be formed and the sooner it is done, the better. If any money could purchase the habit, no price would be too great. After you are once awaked, be sure to use the first consciousness in getting upon the floor. If you allow yourself to parley a single moment, sleep, like an armed man, will probably seize upon you; and your resolution is gone, your hopes are dashed, and your habits destroyed. Most confidently do I believe that he who from his youth is in the habit of rising early will be much more likely to live to old age, more likely to be a distinguished and useful man, and more likely to pass a life that is peaceful and pleasant.

NOTES ON

SELECT PASSAGES AND EXERCISES

NOTES ON SELECT PASSAGES AND EXERCISES

१.—वनोद्देशे—(उद्देशः=a place)–In the forest–region. चटकदम्पती—(चटकः–A sparrow+दम्पती, द्वन्द्वस०, जाया च पतिश्च जायापती जम्पती दम्पती वा)—A pair of sparrows. निलयः–A place. गच्छता कालेन—In the course of time. घर्मार्तः (घर्मेण आर्तः, आर्तः=आ+ऋत, p. p. of ऋ. आ+ऋ=आर् here; *Vide* p. 61 foot-note*)–Afflicted by heat. मदोत्कर्षात् (उत्कर्षः=आधिक्यम्, excess of pride). पुष्करम्–The trunk. विशीर्णानि (p. p. of वि+शॄ 9th Conj. *Par.*)–Broken. आयुःशेषतया=आयुः शेषो ययोस्तौ आयुःशेषौ तयोर्भाव आयुःशेषता तया–Because the duration of life was not completed. चटकौ=चटकश्च चटकी च; एकशेष compound. पितरौ and श्वशुरौ are other instances of एकशेषसमास, मातापितरौ and श्वश्रूश्वशुरौ are optional forms used for पितरौ and श्वशुरौ. कथमपि–Some how or other. विशेषः–Difference. श्लेष्माश्रु (श्लेष्मन् m. phlegm)–Tears mixed with phlegm. (मध्यमपदलोपी समा०, श्लेष्मणा मिश्रितमश्रु श्लेष्माश्रु). गजापसदस्य–(अपसद–m. A low man. At the end of a compound it has the sense of 'wretched', 'accursed'.)–Of the wretched elephant. अन्यजात्युद्भवः–He whose birth is in another class. विधेयज्ञः (उपपदसमास, विधेयं जानातीति विधेयज्ञः)—One who knows what should be done. सुहृद्भूता–Like a friend. उत्तरपदस्थभूतशब्दः समार्थः. It has sometimes the sense of स्वरूप; स्वरूपार्थेऽपि भूतशब्द उत्तरपदस्थः–इदं जगत् तमोभूतमासीत्–तमोरूपमित्यर्थः. स्फोटनम्–Breaking. मतिशालिभिः–मत्या शालन्ते शोभन्ते ते मतिशालिनस्तैः; By those who shine by their intellect. न विकल्पन्ते—Are not doubtful, are effectual. नयाः—Ways of policy. कियन्मात्रः (कियती मात्रा यस्य सः)—Of what account ? वराकः—Wretched. It has generally the sense of 'poor.' मध्याह्नसमये–मध्यमह्नः मध्याह्नः. This compound is called एकदेशी or अवयवी समास. ('अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' ।५।४।८७।। चात्–संख्याव्ययादेः. अच् (अ) is the समासान्त प्रत्यय added to रात्रि when preceded by अहः &c., *i. e.*, रात्रि is changed to रात्र; अहश्च रात्रिश्च अहोरात्रः (द्वन्द्व); पूर्वं रात्रेः पूर्वरात्रः; संख्याता चासौ रात्रिश्च संख्यातरात्रः.

24

Similarly, पुण्यरात्रः; द्वयोः रात्र्योः समाहारः द्विरात्रम्; अतिक्रान्तो रात्रिमतिरात्रः (प्रादिसमास). 'अह्नोऽह्न एतेभ्यः' ।५।४।८८॥ अहन् is changed to अह्न, when preceded by सर्व, &c. सर्वाह्णः, पूर्वाह्णः. But अहन् is changed to अह, and not अह्न (*Vide* Les. 32), when preceded by a numeral or पुण्य and सुदिन; पुण्याहम् (पुण्याहं भवन्तो ब्रुवन्तु, a request made to Brâhmins by a यजमान in the स्वस्तिवाचन ceremony). द्वयोरह्नोः समाहारः द्व्यहः. It must be noted that the द्वन्द्व and the तत्पुरुष compounds ending in रात्र, अह्न, and अह are masculine ('रात्राह्नाहाः पुंसि' ।२।४।२९॥) पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा-पुण्याहम् । सुदिनाहम् । लालसः-Eager. चञ्चू *Fem.*-A beak. सपरिकरस्य=Accompanied by followers. गर्तः-तम्-र्ता-A pit. समवायः-A collection. पञ्चत्वं यास्यति=Will die; will merge in the five elements. मण्डूकः-A frog. दर्दुरः-A frog.

२.—अवनि-नी-The earth. सादरमभाणि-सादरम्-Respectfully; बहु०, क्रियाविशे०. अभाणि-Pass. Aorist 3rd pers. of भण् 'to speak.' स्थविरे-Oh! old lady! वैश्यवरः=वैश्येषु वरः, सप्त० तत्पु०; in such cases षष्ठीतत्पु० is forbidden. वैश्यानां वरः and वैश्येषु वरः are instances of निर्धारणषष्ठी and निर्धारणसप्तमी; वैश्यानां वरः cannot be compounded. 'न निर्धारणे' ।२।२।१०॥-निर्धारणे या षष्ठी सा न समस्यते. नन्दिनी-A daughter. व्यवहारी-A merchant. उपयेमे-Married. यम् with उप is *Âtm.* सोदरः-A brother; समानमुदरं यस्य सः; समान is changed to स. प्रवहणम्-A boat. पोतः-A boat. अभिप्रतस्थे-स्था is Âtmanepadî when preceded by सम्, अव, प्र, वि; 'समवप्रविभ्यः स्थः' (आत्मनेपदम्) ।१।३।२२॥. कल्लोलः-A big wave. मालिका-A collection. धात्रीभावेन कल्पिताहम्-I who was made her foster-mother. फलकम्-A board. परां काष्ठामधिगता-Which had reached the highest limit. विचेतना-विगता चेतना यस्याः सा. प्रच्छायशीतले-प्रकृष्टा छाया यस्य तत् प्रच्छायं प्रच्छायं च तत् शीतलं च प्रच्छायशीतलं तस्मिन् (विशेषणसमास, कर्म०स०). जनपदगामिनम् (जनपदं गच्छतीति जनपदगामी। तम्)-Leading to the country. वारणः-An elephant. प्राद्रवत्-Ran away. गुल्मकः-कम्-A collection. कण्ठीरवः-A lion. (कण्ठी *Fem.*-The throat). आददति-*Loc. Sing.* of आददत् pres. p. of आ+दा 3rd *Par.* Pres. Participles of शास्, जक्ष्, चकास्, जागृ, and दरिद्रा as well as of roots of the 3rd Conj. in which the nasal is dropped

from the 3*rd* pers. plural terminations, do not take the nasal in the सर्वनामस्थान in the *Mas.* and take it optionally in the *Neu. Plu.* of the *Nom.*, the *Acc.*, and the *Voc.*–ददत्, ददतौ, ददतः, ददतम्, ददतौ; न० प्र० ददत्, ददती, ददति-ददन्ति. दन्तावलः–An elephant (वल= मत्वर्थीय or possessive ter. The final vowel is lengthened as in कृषीवलः–A farmer). समासीनेन (समासीन is the pres. part. of सम्+ आस्. It is irregular)–By one sitting. निकटः-टम्–Vicinity. निकटम् *Ind.*–Near.

३.—क्रियतां समयधर्मः–(समयः=An agreement) Make an agreement. क्षुत्क्षामकण्ठः–One whose throat is parched by hunger. क्षाम is p. p. of क्षै 1*st Par.* ('क्षायो मः' ।८।२।५३॥ त is changed to म in क्षै). सृक्किणी परिलेलिह्यमानः–'प्रान्तावोष्ठस्य सृक्किणी' इत्यमरः–सृक्किन् *n.*–The end of lips. परिलेलिह्यमानः–Frequently licking; pres. p. of the यङन्त (Freq.) of लिह्. भर्त्सयन्–From भर्त्स् (भर्त्सयते). It is usually *Âtm.* (भर्त्सयमानः). उच्छेदयिष्यामि=उच्छेत्स्यामि. विश्वासस्थाने–As hostages.

४.—दायादः-दायमादत्ते इति दायादः–An heir, one entitled to a share of inheritance. अरघट्टघटीम्–अराः–Spokes of a wheel: अरैर्घट्यते रच्यत इत्यरघट्टः–A machine for raising water from a well. आहूतवान्—Active p. p. of आह्वे (1*st Ubh.*); ह्वे takes संप्रसारण in the Perfect; जुहाव-जुहुवे; हूयात्-ह्वासीष्ट (Bene.); अह्वत्-अह्वास्त (Aor.) अश्रद्धेयम्–Incredible. श्रद्धा (श्रत्–An *Ind.*+धा 3*rd Ubh.*); परिणतवयाः–परिणतं वयो यस्य सः; पश्चिमे वयसि वर्तमानः। वृद्ध इति यावत्. प्रलापपरः-प्रलापः परं प्रधानं यस्य सः—Intent upon crying; who kept on crying. कवलितम्–कवलोऽस्य संजात इति; made a mouthful of. बुभुक्षितः–Hungry; p. p. of the Desi. of भुज्. गोधा *f.*=An alligator. सुकृतमन्तरे मया विधृतम्–A kind of oath. I swear by my सुकृत–Virtuous deeds. I shall sacrifice them if I tell a lie.

६.—भूरि Much. वननित्यः–नित्यः=आसक्तः; Constantly dwelling in a forest. इष्टि–A sacrifice. क्रोशतः–क्रुश् 1*st Par.*–To cry out. ब्रह्माहितम्–ब्रह्म=ब्रह्म तेजः. Brâhminical prowess. धास्यते–Will suck. धे 1*st Par.* (धयति)-To suck. स्तनंधयः–A child. आस्ये–In the mouth.

प्रदेशिनी-The fore-finger. दिवौकसः-द्यौः ओकः येषां ते दिवौकसः। पृषोदरादित्वात् साधुः-It is correct, because it is included in the पृषोदर class. Instead of दिवोकस् we have दिवौकस्.

६.—सकलाः—(बहु०, कलाभिः अंशैः सहिताः)-All. गन्धगजकुमारकम्-गन्धप्रधानो गजः गन्धगजः (मध्यमपदलोपी स०)-A high class elephant. From the temples of elephants a fragrant ichoral juice called मद or दान comes out when they are in youth. क in कुमारक signifies वात्सल्य or affection. वारिबन्धात्-From the place where elephants are fastened; वारि-री-A place for fastening elephants. अवगतसकलकलाकलापम्-1. One who has acquired all arts; 2. The moon who has acquired all digits; the full-moon. कलाप *m.*=A collection. सफलताम्-फलेन सहितानि सफलानि तेषां भावस्तत्ता। ताम्. एवं संपिण्डितेनामुना...प्रवर्धसे=Thou prosperest by this sixteenth year arrived at by years being thus summed up, *i. e.*, I congratulate thee upon thy having reached the sixteenth year, arrived at by thus summing up the years. नियन्त्रणम्-Restraint. ललितम्-Sport; p. p. of लल् 1*st* or 10*th*, *Ubh.*, having the sense of an abstract noun (भावे क्तः). The word ललना (a woman) is derived from it. त्रिभुवनाश्चर्यमिति कृत्वा-Thinking that he was the wonder of the three worlds. उच्चैःश्रवस् *m.*=Indra's horse. एवंविधः-बहु०, एवं विधा प्रकारो यस्य सः. परिचारार्थम्-परिचाराय इदं यथा स्यात्तथा (चतु० तत्पु०, used as क्रियाविशे०). अभिरूपः-Handsome. कुलक्रमागतः-Hereditary. शिरसि कृत्वा-Bowing to. ध्वनिः-Sound.

७.—दर्शनार्थम्—दर्शनाय इदं यथा स्यात् तथा. It is चतु० तत्पु० and is a क्रियाविशे० of आगतम्. It is a नित्यसमास. A compound which cannot be dissolved at all or cannot be dissolved by words forming it is a नित्यसमास ('अविग्रहोऽस्वपदविग्रहो वा नित्यसमासः'); खट्वारूढः is thus a नित्यसमास and means जाल्म, नीच. A student must sleep on the ground. If he sleeps on a bed-stead, he is called खट्वारूढः-A low or wretched man. This word bears evidence of the condition of student-life in ancient times. ('अर्थेन सह नित्यसमासो विशेष्यलिङ्गं च') अमात्यः-अमा सह (राज्ञा) भवः अमात्यः, अमा *Ind.* अमावास्या-अमा सह

वसतः सूर्याचन्द्रमसौ यस्यां तिथौ सा. केवलं च-Simply. It is to be construed with इति विस्तरेणाभिधीयसे. इति=इति हेतोः; On this account. It is because there are so many natural causes that you are addressed in detail. अभानुभेद्यम्-भानुना भेद्यं भानुभेद्यम्, न भानुभेद्यमभानुभेद्यम्; नञ्तत्पु०—(तमस्) which cannot be destroyed by the Sun. यौवनप्रभवम्=यौवनं प्रभव उपत्तिस्थानं यस्य तत्-(Darkness—ignorance) produced from youth. This darkness is different from ordinary darkness. Ordinary darkness can be destroyed by the rays of the Sun, cut off by the lustre of gems, removed by the light of lamps, and is not very deep. यौवनप्रभवं तमः is the उपमेय, an object of comparison and साधारणं तमः is the उपमान, a standard of comparison. व्यतिरेक or आधिक्य (excess or superiority) of the उपमेय over the उपमान is shown here, so the Alankâra is व्यतिरेक. अपरिणामोपशमः—Which cannot be allayed in the end. रागमलावलेपः=The pride arising from the impurity of passion. अस्नानशौचवध्यः=Which cannot be destroyed by the purity of bath. गर्भेश्वरत्वम्-Sovereignty from the birth; the state of having been born in the purple. अविनयानां...समवायः=एषामेकैकमप्यविनयानामायतनं समवायः (A collection of them) अविनयानामायतनमिति किमुत (किं वक्तव्यम्)—When each of them is an abode of immodesty, much more so is a collection of them. This is called कैमुतिकन्याय, a maxim of 'how much more', an argument *a fortiori*. अभिनवं यौवनं यस्य सः अभिनवयौवनः तस्य भावः अभिनवयौवनत्वम्. अप्रतिमरूपत्वम् and अमानुषशक्तित्वम् should be similarly dissolved. कालुष्यम्-Dirt; impurity; कलुष-Muddy. भवादृशः-भवादृश्-श-क्ष are the three forms of the word: and similar words have such forms; *e. g.* तादृश्-श-क्ष. अपगतमल—मलः-मलम्-Dust; impurity: impure thoughts. गभस्ति *m., f.*,-A ray. गभस्तिमत्=The Sun. कल्याणाभिनिवेशी-कल्याणे अभिनिवेशः कल्याणाभिनिवेशः। सोऽस्यास्तीति कल्याणाभिनिवेशी; the affix इन् is applied to the तत्पु० compound-One who is intent upon his prosperity (अभिनिवेशः—Devotion, close attachment). रागः=1. Colour; 2. Attachment.

एकान्तवक्रता=1. Excessive crookedness; 2. Going in an exceedingly crooked way. चञ्चलता=1. Activity; 2. Fickleness. मोहनशक्ति=1. Power of infatuation; 2. Power of bewitchment. मद=1. Intoxication; 2. Pride. नैष्ठुर्यम्=1. Hardness; 2. Cruelty. These words have thus two meanings and the Alankâra is *Ślesha*. Of the two meanings one goes with पारिजातपल्लव, इन्दुशकल, &c., and the other with लक्ष्मी. शकलः-A piece. कालकूटम्-Poison. विरहविनोदचिह्नानि-Signs of removing the pain of separation. प्रपलायते—When अय् 1*st* Conj. *Âtm.* is preceded by परा, र् of परा is changed to ल्. अय् takes the Peri. Perf. अयांचक्रे-बभूव-आस. अभिजनः-A high family. कामम्-Granted; may be. समारोपित°-Whose purificatory rites such as उपनयन (the thread ceremony) have been performed by his father. तरल-Unsteady. अप्रतिबुद्ध-One who is not enlightened. मुखरीकृतवान्-Caused me to speak. कृतं मयेदम्-कृतवानहमिदम्. When the verb is intransitive, there is no change in the sense. गतोऽहं ग्रामम्, and गतवानहं ग्रामम् have the same sense, *viz.*, I went to a village. इदमेव=पुरुषमियं दुर्विनीता लक्ष्मीः खलीकरोतीति. विजयस्व-जि preceded by वि and परा is *Âtm.* ('विपराभ्यां जेः' (आत्मनेपदम्) १।३।१९॥). सिद्धादेशः—One whose order is sure to take effect.

८.—श्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणम्=One who has grasped the characteristics of the great soul from the *Śrutis* (the Vedas) and the *Smritis*-books on traditional law). परमहंसपरिव्राट्—There are four classes of ascetics, कुटीचक, बहूदक, हंस, and परमहंस, of whom each succeeding name shows a higher stage than the preceding name. परमहंस is thus the highest of ascetics. न हि—Verily, when the nearer bank of a river is reduced to ashes, no one wishes to cross the river. Similarly, when the dead body is eaten away by birds or is reduced to clay, no one wishes to be relieved from the world. Why do you wish to be relieved then? From पार and अवर, the further and the near bank, we have पारावारः-An ocean. ग्राहः-An alligator. वयस् *n.* A bird. साध्ववादीः-Thou speakest rightly now.

Why didst thou say wrongly before, "I was son of a Brâhmin, of a particular family, and Brahmachârin; and am now a परमहंस ?" मृषोद्य-A falsehood. अदोन्वयः—असौ अन्वयः यस्य सः=Of this family. प्रत्यभ्यज्ञासीः-Thou hast recognised the body which has different classes, families, and purificatory rites as the soul which is devoid of classes, families, and purificatory rites.

९.—परमानन्दमाधवम्—Vishṇu, soul of supreme bliss. मा=लक्ष्मी+धव=पति. सत् (entity or existence), चित् (knowledge), and आनन्द (felicity) are the three forms of the Supreme Spirit. बकः-A crane. वञ्चनम्-Deceit. कार्यकाल=The time of using knowledge and wealth. सिता *f.*-Candied sugar.

१०.—अर्कः-The Sun. लोकपालः-A guardian deity. तपनः-The Sun. वैश्रवणः-कुबेरः. वित्ताप्पत्योः-वित्तपत्ति=Lord of Wealth, Kubera, and अप्पति=Lord of Water, Varuṇa; द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं संबध्यते-The word पति occurring at the end of the Dvandva compound वित्तापः is to be construed with both वित्त and अप्, *i. e.*, the word means वित्तपति and अप्पति. व्यलीकेन-By fraud. द्रुतम्-Quickly. विद्रुत-Run away. मनुष्य इति-Thinking him to be a man. दुरुपसर्पिणम्-Who can approach him with difficulty.

११.—इक्ष्वाकु-A descendant of king इक्ष्वाकु. बीजमुष्टिः प्रकीर्यते=A handful of seeds is not scattered; seeds are not sown (because of the fear of robbers at the time of the harvest-फलकाले लुण्टाकशङ्कया). पितुः पुत्रो…वशे=The son does not obey his father and the wife her husband; because there is none to punish the transgressor of orders. अत्याहितम्—Great fear. 'अत्याहितं महाभीतिः' इत्यमरः. विषाणिनः—Of good tusks. हायनः-नम्-वर्षम्. क्षेम-Safe. पण्यम्-A commodity. विभजन्-Distributing. स्वकम्=Life. सत्यं च धर्मश्च=Propagator of truth and religious duty. महता वृत्तेन=Yama has only the virtue of punishing the evil-doer; Kubera, that of giving wealth; Indra, of protecting men; and Varuṇa, of leading them to the right path. But the king having all these four merits is superior to them by his great virtue.

१२.—नाना *Ind.*-Different. व्यालः—An elephant; a serpent. संनिकृष्ट-Near. संयताञ्जलिः-One who has folded his hands for salutation. परवानस्मि-स्थिते=When you are with me I am dependent upon you even for a hundred years; *i. e.*, I am never independent. यथावत्-As is proper. संकाश-Like. सुरभि-Beautiful. भावित-Holy. चक्रवाकः-This bird is separated from its mate at night. पक्षिणा= जटायुषा. कन्दरा-A cave. आसन्न-Near.

१३.—भरतर्षभ-भरतेषु ऋषभः भरतर्षभस्तत्संबुद्धौ भरतर्षभ-Best of the descendants of Bharata. ऋषभ, शार्दूल, सिंह. पुङ्गव, &c. are used as उत्तरपद or final members of a compound in the sense of 'the best'. 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः' ॥ (व्याघ्र, पुङ्गव, ऋषभ, कुञ्जर, सिंह, शार्दूल, नाग, &c., all *Mas.*, are used in the sense of 'the best' as final members of a compound). 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'-उपमित, *i. e.* उपमेय is compounded with व्याघ्र, &c., when a word signifying सामान्य or साधारणधर्म [common property] is not used. पुरुषः व्याघ्र इव पुरुषव्याघ्रः; but in पुरुषः व्याघ्र इव शूरः a word signifying सामान्य (*viz.*, the word शूरः) in used. The words पुरुषः व्याघ्र इव शूरः therefore remain as they are and cannot be compounded. नृसोमः=ना सोम इव. श्री=The splendour of beauty, generosity, &c. पद्मा=Riches. मकरध्वजस्य—Of Pradyumna. प्रगल्भे-In an eloquent man. देवपरे=देवः परं प्रधानं वस्तु यस्य सः देवपरः तस्मिन् देवपरे. उदीर्ण°- Of noble or generous temper (p. p. of उद्+ईर् 2*nd* *Âtm.*). सांकरिके=In one who has a mixture (संकर) of castes. असूयक-Fault-finding. असूया=गुणेषु दोषाविष्करणम्. कृतात्मन्-One who has conquered his senses; holy. स्वाध्यायनित्य-Devoted to the study of the Vedas; नित्य=निमग्न. संगुप्तमनोरथेषु-In those whose opinions are concealed, who have one thing in their hearts and another in their speech.

१४.—तनूरुहः-Hair. कल्यगता--कल्यं प्रातरहर्मुखं वा. In the morning. आकीर्णम् (p. p. of आ+कॄ (किरति) 6*th* *Par.*)-व्याप्तम्-Full of. तपस्विनी-A poor lady (signifies compassion). कृच्छ्रम्-A misery.

भेषजम्-A medicine. शकुनिघ्नेन-शकुनिं हन्तीति शकुनिघ्नस्तेन-By a bird-killer. अग्निसाक्षिकम्—अग्निः साक्षी यस्मिंस्तत्. एतत्-भर्ता हि शरणं परमित्येतत्. स्तबकः-A bunch.

१६.—न हायनैः°—Duties are not prescribed by Ṛishes by means of their years, wrinkles, &c. अनूचान—One who recites the Vedas. ऋच्छति—ऋ (ऋच्छ्) 1st *Par. Pres.* 3rd *Pers. Sing.* वाजपेय-A kind of sacrifice. कलया-अंशेन.

१६.—त्रैविद्यवृद्धान्—तिस्रो विद्या अधीयते विदन्ति वा त्रैविद्यास्तेषु वृद्धास्तान्-The oldest of those who know the three Vedas. परावरज्ञाः-परं चावरं च परावरे ते जानन्तीति—Those who know the past and the present. एवं प्रवृद्धं...शरीरात्—एवं प्रवृद्धं सकलं मनोजं संतापनीयं शरीरात् प्रणुदन् दूरीकुर्वन्नित्यर्थः. कात्स्न्र्येन=Wholly; with entirety.

१७.—अतीतम् (p. p. of अति+इ)-Dead. भैषज्यमेतद्...चिन्तयेत्-यदेतत् (दुःखं) नानुचिन्तयेत् तदेतत् (अननुचिन्तनमित्यर्थः) दुःखस्य भैषज्यम्। Not to think of misery is a medicine to cure it. गृध्येत्-Should covet. स्निग्धत्वं-°मप्रियम्=Attachment to sensual objects through infatuation or folly is an evil and causes death. सर्वे क्षयान्ताः-जीवितम्=All collection ends in destruction; rise, in fall; union in separation; and life, in death. वयो गच्छन्न तिष्ठति—Life does stop going; keeps on going. If the reading be वयोऽगच्छन्न तिष्ठति, it means—Life does not stand still without passing away. अध्यात्मरतिः-आत्मन्यधिकृत्याध्यात्मम्, अध्यात्मं रतिर्यस्य सः. निरामिषः-Free from attachment to sensual objects.

१८.—पुत्रक—Dear son. गुहां प्रविष्टम्-Seated in the inmost part of the heart. न हि प्रतीक्षते...कृतम्=Death does not wait to see whether his work, *i.e.*, life-work, is over or not. न देहभेदे—विजानताम्=Do not think that a change of body means death. When a man dies his soul only leaves his body for another. न तेन किंचिन्न प्राप्तम्-तेन किंचिन्न प्राप्तमिति न अपि तु प्राप्तमेव. द्वौ नञौ प्रकृतार्थं दृढीकुरुतः-Two negatives make one strong affirmative.

१९.—बाष्पगद्गदम्—बाष्पैः गद्गदं विशीर्णाक्षरं यथा स्यात्तथा-In a tone

faltering, with letters broken and rendered indistinct through tears. अयः—Iron. कैव कथा शरीरिषु—What to say of animate objects! There is no wonder in animate objects being heated and softened by grief, when inanimate objects like iron are softened by heat. हन्त–Signifies grief. प्रहरिष्यतः-About to strike; wishing to strike. अथवा–Or rather (signifies an alternative. पक्षान्तरे इत्यर्थः). हिमसेकविपत्ति–Of which death or destruction takes place through a sprinkling of dew. पूर्वनिदर्शनम्–A former instance. अशनिः कल्पित एष वेधसा–This garland is made a thunderbolt by fate. अशनिः is विधेय or predicate. In a sentence which has two parts, उद्देश्य-subject and विधेय–predicate, विधेय is predominant and demonstrative pronouns agree with it in gender. विधेयप्राधान्यादेष इति पुँल्लिङ्गता. Similarly, we have शैत्यं हि यत् सा प्रकृतिर्जलस्य. कृतपूर्वम्–पूर्वं कृतं कृतपूर्वम्; सुप्सुप्समास. शब्दपतिः–शब्देन पतिर्न त्वर्थेन–Nominal king. भावनिबन्धना–(भाव–nature)—Having its origin in nature; natural. शर्वरी–Night. द्वन्द्वचर–Moving in a pair. The चक्रवाक bird always moves with its mate and is separated at night. पतत्रिणम्=A bird-Chakravâka. पतत्रम्–A wing. वामोरु—वामौ सुन्दरौ ऊरू जङ्घे यस्याः सा वामोरू तत्संबुद्धौ वामोरु. (In a compound in the feminine gender ऊरु is generally changed to ऊरू, when the पूर्वपद of the compound signifies an उपमान or is संहित, वाम, &c ; रम्भोरूः, करभोरूः) 'ऊरूत्तरपदादौपम्ये' ४।१।६९॥ 'संहितशफलक्षणवामादेश्च' ४।१।७०॥). कलम्–Sweet but indistinct. अन्यभृतासु–In cuckoos. परभृता, अन्यभृता (reared by another) signify a cuckoo; because its eggs are said to be hatched by a crow. परभृत् (परं बिभर्तीति, that which rears another) therefore means a crow. पृषतीषु–In the roes. विभ्रमाः–Sportive movements. त्रिदिवो°—Looking to me, though you were anxious to go to heaven, you have placed your virtues in these animals. कलाविधौ—In the performance of arts. करुणाविमुखेन–विगतं सुखं यस्य सः विमुखः। करुणाया विमुखः करुणाविमुखस्तेन.

२०.—अर्थोष्मणा–By the warmth of wealth. त्रिलोकीतिलकः–त्रयाणां लोकानां समाहारस्त्रिलोकी (समाहारद्विगु. Similarly, अष्टाध्यायी, चतुःसूत्री,

पञ्चवटी) त्रिलोक्यास्तिलकः भूषणं त्रिलोकीतिलकः, an ornament of the three worlds. शीतसितया-शीता चासौ सिता च शीतसिता तया-Cold and white (the Ganges); giving ease to the heart and glorious (without any spot of infamy).

पात्रं पवित्रयति-A lamp makes the pot (पात्रम्) dirty; while friendship of the good makes the person forming it (पात्रम्) holy-devoid of unholy thoughts. A lamp destroys गुण (wicks); while friendship of the good does not destroy गुण's (merits), but nourishes them. A lamp destroys स्नेह (oil); while the company of the good does not destroy स्नेह (affection). A lamp produces मल (soot); while good company does not produce मल (impure thoughts). A lamp does not look good at the end of दोषा (night); while the company of the good shines on account of the destruction of दोष (faults). A lamp flickers—is unsteady; while the company of the good is not fickle. Thus good company is some indescribable lamp in the house of a man of good deeds. Here the lamp of good company is described as superior to other lamps. उपमेय being thus superior to उपमान, we have suggestion (ध्वनि) of the व्यतिरेकालंकार. पवित्रयति (*Den.* नामधातु; पवित्रं करोति).

नार्घन्ति-अर्घो मूल्यमर्घवन्ति न भवन्तीत्यर्थः (नामधातु).

प्रतिभावतः-Of one who has genius or originality of conception,

प्रतिभा-"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता"-Intellect shining with new forms of its manifestation. Without intellect or imagination of such a high order, good poetry cannot be composed. कस्यचित—कस्यचिदेव न सर्वस्य ।

नाकवित्व°—Not composing poems does not lead to dereliction of duty or a disease, or punishment; while the good describe a bad composition of poems to be actual death (of one's glory), complete ignominy.

व्याख्यागम्यानि—If such (of artificial beauty) poems can be comprehended like Śâstras (high literary and philosophical

works) only by means of commentaries, this is verily a happy day to those who have bright intellect; but alas! those whose intellect is dull are undone. What is implied is that poetry should be clear and intelligible. It should not require like the Śâstras the help of commentaries for its comprehension. दुर्मेधसः-'नित्यमसिच् प्रजामेधयोः' ॥५।४।१२२॥ *Vide*. Les., XXXIII. प्रजा and मेधा have असिच् as समासान्त प्रत्यय, *i. e.*, are changed to प्रजस् and मेधस् in बहु० when preceded by नञ् (अ or अन्), दुस्, and सु (अप्रजाः, सुप्रजाः, अमेधाः, &c.).

मूर्धजाः—मूर्धनि जायन्त इति मूर्धजाः केशाः.

जीवमानः—जीव् 1*st* Conj. is *Par.*, but here it is *Âtm.* in the sense of ताच्छील्य-the act of being accustomed to live. जीवमानः thus means 'accustomed to live.' 'ताच्छील्यवयोवचनशक्तिषु चानश्' ।३।२।१२९॥—आनश् (आन, ter. of the *Âtm.* Pres. p.) is added to a root in the sense of 'the act of being accustomed to it' expressing 'age,' and 'power.' भोगं भुञ्जानः-Accustomed to enjoy pleasure. कवचं बिभ्राणः—Of an age fit to wear an armour. शत्रून्निघ्नानः-Having the power to kill enemies.

भागधेयम्—भाग एव भागधेयम्. धेय is a स्वार्थवाचक affix; *Vide* Les. 39; that is, it makes no change in the sense of the base (प्रकृति) to which it is applied. नाम एव नामधेयम्: बाल एव बालकः (क is here स्वार्थवाचक); चत्वारो वर्णाश्चातुर्वर्ण्यम् (Here ष्यञ् or य is स्वार्थवाचक); सुखमेव सौख्यम्.

इतरतापशतानि—Hundreds of miseries, other than that of communicating something full of taste to those who have no taste.

अस्यां सखे°—This is an instance of अन्योक्ति or अप्रस्तुतप्रशंसा. When प्रस्तुत (the subject of description) is suggested from the प्रशंसा (description) of अप्रस्तुत (what is not the subject of description), the figure is अप्रस्तुतप्रशंसा. To communicate taste to the inappreciative is like the cooing of the cuckoo in a place inhabited by the deaf. The poet means the description to apply

to a learned man who is advised not to display his learning to those who have no taste for it.

दैवहतकाः—दैवं हतं निन्द्यं येषां ते. Here the निष्ठान्त word or the past participle is used as उत्तरपद of the compound. निष्ठा=p. p. affix. We have either आहिताग्निः or अग्न्याहितः (one who keeps the sacred fire). कलानभिज्ञाः-1. Those who do not know or appreciate कल or sweet, indistinct cry; 2. Those who do not know कला or arts.

कृतान्तः-God of death; यम. मनाक् (*Ind.*)-A little.

भवन्ति नम्रा°-The first three *pâdas* contain particular instances, which are strengthened by a general statement in the fourth *pâda*. Thus when a particular statement is strengthened by a general statement and *vice versa*, the figure is -अर्थान्तरन्यास.

'ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन ।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः ॥' दण्डी

The figure is to be known as अर्थान्तरन्यास, in which after having described something, the author describes another thing, able to prove it.

पूर्वार्धपरार्धभिन्ना—The shadow grows smaller and smaller during the first half of the day and such is the friendship of rogues; while the shadow grows larger and larger during the latter half of the day and such is the friendship of good men.

तज्ज्ञाः—Those who know the characteristics of a good friend.

एकातपत्रं प्रभुत्वम्-(एकमद्वितीयमातपत्रं छत्रं यस्य तत्); unrivalled supremacy. वार्तम्-Welfare. प्रतियातुकामम्-प्रतियातुं कामो यस्य स प्रतियातुकामस्तम्; desirous of going away (तुम् drops its म्; *Vide* Les. 33). प्रयुक्त°—इतः=अस्मिन् मयि; रंहः-Velocity. मूर्च्छति-व्याप्नोति; makes effect upon. पत्तिः-पदातिः (पद्भ्यामतति)-A foot-soldier.

दिवं यदि°—Said by Śiva in the disguise of a sage to Pârvatî who was practising penance to secure his hand.

लोभश्चेद्°—Avarice is like fire; back-biting like committing sins; and so on.

विद्यायां व्यसनम्-व्यसन=Attachment.

